M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 242

Title Siddhantamanjari Dipika

242 - 242a
242b
242c

:	: Siddhantāmanjari	: Title
:	: Dīpikā called	: Author
:	: Tarkeprakāsa	: Editor
S'rikanṭha :	By Visvanatha Dixil-	: Year, Vols.
:	:	: Publisher
242 :	:	: Remarks

॥श्रीगणपतयेनमः॥जटाजूटजलसत्तुंगगंगजलच्छुरितमस्त-
कं पुनातु गिरिजाप्रेमपात्रमेकमनेकधा॥१॥उपजीव्योपजीवक
भावसंगतत्वादुपमाननिरूपणानंतरं शब्दं निरूपयन् शिष्यावधा
नममतीजानीते॥अथेति अत्रह्यमानपरस्यशब्दप्रमाणतया
पदेउपमानोपजीवकत्वाभावात्फलयोः स्वरूपफलयोश्च संगति
बोधात्तस्याश्च फलनिष्पत्तिपर्यन्तमपकरणत्वात्मकपरंपरासं-
बंधेन करणनिष्ठत्वात्करणयोरामंतयात्रिधाननियामकत्वमव
सेयं तथा हि ज्ञप्तिपरिच्छित्तिरियोयमितिः तस्याश्च सर्वस्या एव शाब्द
बोधजनकत्वेऽनफलयोरूपजीव्योपजीवकत्वसंगतः एवं स्वरूप
फलयोरपि अतिदेशवाक्यार्थज्ञानरूपोपमानप्रमाणस्योपमिति
द्वाराशाब्दबोधोपजीव्यत्वादिति॥ केचित्॥ ज्ञायमानपदं करणमित्य राम
स्य शब्दः केनलायमानं मित्यपास्तं सविशेषणे हि विधिनिषेधौ विशेष- १

णमुपसंक्रामतः सति विशेष्ये बाध इति न्यायेन स्वर्गी ध्वस्त इतिवत्
विशेषणांतरशक्तितानमादायोपमानमानोपजीवकत्वसंभवे-
न स्वरूपतउपजीवकत्वमपि संगतिरित्याहुः पदज्ञानस्य शाब्दप्रमाणत्वां
गीकर्तृणां नवीनानां मते तूपमितेः शक्तपदविषयकत्वेनातिदेशवा
क्यार्थज्ञानात्मकोपमानप्रमाणस्योपमित्यात्मकशाब्दप्रमाणोपजीव्य
त्वेन स्वरूपतउपजीवकत्वमक्षतमेवेति दृष्टव्यं ननु अतिदेशवाक्यरू
पशब्दप्रमाणस्यापि अतिदेशवाक्यार्थज्ञानरूपोपमानोपजीव्यत्वादु
पमानमेवादौ निरूपितं न तु शब्द इत्यत्र किं विनिगमकमिति चेन्न॥प्रमा
णतावच्छेदकधर्मावच्छिन्नोपजीव्यतानिरूपितोपजीवकताया एवात्र सं
गतित्वात्॥प्रमाणतावच्छेदकधर्मश्च इंद्रियत्वादिः अवच्छिन्नत्वं च व्याप
कत्वं एवं चोपमानस्य संकेतमात्रग्राहकतया सर्वस्यैवोपमानस्य शब्द
प्रमाणोपजीव्यत्वं शब्दप्रमाणस्य तु न सर्वस्यातिदेशवाक्यार्थज्ञानात्मको

२ पमानप्रमाणोपजीव्यत्वं घटमानयेतिशब्दे तदभावात् न च तादृशमान
पदत्वेन शाब्दत्वावच्छिन्नं प्रति हेतुतया घटमानयेतिशब्दे निरूपितशा
ब्दत्वावच्छिन्नकार्यताया उपमाने सत्वात् उक्तदोषतादवस्थ्यमिति वाच्यं
प्रमाणविभाजकोपाधिनिष्ठतद्धर्मावच्छिन्नाया उपजीवकताया विव
क्षितत्वात् प्रमाणविभाजकोपाधिश्च साक्षात्कारणत्वादिः अवच्छिन्न
त्वं च स्वरूपसंबंधविशेषः इत्थं च शाब्दत्वादेरुपमितिकरणतानिमत्तः
तातिदेशवाक्यार्थज्ञानत्वादेरेव तत्पालेन तस्य च प्रमाणतावच्छेदक
शब्दप्रमाणत्वव्यापकोपजीव्यता निरूपितोपजीवकतानवच्छेदकत्वा
त् उद्दीपाभावात् ॥ केचित्तु ॥ यत्र कीदृग्गवय इति प्रश्नानंतरं चित्रले
खादिना तादृशपिंडप्रदर्शनं तत्रातिदेशवाक्यं विनापि मानसरूपा
तिदेशवाक्यार्थज्ञानात्मकोपमानोदयेन व्यभिचाराच्छब्दो नोपमानो
उपजीव्य इति ॥ तु पमानं शब्दोपजीवकत्वाभावाद्विनिगमनाविरह २

इति वदंति ॥ तदसत् ॥ शाब्दीयाकांक्षा शब्देनैव प्रपूर्यत इति न्यायेन
तत्रापि इदं कृगवय इत्यनिज्ञापिकशब्दवत्ताया आवश्यकत्वात् शा
ब्दी आकांक्षा शाब्दबोधगोचरेच्छा शब्देनैव विषयसिद्धिद्वारा निवर्त्तत
इति तदर्थात् ॥ यदि च यदा प्रमुद्गनिमात्रे इच्छा न तु शाब्दबोधे तदा श
ब्दे सनातनवकाशः तत्र शाब्दगोचरेच्छाया अभावेन तादृशन्यायस्या
नवतारात् ॥ न चातिदेशवाक्यार्थशाब्दत्वेनैवोपमितिकरणतया शा
ब्दकत्वनमापन्नपकं पदनन्यपदार्थोपस्थितेरेव शाब्दबोधे हेतुत्वा
त् ॥ शाब्दी शाब्दबोधीयपोगिनी आकांक्षा अन्यपप्रतियोग्युपस्थिति
रूपा शब्देनैव प्रपूर्यते संपाद्यत इत्यर्थात् तादृशन्यायस्याप्यवतारा
दिति वाच्यं ॥ अतिदेशवाक्यार्थशाब्दत्वेनोपमितिकरणत्वे मानाभावा
त् ॥ पदत्यस्य च निश्चितव्यभिचारकरूपं गृह्यमाणव्यभिचारकेण का
रणत्वकल्पनानुपपत्तेः ॥ न च निश्चिगलमपेसशाब्दत्वस्य नैजघुत
मातत्रिवेशावसम्पगिति वाच्यं सादृश्यप्रतानस्योपमानत्वादिमत

इत्यतिदेशवाक्यार्थस्मृतिरूपव्यापाराभावेन वातिप्रसंगे निष्प्रय
३ त्वप्रवेशे प्रयोजनाभावादिति विभाव्यते तथापि व्यवहारादिना पिश
क्तिग्रहात्तच्छाब्दबोधोदयेनेव व्यभिचारात् शाब्दप्रमाणेपि उपमानो
पजीवकत्वसंगत्यभावात्: कार्यविशेषोपजीव्यत्वस्य च शाब्दप्रमाण
इवोपमानप्रमाणेपि सत्वादविनिगमनातादवस्थ्यादिति न किं
विदेतत्॥ नव्यास्तु॥ स्वतंत्रेच्छस्य नियोगपर्यनुयोगानर्हत्वादिति
न्याय एव विनिगमकः नतु संगतिरिति तस्यास्य ममत्वेपि नत्वति इ
त्याहुरिति दिक्॥ निरूप्यत इति॥ लक्षणस्वरूपप्रामाण्यादिप्रकार
कवर्त्तमाननिरूपणविषयः शाब्द इत्यर्थः॥ तत्र शाब्दे निरूपणी
ये॥ शाब्देति॥ अत्र शाब्दप्रमितिकरणत्वं लक्षणं प्रमाणपदवा
च्यत्वलक्ष्यतावच्छेदकं॥ प्रमितिकरणत्वमात्रं प्रत्यक्षादावतिप्र
सक्तमतः शाब्देति॥ ननु शाब्दत्वं शाब्दजन्यत्वं तथा च शाब्दजन्य ३
प्रमाकरणत्वं लक्षणं पर्यवस्यति॥ तच्चापि पपविधया शाब्दज

प्रत्यक्षप्रमितिकरणे श्रोत्रेन्द्रिये अतिव्याप्तमत आह शाब्दत्वं चेति।
तथा च शाब्दत्वरूपजात्यवच्छिन्नप्रमितिकरणत्वं न तत्रेति नातिव्या
प्तिरिति भावः॥ केचित्तु॥ अतीतानागतशब्दानुसंधानादपि शाब्दबो
धोदयाल्लक्षणेन करणं किंतु शाब्दतानं॥ इत्थं च शाब्दजन्यप्रमाकरणत्व
स्य लक्षणत्वे असंभवः शाब्दतानजन्यप्रमाकरणत्वस्य लक्षणत्वे तु
विषयविधया शाब्दतानजन्यप्रत्यक्षप्रमाकरणे मनस्यतिव्याप्तिर
त आह शाब्दत्वेतीत्याहुः शाब्दत्वस्य प्रत्यक्षत्वाद्यव्याप्यत्वरूपत्वे गौरवा
दाह शाब्दत्वेतीत्यपि केचित्॥ ननु लक्षणलक्ष्यतावच्छेदकयोरभेद
इत्यत आह॥ जन्येति॥ केचित्तु॥ शब्दानुभवं प्रतीयमानत्वेनाभावेन
तु शाब्दानुप्रतीयमानत्व विशेषगुणानां विषयविनियोजकेऽनुमाना
नुपगमात्॥ तथा शाब्दजन्यघटादिविधेयकत्वानलमेव तद्विषयो
न तदतिरिक्तं शाब्दत्वं जातिरित्यत आह जन्यपदधीतिइत्याहुः तदस
त्॥ शाब्दलिंगावघटानुमितेरपि शाब्दजन्यघटविधेयकत्वात्तेन

४

तदुत्तरमपिन्नाहृयामीति प्रतीत्यापत्तेः न्नाहृत्वजातिस्वीकारस्याव
श्यकत्वात्॥ तदस्वीकारमादाय द्वितीयलक्षणमत्यपनेतदव्याप
कत्वाद्धत्वस्यैसुरभिमत्पाष्संगतिश्चेत्स वध्येयंजन्यपदधीजन्यत्वस्य
निवारिणी॥ अनुत्ववत्वाव्यापिकाचयानातिः प्रसक्तत्वादित्वरूपत्वे
सतिपदविषयकत्वाव्यनिवारिणीयाजातिरूपमितितत्त्वमधील
मितिलक्षणार्थः अतिव्याप्तिवारणमिति॥ तत्रेति प्रत्यक्षानुमितिस्म
तिदित्यर्थः॥ तादृशीनांजन्यपदधीजन्यत्वस्य व्यभिचारि अनुत्ववत्वाव्या
पिकानां सत्वादिति तत्पार्वं तत्कृत्यत्वाजातिव्याप्तिरिति भावः॥
स्मृतित्वस्य जातित्वं अनुत्ववसामग्रीप्रतिबंध्यतावच्छेदकत्वेन॥
ननु प्रत्यक्षादावसिद्धिव्याप्तिवारणाय जातिभूत्त्व[illegible]तित्वासांयदि
वज्ञाद्वि पितानत्वादितियदसंभवद्दति विज्ञानतेतदा अनुत्ववत्वा
व्यापकजातिभूत्त्वसतिस्त्रिवानुद्दतं तमाह नातिभूत्त्वस्य मिति ४
नातिभूत्त्वतमात्रमित्यर्थः॥ अनुत्ववत्वेति॥ अनुत्ववत्वाव्यापक

नातिभूत्त्वमात्रमित्यर्थः अनुत्ववत्वादीनामिति॥ आदिनातान
त्वगुणत्वसत्वादिपरिग्रहः तथाच तादृशजातीनां सत्वात्तज्जाति
भूत्त्वं नवक्रममितिभावः अत्र यद्यपितानत्वादिपरिग्रहः
तथाच तादृशजातीनां सत्वात्तज्जातिभूत्त्वसंनवक्रममितिभाव
ः अत्र यद्यपितानत्वादीनामित्येव वक्तुमुचितं तथापि तदव्या
पकेत्यत्र तत्तज्ञाद्धेनानुत्ववत्वपरामर्शायानुत्ववत्वादीनामित्यु
क्तं॥ तदव्यापकेति॥ अनुत्ववत्वाव्यापकेत्यर्थः अनुत्ववत्वाव्या
पकेत्यस्यव्यावृत्तिमाहजन्येति तत्पाश्चसंत्रवि॥ ताहमिति॥ जन्य
पदधीजन्यत्वव्यभिचारीत्यर्थः नन्वनुत्ववत्ववारणायानुत्ववत्वा
व्यत्वमेवोपादीयतामित्यत आह॥ आदिनामिति॥ आदिनातान
त्वपरिग्रहः अनुत्ववत्वाव्यापकत्वेनानुत्ववनिष्ठभेदप्रतियोगि
तावच्छेदकत्वं तेनानुत्ववत्वादिमुदासः नन्वनुत्ववत्वव्याप्यत्वमे

५ यत्किंचिन्नोक्तत्वमतं व्यापकत्वघटितत्वेनेति चेन्न॥ व्यापकसामानाधिक
रण्यादिरूपव्याप्तिनिवेशे गौरवात्॥ एवमनुभवत्वस्यापि स्वव्या
प्यत्वानुघानणमन्नेद् घटितव्याप्यत्वस्यावश्यंवाच्यतया अति
गौरवाच्चैवं॥ मन्मते अदृष्टानुभवनिष्ठजन्यताप्रतियोगितावच्छेदक
त्वस्यानुभवत्वेक्षमत्वेनापयत्सभावात् स्मृतौ अतिव्याप्तिवारणा
यचरमधीपदस्यानुभवपरत्वं विमानि वहाङ्क्षे तिपदजन्यत्वम
निवारिअनुभवत्वाव्यापकजातिमत्त्वमित्यिकृते तत्संभवः ताम
मानपदस्यकरणतासंभवेन शाब्दत्वस्यापि पदजन्यत्वमनिवा
रितादृतः पदःधीतिइत्थंचजन्यपदव्यापतिमाह॥ पदधीति॥ न
न्वनुमितित्वस्यापितादृशस्यापि सत्वात्तथमतिव्याप्तिः इत आह॥
अनुमितित्वस्येति॥ जगवदिति॥ अनुमितित्वस्येश्वरीयपदधीजन्य
त्वव्यापकं प्यत्वेनात्मत्वादिनातिरिवतपात्वप्लत्वंवानुमितसादृवपी ५

स्तिव्याप्तिः जन्यपदोपदानेनानुमितित्वस्यापि तथात्वेन तत्त्वमत्वं
भावान्नच्चतिरितिभावः अतः अतिव्याप्त्यादितः समुपदिति मिति॥
जन्यपदधीजन्यत्वअनिवारिअनुभवत्वाव्यापकजातिमत्त्वमिस
र्थः अन्नत्वजन्यत्वअनिवारितिजन्यधीत्वअनिवारीतिधीजन्यत्वं
अनिवारितिजन्यधीजन्यत्वअनिवारितिजन्मजन्यत्वअनिवारीति
वानोक्तं अनुमितित्वस्यजनत्वजन्यव्याप्तितानजन्यत्वजन्यजन्यत
व्याप्यत्वात्तद्अनिवारितातिमत्त्वस्यानुमितावपि सत्वादति
व्याप्तेः जन्यपदधीत्वअनिवारिजातिमत्त्वमात्रोक्तौ शाब्दत्वस्या
पितथात्वेनाम्नवापत्तिरिति विशिष्टमुपादेयमेव॥ ननु जन्यपद
धीजन्यत्वअनिवारिचनुभवत्वाव्यापकजातिमत्त्वमेवलक्षण
मस्तु कृतं विशेष्यदलेनेत्यत आह॥ उपमितावति॥ उपमितेः पद
विषयकातिदेशवाक्यार्थज्ञानजन्यत्वनियमेन जन्यपदधीजन्यत

व्यभिचारिप्रत्यक्षत्वादिनातिप्रसक्तत्वादिति भावः शक्यतां तं पदविषय
कत्वाव्यभिचारिनातिप्रसक्तत्वमित्यर्थः पदविषयकशाब्दबोधे पद॥
स्यापिज्ञानात्पदविषयकत्वसमानाधिकरणशाब्दत्वप्रसक्तत्वाभा
वादसंभव इति समानाधिकरणेति विहाय व्यभिचारितेन तु सर्व
त्र शाब्दबोधे पदस्याभावे बाधकाभावात् शाब्दस्यापि पदविषय
कत्वाव्यभिचारित्वमेवेति चेन्न॥ शक्तापदज्ञानपदार्थोपस्थितिज्ञा
त्यर्यतानादेरेव शाब्दबोधे हेतुत्वमाह कस्य सर्वज्ञाभावे मानाभा
वात्प्रत्यक्षभिन्नविषयकानुमितिसामग्रीकाले घटमानयेति शा
ब्दच्छावजात् शाब्दबोधः तत्र शाब्दविषयकशाब्दं जायतामितिच्छा
विरहविशिष्टानुमितिसामग्र्याः प्रतिबंधकत्वेन शाब्दशाब्दानुप
पत्तेः घटशाब्दच्छायाः अपि तत्रोत्तेजकत्वे तत्तदिच्छाभावकूटनि
वेशेनातिगौरवात् मिथो विशेषणविशेष्यभावे विनिगमनावि

रहेणानंतकार्यकारणभावापत्तेश्चेति शब्दविषयकशाब्दस्येवो
पहितशाब्दत्वस्य पदविषयकत्वाव्यभिचारित्वाभावेनासंभवाभा
वादिति न किंचिदेतत्॥ ज्ञानाविति॥ ज्ञासादावित्यर्थः तत्र ज्ञाप्यस
भावादिति भावः॥ मणिकृतस्तु॥ प्रयोगहेतुभूतार्थतत्त्वज्ञान
जन्यः शाब्दः प्रमाणमिति शाब्दलक्षणं॥ प्रयोगो वाक्यं तत्र हेतुभूतं
पदार्थतत्त्वज्ञानं तज्जन्यशाब्दं प्रमाणशाब्दमित्यर्थः वाक्यार्थ-
भ्रमपादायवह्निनासिंचतीत्यादौ योग्येतिव्याप्तिवारणाय तत्त्वप
दं तथापि पदार्थतत्त्वज्ञानमादायायोग्येऽतिव्याप्तिः प्रयोगहेतुभू-
तेति॥ इत्थं च अर्थपदस्य वाक्यार्थपरत्वपर्यवसानान्नानापदा
र्थतत्त्वज्ञानमादायातिव्याप्तिः तथापि॥ हेतुपदसमभिव्याहृतत्व-
तत्पदस्यरूपायत्ताविति धात्वनुसारात् इतरनैरपेक्ष्यमुसन्नतया
सजातीयनैरपेक्ष्यमात्रविवक्षिततया वक्तृप्रयोगप्रतिपाद्यतानंप्र

योगित्वज्ञप्रयोगप्रतिपाद्यतानांतरं नापेक्षते तादृशापत्तित्वत्ता
तत्तन्मत्वं तल्लब्धं न हि वाक्यार्थतानवतूपदार्थतानमपि त्वर्थताना
नपेक्षत् तत्प्रयोगहेतुवाक्यार्थतानस्येवापेक्षणादिति अत्र च प्र
योगो वाक्यं तथा च तत्कालीनतत्पुरुषीयस्वजन्यतानं विषयवि
षयकं पतत्प्रमात्मकं तानं प्रकृतवाक्येन जननीये तस्मिन् जनन॰
नीयेत्तु वै तादृशाप्रयोगप्रतिपाद्यतानांतरं तत्कालीनतत्पुरुषी
यस्वजन्यतानविषयविषयकं तानांतरं नापेक्षते तादृशार्थत
त्तत्तानजन्यत्वमिथः व्याप्यतानेन वाक्येन जननीयेस्य पूर्वव
त्तिपदार्थतानस्यापेक्षणात् असंभवः अन्यथा तस्या हेतुतापत्ते
रिति स्वोत्तरोत्पन्नत्वमपि स्वजन्यतानविषयविषयकतानांत
रविशेषणीयं॥ तथा च तत्कालीनतत्पुरुषीयस्वजन्यविष
तानविषयविषयकं पतत्प्रमात्मकं तानं स्वस्मिन् जननीये तत्

कालीनतत्पुरुषीयस्वोत्तरोत्पन्नस्वजन्यविषयविषयकतानां
तरनापेक्षं नतादृशप्रकृतवाक्यार्थतत्त्वतानजन्यशाब्दत्वं तत्का
लीनतत्पुरुषीयप्रमाणशाब्दत्वमिति फलितं॥ अत्र स्वोत्तरोत्पन्ने
त्यत्र स्वपदं अर्थतानतत्परं स्वपदांतराणि विषयविषयप्र॰
कृतवाक्यपराणि पदार्थतत्त्वतानेन च वाक्येन जननीये स्वोत्तरो
त्पन्नप्रकृतवाक्यजन्यशाब्दतान विषयविषयकस्य वाक्यार्थता
नस्यापेक्षणात् न पदार्थतत्त्वतानमादाय योग्यताव्याप्तिरिति
·संस्काराद्यावत्तिव्याप्तेर्जन्यत्वेन शाब्दपदं प्रमाणमात्रस्य जन्यत्वे
प्रत्यक्षादावव्याप्तेर्जन्यत्वेपि शाब्दपदमनुपजननीयमिति॥ ननु त
त्कालीमतत्पुरुषीयस्वजन्यतानविषयविषयकं पतत्प्रमात्म
कंतानं स्वस्मिन् जननीये तत्कालीनतत्पुरुषीयस्वजन्यतान
विषयविषयकप्रमांतरं नापेक्षते तादृशप्रमाजन्यशाब्दत्वं तत्॰

त. प्र.
६

त्कालीनतत्पुरुषीयप्रमाणान्तराबाधितत्वमिति फलितं प्रमात्वं च यथा॥
वत्‌भ्रमभिन्नत्वं नातः आशितप्रमादापातिप्रसंगः इत्थं च॥
वह्निनासिंचतीत्यादौ पदार्थतत्त्वज्ञानस्य स्वसमानजातीयवाक्या
र्थज्ञानान्तरापेक्षितत्वात्तदादायातीयाप्ताप्तवेपि कं गमिघा
ते वाक्यरूपेण साधनताप्रमामादापातिप्रसंगः वह्निकर्मकसेका
नुकूलकृतिमानिति प्रकृतवाक्यजन्यज्ञानविषयकरणताघ
टकाभावादिविषयकत्वेन इष्टसाधनताताहस्यापि प्रकृतजे
न्यवाक्यजन्यज्ञानविषयविषयकार्थतत्त्वज्ञानत्वात्तेन वाक्ये
जनयितयेस्वजातीयज्ञानान्तरानपेक्षणात् इति एवाशङ्क्यो
द्रव्यमिति वाक्यस्यापि तादृशवाक्यजन्यज्ञानविषयतया ता
दृशवाक्यजन्यज्ञानविषयविषयकवाक्यरूपेण साधनता
प्रमादापत्तेर्द्रव्यमितस्य योग्यवाक्ये तिव्याप्तिः अपि च पय॥

करणकसेकानुकूलकृतिमान् गुणश्च द्रव्यमित्यां शिके भ्रमात्मक
समूहालंबनजन्येपि पयसा सिंचतीत्यादिवाक्ये व्याप्तिः तादृशवाक्या
र्थज्ञानस्य भ्रमभिन्नत्वाभावात् ईश्वरीयवाक्यार्थज्ञानस्य स्वसमा
नजातीयास्मदीयवाक्यार्थज्ञानापेक्षितत्वमात्रादायलक्षणगम
नात् अन्यथा तदीयपदार्थतत्त्वज्ञानमादायायोगेपि तिप्रसक्तेर्दु
वरित्वादिति चेन्न एवम्॥ यादृशार्थतत्त्वज्ञानं स्वसमानजातीय
ज्ञानान्तरानपेक्षं सत् प्रयोगहेतुस्तज्जन्यत्वमिति तु लक्षणार्थः किं
तु प्रयोगहेतुभूतं पदार्थतत्त्वज्ञानं प्रकृतवाक्यजन्यज्ञानविष
यविषयकतज्जन्यत्वं लक्षणं तत्कालीनतत्पुरुषीयस्वजन्यज्ञा
नं यद्यत्संसर्गकयद्यत्प्रकारकत्वावच्छिन्नयद्यद्विशेष्यताकं
तत्संसर्गकतत्प्रकारकतत्तद्विशेष्यपर्यवसितार्थः वह्निनासिं
चतीत्यादौ वह्निकरणकसेकानुकूलकृतिमानितिशाब्दबोधे

न.प्र. येन तद्विषयविषयकत्वानभ्युपगमात्तत्रातिव्याप्तिः एवं शाब्दोऽव्य
९ मितादाघपित्रमात्मकसमूहालंबनजन्ये पयसा सिंचतीत्यादौ तु द्वि
तीयप्रमामादाय लक्षणसंगतिरेवमन्यत्रानुकोच्चारितवाक्ये मौनि
श्लोकादावपीति॥ अथ यत्र वह्निना सिंचति पयसा सिंचतीत्यादिवाक्या
भ्यां वह्निकरणकसेकानुकूलकृतिमान् पयःकरणकसेकानुकूलकृ
तिमानिति समूहालंबनशाब्दबोधः तत्र पयसा सिंचतीति वाक्यस्याप्र
तद्वाक्यजन्यज्ञानप्रद्विशेष्यताकं तत्तद्विशेष्यताकभ्रमभिन्नतानाप्र
सिद्धिरिति चेन्न मैवं यद्यत्तद्विशेष्यताकत्वांशे स्वजन्यतातत्तद्विशेष्य
ताकत्वांशेऽभ्रमभिन्नत्वस्यापि विवक्षितत्वादित्याकूतः॥ इदं चानुबोधवि
धापूर्वकतावाक्यत्वावच्छिन्नप्रतिवाक्यार्थज्ञानं हेतुरिति समुदाय
मतेन॥ वस्तुतस्तु॥ कृबोधविषया अन्यथासिद्धत्वापातस्य करणता
संभवेन तदुपेक्ष्य शाब्दप्रमितिकरणं शाब्द इति फलघटितमेव लक्ष ९

णमत्र कृतमिति बोध्यम् प्रत्यक्षादिकमात्मनाभ्युपेमानास्यायेति
शाब्दस्याप्रमाणत्वं साधयति॥ सोऽयं शाब्द इति॥ शाब्दप्रमितिकरणं
शाब्द इत्यर्थः सकलेति शाब्दस्यैवोपमीनस्यानवविषय इत्यर्थः दुरप
कव इति॥ तादृशप्रत्यक्षस्यान्यविषयकत्वबाधात्तद्विषयकत्व
पर्यवसानेन शाब्दसिद्धिः प्रतीतिस्तु साधकत्वे पदार्थमात्रोल्लेखेद इ
तिभावः ननु भवतु शाब्द एव नास्तीति क्रमः किंतु नस्यातिरिक्तं शाब्द
प्रमितिकरणत्वमेव नास्तीत्यत आह॥ तज्जनकत्वमप्रति॥ तस्य शाब्द
स्य जनकत्वमपि शाब्दप्रमितिकरणत्वमपीत्यर्थः॥ वस्तुत
स्तु॥ सोऽयं शाब्द इति पाठः शाब्दप्रमितीति सिद्धः शाब्दबोध इत्यर्थः
तज्जनकत्वमपि शाब्दे तादृशशाब्दप्रमितिकरणत्वमपीत्यर्थः तथा
चैंदुरपकर्वं॥ तत्र हेतुमाह॥ आगि पात्रेति॥ प्रतीतेरिति वाक्यादनु
मर्थं प्रत्येमीतितानस्यात्प्रत्यक्षादिविषयकत्वासंभवेन प्रत्यक्षाद्य
तिरिक्तप्रमितिस्वीकारः शाब्दस्य तत्करणत्वस्वीकारश्च आवश्यक इ

तिभावः॥ नन्वस्तु शब्दस्य प्रमाणत्वं आप्तोक्तज्ञानत्वस्य तज्जन्यज्ञानस्य प्रत्यक्षाद्य
तिरिक्तत्वं तथाप्यनुमितावन्तर्भावं तज्जन्यज्ञानस्यास्तु॥ अतोऽस्य
पृथक्शब्दनिरूपणमसंगतमाह॥ केवलमिति॥ अनुमानवि
धयाऽनुमानत्वेनाभ्युपायेति शब्दविधयापीत्यर्थः न तु तस्य प्रत्य
क्षातिरिक्तप्रमितिजनकत्वमेव नास्तीति विवाद इति भावः निरुक्ति
परां तदिति। विप्रतिपत्तिश्च॥ शब्दः अनुमितितासमानाधिकरण
प्रमितिविभाजकोपाध्यवच्छिन्नजन्यतानिरूपितप्रमाणविभाज
कोपाधिनियतधर्मावच्छिन्नजनकताश्रयो न वेत्याकारिका॥ अत्र
विधिकोटिर्नैयायिकानां निषेधकोटिर्वैशेषिकाणां विधिकोटिप्र
सिद्धिः प्रत्यक्षप्रमाणोद्विपस्येव प्रत्यक्षप्रमाणतयोः प्रत्यक्षं प्रतीद्वि
पत्ते नहेतुत्वे न तादृशजनकताश्रयत्वात् निषेधकोटिप्रसिद्धि
श्च घटादावेव सुलभा॥ अत्र सिद्धसाधनवारणाय अनुमितित्वा
समानाधिकरणप्रमितिविभाजकोपाध्यवच्छिन्नत्वनिवेशः प्रम १०

त्वे विषयस्य हेतुतया शब्दस्यापि साक्षात्कारत्वावच्छिन्नजन्यतानिरू
पितजनकताशालित्वं प्रमाणविभाजकोपाधिनियतधर्माव
च्छिन्नत्वनिवेशः अनुमितिभिन्नशाब्दविषयकप्रमितिकरणं न
वेति॥ प्रत्यक्षानुमित्यन्यतरत्वव्याप्यानुभवनिष्ठजन्यतासामा
न्यको न वेत्याकारिका वा॥ प्रथमेति॥ अनुमितिभिन्नशाब्दविषय
कप्रमितिकरणमित्यर्थः अतो न सिद्धसिद्धिर्बाधातः न त्वनु
मानमिति न तु प्रत्यक्षानुमित्यन्यतरत्वव्याप्यानुभवनिष्ठजन्य
तासामान्यकं॥ अतो न शब्दलिंगकानुमानसाध्यबाधः न त्विदं घ
टानयनादिरूपार्थवत्त्वात् वाक्यत्वादित्यनुमानं स्यादित्यत आह॥ शब्द इ
ति॥ अप्रामाण्यत्वात् स्वजन्यप्रमितिविषयनिरूपितआसत्त्यादिसत्य
! अप्रामाण्यमेव दर्शयति॥ वहीति॥ तद्वृत्तित्वात् आकाशावृत्तित्वान्त
था च नपदार्थत्वनिवारितसामानाधिकरण्यरूपाव्याप्तिः॥ शब्दे सं
त्वलिसाध्यहेत्वोर्वैयधिकरण्यादिति भावः ननु घटमानयेत्यादिपदा

निनालयविसैषपसगटितयदार्थसंसर्गहितानयुर्धकां ि॥आकांक्षायोग्यतास
न्नि धिमत्त्वदकर्ढवकतादित्त्वविधयधिकरणाजावःनवरजततानयंमि
तिवानयमितितानात्॥ तिरस्मप्रव्रत्नापत्तिवारणाययरोवर्ति विशेष्य्८
केएतावक्षेदकप्रङ्गारकतानसैवप्रवर्तकतयाननतत्त्वसिद्धिरितिवाच्यं॥
लाघवतत्प्रव्रनिविषयइएतावक्षेदकवैशिष्ट्यावगाहितामतलैनेवप्रव
नकतयालाधवखतानपदस्मप्रमापदलेनप्रपालघटकतयामकतेन
साध्यछ्लावत्वतादमितिव्यमिलावक्षेदकप्रकारलत्वनिपमेनस्मादित
पदार्थलिनैवरजता दिति ओतन्नेतु रजततलादिनाप्रपेपलादिना॥लाद
गरानात सप्रवर्तकलवारणायइंरजतत्वादिप्रकारकतानसैवप्रव
र्तकलादितिवाच्यं॥पूर्वरजततादिनारजतादे रुपस्थितलादितत्वाध
वजातेनरूपेणानुमितीनावसंप्रवात्॥अतएवसकर्क्तत्वानुमानेत्व
घवीपनातपेकत्वादिकंगासतेजाघवतानैतरवाधातिरिक्तछजाए
वबाधकतावक्षेदकरुपेणानावत्त्वानुपगमात्॥यद्दाएतेपदार्थाना

त्र र्थविवयमिथ्;संसगविंतः आकांक्षायोग्यतासन्निधिमत्वंद्लां
दितलादितितनुमानेनविशिष्टरतत्तलादिः पक्ततावक्षेदकतयामि
द्धिःनवनवीनजनसंसगयिरतमोक्षादितिअहोविमतंजलंनघाःकक्षे
दंमहिवश्वरतीतिवाक्येप्रलापकेनदीकछयपदर्थयोर्अभिलाषः ना
स्यांगन्त्रिसाध्यासलादितिवाच्यं॥नात्मयोगन्निपरस्पतन्निरूपिताकांक्षा
दितलान्नावेनैवाबाधनिवारात्॥नतुतत्पादिहेतुतावक्षेदकावक्छिन्नहे
तुमत्तानिश्चयत्वैवानुमितिहेतुतापत्रयोस्तत्संशयलावयोग्य
तागन्निहेतुमत्तानिश्चयाजावाहन्तयाबीधप्रसंगःनत्वयोग्यतासंशय
यस्यवाधसंशयपर्यवसन्नतयासाध्यसंदेहेसत्वानुमितसनुगुणए
तंयापन्नतापटकसंशयापातिरिक्तसंशयापमत्तलमेवहेतुमत्ता
निश्चयत्वमितितत्वंइतिवाच्यंगोरवात्ःसाध्याप्साध्यप्रवेशा
कारकसंशयापादेनुमितायत्तेमितितन्न॥अथमानतीकीष्प्रमोवाइत
न्नहेतुनावक्षेदकसंदेहेपितेपायिकेरनुमितिरस्पुपगमात्त्वाजव्द्

ज्ञानिश्चयत्वेनैवानुमितिहेतुत्वं तस्य च योग्यतारूपहेतुविशेषणसंदे
हेपि संभवात् न काप्यनुपपत्तिरत आह॥ दूष्यते चेति॥ ननु व्याप्तिभ्रमा
देवानुमितिरस्तु न च भ्रमात्मकपरामर्शजन्यत्वादनुमितेर्भ्रमत्वाप
त्तिरिति वाच्यं विषयबाधस्यैव भ्रमत्वनियामकत्वेन दोषाभावादित
त आह दूष्यते चोत्पद्येत कस्मिन् व्याप्तीति॥ यदि निष्टव्याप्तिज्ञानमूलानामि
त्यर्थः न चेति न हि स यः अयं व्याप्तिज्ञानमूलकानीनः शाब्दप्रयोज्यानु
भवः तस्मात् अनुमितिः ननु इच्छं व्याप्तिज्ञानाजन्यविलक्षणैवानुमिति
: न च तत्रानुमितित्वसत्त्वे मानाभावः समानविषये शाब्दसामग्र्या बल
वत्त्वादनुमितिप्रतिशाब्दसामग्र्याः प्रतिबंधकत्वकल्पने गौरवं म
न्मते शाब्दस्थलानुमितिस्वीकारेण तत्र तत्प्रतिबंधकत्वात्॥ ए
वं भिन्नविषयेनुमितिसामग्र्याः शाब्दसामग्र्याश्च प्रतिबंधक
ताद्वयकल्पने गौरवात्॥ मन्मते अनुमितिसामग्र्याः प्रतिबंध
कतयैवोपपत्तेरत आह॥ प्रतिपत्तिकांचेति॥ अननुमितम

न च व्याप्तिज्ञानाघटितसामग्रीजन्यानुमितित्वाभाव एव तद्विषय
य इति वाच्यं व्याप्त्याघप्रतिसंधानेपि तस्या अनुभवसिद्धत्वात् असा
क्षात्कृतमितिपद्यपिनोपमितिनित्यपि व्यक्तुमुचितं तथापि उप
मितेः शक्तिमात्रविषयाघटादिविषयकत्वानस्य ततोऽसंभवम
तन्निरूपकरणस्य नैष्प्रयोजनकत्वात् नोपमितिरिति शेषमित्यपि
कश्चित्॥ तथाच शाब्दतानजन्यतानेनुमितित्वाघटावेन वि
लक्षणप्रयित्वं तरस्वीकारस्यावश्यकतया तत्करणस्य प्रमाणां
तरत्वं आवश्यकमिति भावः श्रूनमिति॥ नैयायिकशाब्दजन्यशाब्द
बोधविषयत्वर्थः श्रूधातोर्नानार्थत्वेन शाब्दत्वविशिष्टशाकृत्वा
त् अत एव आत्मा वारे द्रष्टव्यः श्रोतव्यो मंतव्य इत्यादिश्रुतिरप्यु
पपद्यते इदं घटकर्मकानयनादि नैयायिकैः इति वैशेषिकस्य
शाब्दोच्चारयितृत्वेपि तस्य लिंगविधैव तद्बोधकत्वान्नैयायिकैस्य
इत्युक्तं॥ नैयायिकानां शाब्दैकस्यैवोच्चारणात् शाब्दतात्पर्यतानसं

त्ववात् शाब्दबोधकं एवं श्रोतुरितिचावः न रत्नीमांकं यकास्तु॥ लौकि
कवाक्यस्थले शाब्दबोधात्पूर्वं प्रकृतवाक्यार्थगोचरयथार्थज्ञानव
दुक्तत्वरूपाप्तोक्तत्वानुमितिसामग्रीसत्त्वं न आप्तोक्तत्वानुमितिसं-
त्ववात् वाक्यार्थज्ञानस्यावश्यकत्वात् तदुत्तरं च वेदस्थले क्तसौपत्शा
ब्दसामग्रीतः शाब्दोपत्तेः लौकिकः शब्दः नुवादकः अनुवादकत्वस्य
गृहीतग्राहमनुभवमात्रजनकत्वरूपत्वात् २ सहाशाब्दबोधपेवी
चारेण तत्स्वसमानाधिकरणस्वान्यवहितपूर्ववृत्तिस्वसमाना
कारनिश्चयविषयविषयकतद्विशेष्यकतत्प्रकारकानुभव-
मात्रजनकत्वरूपत्वादिति यावत् तत्स्वपदमनुभवपरं वेदस्यपौ
रुषेयत्वेनाप्तोक्तत्वानुमानासंभवात् अनुवादकत्वाभावएव॥
अनधिगतार्थानुभवकरणं त्वस्यैव प्रामाण्यरूपत्वात् तदगृ
हीतग्राहितरानुभवकरणत्वं स्वसमानाधिकरणस्वाव्यवहितो १३
त्तरपूर्ववृत्तिस्वसमानाकारनिश्चयविषयविषयकत्वतरतद्विशे

ष्यकतत्प्रकारकानुभवकरणत्वमिति यावत्॥ स्वसमानाकारत्वं
च स्वस्मिन् यादृशतद्विशेष्यकत्वावच्छिन्नतत्प्रकारकतादृश
तद्विशेष्यकत्वावच्छिन्नतत्प्रकारताशालित्वमित्यनु इदं तदस
त॥ व्याप्तिस्मृतिविलंबेनाप्तोक्तत्वानुमितिसामग्र्या विना प्रथ
मतएव शाब्दबोधोनुवादकत्वेऽप्रमाणत्वात्॥ ननु लौकिकवाक्ये इद
माप्तोक्तं न वेति संशये शाब्दबोधोनुदयात् संशयव्यतिरेकनिश्चयोयत्र
प्रतिबंधकोतन्निश्चयस्तत्रहेतुरनुमितौ व्याप्तिरेवेति नियमेनाप्तो
क्तत्वनिश्चयस्यहेतुत्वाच्छाब्दबोधपूर्वं तस्यावश्यकत्वेतिचेन्न॥ तत्कार्य
तावच्छेदकं हि शाब्दत्वा लौकिकवाक्यजन्यशाब्दत्वं वा लौकिकत्वेन ज्ञात
वाक्यजन्यशाब्दत्वं वा नाद्यः॥ वेदेतदभावात्॥ न द्वितीयः॥ आप्तोक्तत्वनि
श्चयं विवेदानुकारेण गद्यमानमन्वादिवाक्यैः पौरुषेयत्वनिमानिनो
गुरुमीमांसकस्य शाब्दोदयेन व्यभिचाराद्योन्नापि तृतीयः लौकिकत्वे
न ज्ञातान लौकिकवाक्यस्थले क्तशाब्दसामान्यसामग्रीतराव लौकिकत्वे

नवाक्यादपिज्ञानोत्पत्तिसंभवेतस्याकारणत्वात्॥नचयत्संज्ञायेत्यादिनि
यमननहेतुमितिवाच्यंतत्संशयेपिवाक्यार्थज्ञानोत्पत्त्यातत्संशयस्याप्र
तिबंधकत्वात्॥अव्यभिचारसंशयव्यतिरेकनिश्चयप्रतिबध्येव्याप्ति
ज्ञानेव्यभिचारेणप्रयोजकत्वेनचतादृशनियमानपायाच्च॥एतेनज्ञा
तृसामान्येआप्तोक्तत्वशंकाविरहोहेतुःसचलौकिकेआप्तोक्तत्वानुमाने
नात्वेदेपौरुषेयत्वानुमानात्॥नचापौरुषेयत्वानिश्चयदशायांवे
दस्यानुभावकत्वेदोषवत्पुरुषाप्रणीतपरस्मादितरत्वरूपहेतुत्वा
नस्वत्वेनपदार्थसंसिद्धिसंभवात्वेदस्याप्यनुवादकतापत्तिरितिवा
च्यं॥व्याप्तिस्मृतिविलंबेनतद्विलंबादितिपरास्तं॥अनाप्तोक्तत्वसं
शयस्याप्रतिबंधकत्वात्योग्यतासंशयवदितिदिक्॥प्राभाकरास्तु
क्वचिज्ज्ञानबोधभ्रमःक्वचिद्भ्रमइतिनियमनिर्वाहायज्ञातृप्रमात्वा
वच्छिन्नंप्रतिकिंचित्कारणमुपेयम्॥तच्चनयोग्यताअन्वयप्रयोजक
रूपवत्वरूपयोग्यतायाःकरकाभिघातप्रयुक्तपयसासिंचतीत्यो १४

ग्यवाक्येसत्त्वात्॥अथदोषाभावएवतथास्तु॥दोषाश्चभ्रमप्रमा
दविप्रलिप्साकरणापाटवरूपाः।वस्तुनिष्ठाःभ्रमश्चतच्चारणीयवा
क्यार्थगोचरोभ्रमःप्रमादोनवधानतासाच्चवाक्यार्थज्ञानस्वरूपयो
ग्यस्ययत्उच्चारणीयवाक्यार्थनिश्चयव्यतिरेकःस्वकीयवाक्यार्थ
निश्चयव्यतिरेकतारणायच्छंतन्निवेशःअन्यथाप्रतीतसान्य
थाप्रतिपादिविषाप्रतारणासैवचविप्रलिप्सा॥इच्छाविषयीभूत
वर्णानुकूलकंठताल्वाद्यभिघातानुत्पादकाजीनपरवर्णानुकू
लकंठताल्वादिअभिघातःकरणापाटवंकरणंकंठताल्वाद्यभिघा
तःतस्यापाटवंअसामर्थ्यंइच्छाविषयीभूतवर्णानुकूलमितियावत्इ
तिचेन्नभ्रान्तप्रतारकवाक्येसंवादेनप्रमाणेप्रतारणरूपदोषसत्वेन
व्यभिचारात्॥अन्यथाप्रतीतस्याविद्यमानार्थस्यप्रतिपादयिषाया
एवाप्रतारणत्वेनोक्तदोषोद्धारेपिसर्वसाधारणदोषत्वस्येमानाभे
ननदनाचस्यप्रत्येकंकारणत्वेभ्रमत्वेपिअन्यदोषाभावसत्वात्स

मापत्तिःआप्तवक्तृत्वस्यकारणत्वेगौरवात्विसंवादिशुकवाक्यादपि
प्रमापत्तेश्च॥तस्माद्यथार्थतात्पर्यकत्वमेवंलौकिकवेदसाधारणप्रा-
माप्रयोजकं॥यथार्थतात्पर्यकत्वंयथार्थवाक्यार्थप्रतीतीच्छयोच्चा
रितत्वम्एकपदार्थवदपरपदार्थप्रतीतीच्छयोच्चरितत्वमितिया
वत्।उच्चरितत्वंचानुसंधीयमानत्वंतेनत्वन्मतेवर्णानांनित्यैक
रूपत्वेपिनासंभवःनचामौनिश्लोकादावव्याप्तिःवेदितपूर्वार्थकि
आपकेच्छामादायसंगतेःमूर्खपठ्यमानवेदेस्तुपंडितपठ्यमान
वेदादभिन्नएववेदस्यनित्यत्वात्नित्यानुमितिवेदेनुतदर्थताप
कत्वेनज्ञानमन्येवसामग्रीतिनव्यभिचारःशुकवाक्येपिशिक्षक
वाक्यमादायोपपत्तेःवर्णानांमन्मतेनित्यैकरूपत्वात्॥नचैवंव
न्नासंपन्नशुकवालादिवाक्येगत्यभावइतिनप्रमितत्वंतस्याप्र
माणत्वात्व्यवहारस्तुप्रत्यक्षादसंसर्गाग्रहादेति॥केचित्तुशुक-
वालादिभिन्नलौकिकवाक्येयथार्थप्रतीतीच्छयोच्चरितत्वंवेदेवेदत्वा

दिति॥शुकवालादिवाक्येअबाधितार्थकत्वंनानैवन्नाद्यप्रमाप्रयोज
कएकत्राक्तिमत्वेनवर्तेषाकारणत्वमितिनाननुगमःनवसर्वत्राबा
धितार्थकत्वमेवप्रयोजकमस्त्वितिवाच्यंयत्रान्यघटान्तिप्रायेणगे
हेघटोस्तीत्युक्तेघटान्तरंदृष्टवानमन्यतितत्रान्यपरत्वेतुप्रमाणे
पिप्रामाण्यापत्तेनतुरूपत्यरःशाब्दःशाब्दापादितरतीत्याहुरती
तिदिक्॥तच्चताततमुपयुज्यतेतापमानकरणतानोपयोगित्वे
पिव्यभिचारिवैलक्षण्यत्वात्माप्तिवच्छेदशक्तिवद्धेतितज्ज्ञानं
हेतुशाब्दबोधनिरूपिततानानिष्टकारणत्वतायांविषमसंबंधे
नावच्छेदकंशाब्दबोधनिरूपिततानावच्छिन्नकारणताश्रयस्य
शाब्दस्यशाब्दत्वानेजननीयेउपयोगित्वेसतिसहकारित्वेव्यभिचा
रिवैलक्षण्यत्वादितिदृष्टी॥सामान्यमुखीनव्याप्तिःयत्यत्ता
ननिरूपिततानावच्छिन्नकारणताश्रयस्यतत्तानेजननीयेन
हकारित्वेसतिव्यभिचारिवैलक्षण्यएचवतितत्तत्तानिरूपित

ज्ञाननिष्ठकारणतायां विषयतासंबंधेनावच्छेदकं त्ववतिर्यथा व्या
प्तिः शब्दशक्तिश्चेति अत्र च मोवयवेंद्रियसन्निकर्षव्यभिचारवार
णाय ज्ञायमानकरणमिति शाब्दबोधं प्रति ज्ञायमानकरणस्य शब्द
स्य स्वप्रत्यक्षेजननीयेऽप्रयोगित्वमिति शब्दनिष्ठश्रोत्रसमवाये
व्यभिचार इति तन्नोपयोगीति॥ तथा च तज्ज्ञानं प्रतिज्ञायमानं कर
णं तज्ज्ञानेजननीयेसहकारीत्यर्थान्न दोषः न च सति गकपरामर्शे
व्यभिचारं ज्ञायमानत्वं इत्यत्र ज्ञानविशिष्टत्वपर्याप्तिसद्धिंगकपरा
मर्शस्य ज्ञायमानासहकारित्वात्॥ यस्मिन् सति पदज्ञावाद्कार्य
जावस्तस्यैव तत्सहकारित्वेन स्वविशिष्टस्यासहकारित्वात्॥ त
थाच तज्ज्ञाननिरूपितकरणतावच्छेदकज्ञानविशिष्टकरणस्य
ज्ञायमानत्वघटितधर्मावच्छिन्नकरणताकज्ञानेजननीयेसह
कारित्वमर्थः पर्यवसितः परामृश्यमानलिंगत्वेनानुमितिकर
णतया परामर्शविशिष्टकरणत्वेन परामर्शाभावासत्त्वात्

मव्यभिचारः हृदीवह्निमान् रूदत्वादित्यादौ परामृश्यमानलिंगत्वे
पिव्याप्त्यभावेन प्रमानुमितित्वाभावात्॥ व्याप्तिवत् इति दृष्टांतसंसँ
गतिः व्याप्तिपक्षधर्मतावत् लिंगत्वेन प्रमानुमितिकरणत्वात्॥
ज्ञायमानशब्दस्य त्वे शब्दसमवायाभावासत्त्वेन एतादृशसह
कारित्वस्य च शब्दसमवायेनावेपि आघ्राणेधूमत्वसामान्यल
क्षणाजन्यपरामर्शविशिष्टधूमसत्त्वेपि धूमनिष्ठरूपाभावेनधू
मनिष्ठरूपाभावेन धूमचाक्षुषानुदयात् परामृश्यमाणधूमस्य
प्रत्यक्षेजननीयेसहकारित्वेन तेधूमनिष्ठरूपादौ व्यभिचारवार
णाय तन्नोपयोगीत्वं ज्ञायमानत्वघटितधर्मावच्छिन्नकारणता
कज्ञानपरस्य ज्ञानपरस्य निवेशः अत्रेदं चिंत्यं परामृश्यमाणलिं
गत्वेपि सद्धिंगकपरामर्शाभावसत्त्वात् कथं सद्लिंगकपराम
र्शव्यभिचारनिरासः न च यज्ज्ञानं प्रत्युपयोगि तज्ज्ञानकरणताव
च्छेदकज्ञानविशिष्टकरणसहकारित्वं विवक्षितं तस्य परामृश्यमा॰

णलिंगत्वेन प्रमानुमितिहेतुत्वेन सल्लिंगपरामर्शस्य प्रमानुमितिंप्र
त्येवोपयोगितया प्रमानुमितिकरणतावच्छेदकः सत्परामर्शवि
शिष्टलिंगसत्वेपि सत्परामर्शाभावासंभवइतिवाच्यं॥ तथा व्याप्ति
वदितिदृष्टांतासंगतेः व्याप्तिपक्षधर्मतावल्लिंगत्वेन प्रमानु-
मितिंप्रत्येवोपयोगितया सत्परामर्शविशिष्टलिंगसत्वे व्याप्त्य
भावासंभवेन तादृशसहकारित्वस्याभावात् आत्ममनोयोग
बाधादिवारणपदस्य निवारितैवलक्षणफलादिति॥ तच्च प्रमित्यज
नकव्यावृत्तत्वं प्रमित्यजनकताजनकसामग्र्यभावाविष्टत्व
मितियावत्तत्वसंबंधिभ्रमाभावेन प्रमित्यजनिकातानज
निकासामग्र्येवाप्रसिद्धा प्रमितिपदेन भ्रमभिन्नत्वविवक्षणे
च तन्मते भ्रमाप्रसिद्ध्याप्रसिद्धिरिति वाच्यं स्ववाधिकरणप्र
कारतावच्छिन्नविशेष्यताशून्यानुभवत्वस्य प्रमितिपदेन विव
क्षणात् तादृशीच स्मृतिसामग्र्येवप्रसिद्धा॥ अथानुभवस्य स्मृति

करणत्वया सल्लिंगकपरामर्शोप्यनेनैव वारणे तान विशिष्ट
करणसहकारित्वे सत्वतान विशिष्टे सम्यवैयर्थ्यमितिचेन्न क
रणातिरिक्तत्वतान मितिजनकनाश्रयकारणकलापस्यैवता
नजनकसामग्रीपदेन विवक्षितत्वात्॥ अन्यथात्मककूटलिं
गलिंगकानुमितिस्थानान्निषिक्तध्वंसोस्मृतिमादायस्मृतिसाम
ग्र्यविशिष्टस्यत्वव्याप्तावप्यसत्वेन दृष्टांतासिद्ध्यापत्तेः असं
ङ्गाववघटकत्वाच्चासिद्धिवारकत्वे निकरणातिरिक्तत्वस्य न वैय
र्थ्यं वस्तुमात्रस्यैव स्वात्मककूटलिंगत्वानुमितिस्थानान्निर्वि
क्तसाध्यस्मृतिजनकतयाप्रसिद्धिवारकत्वाच्चजनकताकरण
तोन्यसाधारणजनकत्वस्यैकस्याभावाद्विशिष्यैव निवेशे कर
णतात्मकजनकतान्यत्वे प्रवेशः न तु करणतातिरिक्तजनकतात्वे
न प्रवेश इति व्यर्थत्वशंकानवकाशत्वाच्च इद्बोधकव्यावृत्तास्मृ
तिजनकतानिवेशनीयानातः उद्बोधकतयाजनकतामादाया-

सिद्धिः प्रागभावस्य तद्व्याप्तित्वेनाहेतुत्वाच्च न प्रमानुमितिप्रतीतेणना
वेव्यभिचार इति दिक् केचित्तु इष्टप्रवृत्तिविषयनैशिष्ट्यावगा-
हितज्ञानमेव प्रकृते प्रमितिशब्दार्थ इत्याहुः अथ वा तात्पर्यमान
करणइत्यनाधेयत्वं स प्रम्यर्थः तथा च यत्र यत्तात्पर्यमानक
रणनिष्ठत्वे सति यज्ज्ञानानां पर्याप्तित्वे सति चारिवैजन्त्यणं च व-
तित तत्तत्त्वाननिरूपितत्वाननिष्ठकारणतया विषयितासंबंधे
नावच्छेदकं च वतीति व्याख्यथः सल्लिंगकपरामर्शस्तु यत्तात्पर्यमान
करणधूमादिनिष्ठः अथात्मलिंगकानुमितितात्पर्यमानेकरणे आ
त्मनि तस्य वृत्तेस्तद्वारणमिति चेन्न तज्ज्ञानानधिकरणस्य
तात्पर्यमानकरणे निवेशात्॥ अत एव प्रागभावस्य तद्व्याप्तित्वे
न हेतुत्वेपि न प्रमानुमितिप्रागभावे व्यभिचारः धर्मनिष्ठानैवा
धिकत्वादिवारणमतानां पर्याप्तित्वे सतीति॥ वाधाभावाद्धिंदि
वारणाय व्यभिचारिवैजात्यपलादिति तदर्थतयाभासव्याह

तत्त्वं भ्रमजनकभिन्नत्वमिति यावत्॥ वस्तुमात्रस्यैव लिंगविध
याभ्रमजनकत्वात्तात्पर्यमानलिंगत्वादिरूपेण भ्रमजनकत्वं
विवक्षणीयं न च तन्मते तदप्रसिद्धिः विसंवादिप्रवृत्यादिजन
कतात्पर्यमात्रस्यैव तन्मते तथात्वात् न च वाधितत्वादितथा॥ वा
धस्य विपरीतनिश्चयस्य सद्भावे तानमात्राभावेन तज्ञावस्य-
तानमात्रप्रयोजकत्वादिति न तु तन्मते गृहीतसंसर्गाग्रहण
स्मरणात्मकज्ञानद्वयस्यैव भ्रमतया विसंवादिप्रवृत्तिजनक-
त्वेन तस्य चानिधर्मितावच्छेदकतया वाधाभावस्यैव न तत्र हेतु
त्वमिति कथमेतत्॥ अत्र केचित् विसंवादिप्रवृत्तिजनकत्वेन न
ज्ञानस्य प्रवेशः अपितु स्मृतित्वेन तथा चैस्मृतिजनकतावच्छे
दकापच्छिन्नात्मत्वादिति तदर्थः जनकतावोद्बोधकवृत्त्या वृत्ता
तेन नाप्रसिद्धिरिति॥ असंसर्गाग्रहविशिष्टज्ञानद्वयेऽस्वयम
तिरेकाभ्यां वाधस्य विरोधित्वपि व्यत एवेत्यपि केचिदिति दिक्॥

त॰प्र॰ तद्धतात्पर्यं सामान्यतः सत्पदार्थत्वेन रूपेण तन्नात्पदार्थघटि
१९ तं विशिष्यसन्नात्पदार्थघटितं च तत्र च वेदखण्डे घटपदार्थ
विशिष्टात्पदार्थविशेष्यक घटपदार्थप्रकारप्रतीतिछपो
द्धरितत्वरूपतात्पर्यतानहेतुः ननु विशिष्यलौकेतु घटविशि
ष्टकर्मता विशेष्यक घटप्रकारक प्रतीतिछपोद्धरितत्वरूपता
त्पर्यतान मेवहेतुः तत्र सामान्यतः घटपदार्थत्वादिना तात्प
र्यग्रहे पि परादेरपि जन्यत्वादिना घटपदार्थत्वसंत्त्वेन घट
विशिष्टकर्मता विशेष्यक प्रतीतिछपोद्धरितत्वं न वेति विशिष्य
संदेहे शाब्दबोधापत्तेः वेदेतु जन्यत्वादिना मा पर्यसंत्त्वेन ए
कपदार्थत्वेन तात्पर्य विशिष्यसंदेहाभावात् पपाक पिंजला
नालजन्ते स्यादौ प्रप्पयो पस्थितत्वरूपजाघवत्वर्क निर्णीत
त्रित्वविशिष्टालक पिंजलपदार्थपरं बहुवचनान्तक पिंज
लपदमिति सामान्यतः क पिंजलपदार्थत्वरूपेण तात्पर्य १९

निर्णये पि विशिष्यक पिंजलत्वादिरूपेण तात्पर्यसंशयासंत्त्वा
त् लोके तु गुरुत्व मनुषे स्पृष्टे तात्पर्यसंत्त्वेन लाघवतत्क्वितार
ण विशिष्यसंदेहसंत्त्वेन घटविशिष्टकर्मत्वविशेष्यक घट
प्रकारक प्रतीतिछपोद्धरितमिदमिति तात्पर्यानिर्णयेस्पशाब्दबो
धात् पूर्वमवश्यापेक्षितं तया लौकिक वाक्यमनुवादकं तस्मा
ल्लौकिक वाक्यं सर्वमेवानुवादकत्वादप्रमाणंपवेदेतु तदभावा
मापणमिति तद्बुः तदसत् ॥ एकपदार्थविशिष्टपरपदार्थप्रका
रक प्रतीतिछपोद्धरितत्वरूपपदार्थतात्पर्य निश्चयत्वेन हेतु
त्वेनैवपपादार्थ निवेशे गौरवात् ॥ किंतु नानार्थानुरोधेन शाब्द
सामान्ये एव परपदार्थप्रकारकत्र्प परपदार्थविशेष्यप्रतीतिछे
पोद्धरितत्वरूपतात्पर्यतान स्येव न वैवं वक्तिनास्ति वतीता
दाव पि प्रमापत्तिरिति युक्तमिति वाच्यं ॥ एकपदार्थेऽपरपदार्थ
वत्वरूपयोग्यताप्रमा या एव संशयनिश्चय साधारणरूपेण।

कारणत्वात् अपि च इदं वाक्यं प्रमादिविशिष्टतानयोरन्यतरज
न्यं वाक्यार्थतानजन्यवाक्यत्वात् ततश्च प्रमादेर्बाधे यं वक्तास्व
प्रयुक्तवाक्यार्थगोचरयथार्थतानवान्॥ प्रमाद्यजन्यवाक्या
र्थतानजन्यवाक्यप्रयोक्तृत्वादहमिवेति॥ वक्तृयथार्थतानानु
मानपूर्वक एव यथार्थवाक्यार्थप्रतीतिपरत्वनिश्चयो हेतुर्नाप्र
साम्यं नान संभवति भ्रान्तिः पुरुषधर्मत्वेन प्रमाद्यजन्यनिर्ण॥
पासंभवात् संवादिप्रवृत्तिजनकत्वादेश्च तद्ग्राहकलिंगस्य॥
शाब्दबोधोत्तरकालीनत्वादित्यास्तां विस्तरः॥ ननु शाब्दस्यानुमा
नान्तर्गतत्वेन घटमानयेति शब्दाद् घटादिपदे शक्तिपरिज्ञानोपि
शाब्दबोधोपपत्तिः मम तु तत्र व्याप्तिज्ञानाभावादेव तदसंभवात्
दृष्टान्तं कृतेन न्विति॥ स्यात् तन्मते एव शाब्दत्वेऽपामराणां॥ घटादिप
देष्वगृहीतशक्तिकानां॥ सहकारित्वादिति॥ इतरकारणचक्रसम
वहितकारणस्य च फलोपधायकत्वेन केवलज्ञाब्दसत्वेपि शा

क्तिज्ञानरूपसहकारिविरहान्न तत्र फलोपधायकत्वमिति भा
वः॥ उपोद्घातसंगत्या शक्तिं निरूपयितुं शंकते॥ अथेति इयं शा
ब्दसहकारिग्रहविषयः पदार्थान्तरमिति॥ नन्वसदर्थतावच्छे
दककूटवदित्यर्थः तेन न सिद्धसिद्धिव्याघातः संकेतग्राह्यं व
स्यमाणसंकेतग्रहजन्यविषय इत्यर्थः आवश्यकत्वात् अभि
धात्वेनेत्थं वक्तामप्यवरूपापेक्षणीयत्वात् संकेतं निरूपयति
सचेति॥ अस्मादिति॥ एतत्पदजन्यत्वप्रकारकतानिरूपितए
तदर्थबोधविशेष्यताशालीत्यर्थः ह्रस्वैवमिति॥ एक इच्छामात्र
स्यैवाभिधारूपत्वे॥ अपशब्दापीति गगर्ग्यादिशब्दा अपित्यर्थ
ः अभिधायकास्युरिति॥ तथाचनापभ्रंशितवैतन्नेच्छितवैइत्या
दिश्रुतिविरोधः शक्त्याप्रतिपादकत्वस्यापभ्रंशज्ञानपभ्रंशशा
धारणत्वात्॥ अतिरिक्तशक्तिस्वीकारेतु तत्र संकेतसत्वेपि अ
तिरिक्ताभिधायास्तत्राभावाभ्युपगमान्न तादृशश्रुतिविरोध इति

त.प्र. भावः संकेतमात्रं तादृशीच्छामात्रं अपभ्रंशविलिंगगर्गयादिशब्देष्वे सो
२८ स्मिईश्वरसंकेतोस्तिमानाभावादिति॥ शास्त्रनिष्ठात बुद्धिर्नागर्ग
र्यादिशब्दाच्छाब्दरूपफलाभावेन अपभ्रंशेन तादृशेश्वरसं
केतइत्यर्थः॥ नापभ्रंशितवै इति श्रुतिविरोधश्च बाधकोवसेयः
ननु शाब्दसामान्ये शक्तितानस्य हेतुतया पन्नापि तेशक्त्यभावे
कथं शाब्दबोध इति तटस्थः शंकते॥ कथं तर्हीति॥ शक्तिनामा
दितिभ्रमप्रमासाधारणशक्तितानहेतुत्वादितिभावः पलादि
नाशक्तितानेपिशाब्दबोधानुदयात् शक्तित्वेन तज्ज्ञानं हेतुः श
क्तित्वंच तादृशेश्वरसंकेतत्वं तप्प्राचपामराणां ईश्वराज्ञानात्
संकेतस्य ईश्वरसंकेतत्वेनाज्ञानात् कथं शाब्दबोध इत्याशंक
ते॥ कथं तर्हीति ईश्वरमविदुषामिति पामराणां मीमांसका
नां चेत्युपपन्नात्मेति तयेति संकेतत्वेनेत्यर्थः तेषामपि संके
तत्वप्रकारकताज्ञानसत्वादितिभावः चैत्रशब्दादयमर्थोबोद्ध २८

व्य इति स्वाकीनेच्छाविषयाणां चैत्रादिशब्दानामनुगतत्वापत्तिः॥
तत्रेश्वरसंकेतत्वाभावादित्याशंकते॥ आधुनिकेति॥ कागति
रिति॥ तत्रेश्वरेच्छारूपत्वाभावादितिभाव तस्यापि आधुनि
कसंकेतितत्वे चैत्रादिपदस्यापि॥ ईश्वरेति॥ द्वादशाहकालीनपि
तुश्चारितनामत्वादिनानामवाच्यः शिशुरित्याकारकेच्छपेश्वरे
ण तादृशश्रुतिप्रणयनात् तत्रापि ईश्वरसंकेतोस्तीतिभावः॥ ई
श्वरीयतानस्य इच्छायाः कृते वशक्तिरूपत्वमिति विनिगमना
विरहादतिरिक्तैव शक्तिरितिनव्याः संकेतमाह कृप्रमाणाभावे
न संकेतग्रहाभावात् कथं शक्तितानं हेतुरित्याशंकते॥ स्यादेतदि
ति॥ कथं ग्राह्यः केन प्रमाणेन ग्राह्यः शंकते उपमादिति तस्या
अतिदेशवाक्यार्थज्ञानरूपोपमानस्य वाक्यार्थज्ञानेति गोस
दृशो गवयपदवाच्य इत्यतिदेशवाक्यार्थज्ञानं तावच्छाब्दं तच्च गो
सदृश इति खंडवाक्यार्थज्ञाने सति स्यादित्यर्थः तस्य च गोसदृश

त.प्र. इति वाक्यार्थस्तानस्य॥ इतिशक्तिग्रहच्छलकत्वात्॥ गोपदं गविश
२२ क्तमिति शक्तिज्ञरमूलकत्वादित्यर्थः तथा च तच्छक्तेरप्युपयानात
णुत्वादेः तवस्थापत्तिरिति भावः व्यवहारादिति॥ प्रयोज्यप्रयोज
कवृद्धव्यवहारादित्यर्थः व्यवहारश्च घटानयनादिरूपः केन चि
त्प्रयोजकवृद्धेन॥ कश्चन प्रयोज्यवृद्धः तदर्थं प्रयोजकवृद्ध
वाक्यार्थं घटमानयेति घटानयनानुक्रियाः कूजचेष्टावान्
भवति॥ तथा क्रियया घटानयनक्रियया तस्य प्रयोज्यवृद्धस्य
प्रयत्नमिति॥ इयं क्रिया प्रयत्नपूर्विका विलक्षणक्रियात्वात्
मक्रियावदित्यनुमिनोतीत्यर्थः तानं घटानयनगोचरतानं
अयं घटानयनगोचरप्रयत्नः घटानयनतानजन्यः घटा
नयनगोचरप्रयत्नत्वात् स्वीयस्तनपानगोचरप्रयत्नव
त्॥ यद्गोचरप्रयत्नः स तज्ज्ञानजन्य इति सामान्यमुखी व्याप्ति २२
रिति न दृष्टांतसंगतिः दृष्टांतमेवाह स्वमस्ते इति स्वीयस्तन

पानगोचरप्रयत्न इत्यर्थः तेन बालेन॥ तथानिश्चयात्॥ ता
ननम्यत्वनिश्चयात् तद्वेत्ताकाङ्क्षायां घटानयनगोचरतानहेत्वा
काङ्क्षायां शब्दमेव घटमानयेति शब्दमेव आवापोद्वापाभ्यामिति
आवापोद्वापसंग्रहः उद्वापः त्यागः यथा घटमानय घटं नयेत्यादिक्र
मेण न स्थितिर्निति॥ घटपदे घटधीजनकत्वे कृते चेत्यर्थः अति
प्रसंगभंगाय घटपदं घटधीजनकमिव घटधीजनकमपि
स्यादित्यतिप्रसंगभंगायेत्यर्थः वस्तुतस्तु अतिप्रसंगभंगाय अ
गृहीतशक्तिकानामपि घटशब्दबोधातिप्रसंगभंगायेत्यर्थः॥
जननानुकूलं॥ घटधीजननाकूलं घटधीजननाकूलं। किमनु
पपन्नमिति तदर्थविषयकशाब्दत्वावच्छिन्नं प्रतितापमानतद्
रूपत्वेन कारणतान्वात्प्रसंग इति भावः नन्विकं व्यवहारेण
वशक्तिग्राहक इत्याघातं इछ वशक्तिग्रहं व्याकरणोपमानको
शाप्तवाक्याद्व्यवहारतश्च वाक्यस्य शेषाद्विवृतेर्वदंति सान्निध्य

तः सिद्धपदस्य वृद्धा इति प्राचीनगाथाविरोध इत्यत आह ॥ तद
नंतरमिति आद्यशक्तिग्रहानंतरमित्यर्थः व्यवहारात् घटानयन
गोचरप्रयोज्यप्रयोजकवृद्धव्यवहारात् ॥ पूर्वं तु घटानयनगोच
रव्यवहारउक्त इति नान्वेदः अनेन वस्त्वात्रिया व्यवहार एव शक्तिग्रा
हकः ततश्च व्यवहारेणोपमानेन वा शक्तिग्रहो जायत इत्यत्र
नास्माकमाग्रह इति न प्राचीनगाथाविरोध इति भावः उपमाना
दिति ॥ गोसदृशो गवयपदवाच्य इत्युपमानात् गवयो गवयपद
वाच्य इति शक्तिग्रहादित्यर्थः शब्दादिति आप्तवाक्यादित्यर्थः कोकि
लः पिकशब्दवाच्य इत्याप्तवाक्यात् पिकपदादेः कोकिले शक्तिग्रहा
दिति वा ॥ व्याकरणादिति ॥ प्रकृतिप्रत्ययांशक्तिग्रहो व्याकरणा
दित्यर्थः कोशादिति ॥ अप्येकदंतहेरंबलंबोदरगजाना इत्य
त्र गणेशत्वविशिष्टे शक्तिग्रह इत्यर्थः न चात्र गणेशत्वविशिष्ट
स्य पदार्थतया पदार्थस्य पदार्थतावच्छेदकस्य वा नेदाचावाल्कर्षं

र्थ इति चेन्न ॥ कीदृशस्य शक्तिग्राहकतया इदं पदमत्र हातुं इति ग्रह
स्यैव तस्माद् उदपेन तत्र पदार्थेनैव पदार्थतया तद्भेदसत्वात् आ
दिपदात् वाक्यशेष विवरणे प्रसिद्धपदसामानाधिकरण्यसं
बंधः व्याकरणोपात् पर्याय वमयश्च रूजंबतीत्यत्र यवशब्दस्य
प्रसिद्धवशात्कंगोर्वाचकः आर्यव्यवहारदर्शनात् दीर्घशूकवि
शिष्टवाचकः व्यवहारस्योभयत्राप्यविशेषादिति संदेहे वसंते
सर्वसस्यानां जायते पत्रशातनम् मोदमानाश्च तिष्ठंति यवाः क
णिशशालिन इति वाक्यशेषात् दीर्घशूकविशिष्टे शक्तिनिर्णयः
न च वेदे न दीर्घशूकविशिष्टे शक्तिबोधनेपि कंग्वादौ शक्तिसत्वे
बाधकाभावः नानार्थत्वेनापि वेदोपपत्तेरिति वाच्यं ॥ अन्याय
श्चानेकार्थत्वमिति न्यायेन वेदस्य वञ्जयत्वात्तत्रैव शक्तिपरि
च्छेदात् ॥ एवं यन्न दुःखेन संभिन्नं न च ग्रस्तमनंतरम् अभिला
षोपनीतं च तत्सुखं स्वःपदास्पदमित्यत्र वेदादेव स्वर्गशक्ति

यहः ननु दुःखासंभिन्नत्वं न दुःखासमानाधिकरणत्वं आदावंते
च दुःखसत्त्वेनासंभवात् नापि दुःखविरलप्रवाहीसर्पकृतया
विरलप्रवाहस्य दुःखासंभिन्नत्वप्राप्या नातिव्याप्तिरितिवा-
च्यं ॥ अस्मादृशसुखस्यापि कतिपयकालावच्छेदेन तथात्वसंभवा
त् चक्रवर्त्तिसुखे तथात्वसंभवेन अज्ञानोपनीतमित्तनिना
पि तन्निरासार्थकस्यापि विशेषणांतरवैयर्थ्यापत्तिरिति चेन्न ॥
अत्र केचित् ॥ एकजन्यावच्छेदेन दुःखासंभिन्नत्वादिकं नानैव
शक्यतावच्छेदकमित्याहुः तन्न नानार्थकत्वे गौरवात् ॥ तथा
तात्पर्यग्राहकस्यान्यपाक्षिके चिन्तु पावतिन्वैयर्थ्यं तदेव शक्यता
वच्छेदकमित्याहुः ॥ अपरे तु दुःखासंभिन्नत्वं न शक्यतावच्छेदकं किंतु
धर्मजन्यशरीरजन्यसुखलोपलक्षकमिदं ॥ योगीनां तु नाधर्मज
न्यशरीरं तत्र दुःखोत्पत्तेरधर्मजन्यत्वात् सुखमात्रावच्छेदके तच्छरी
रमानाक्रवात् अथ मरणस्य दुःखनियतत्वात् स्वर्गीशरीरमरणजन्य

दुःखसंभवात्संभवः नचैतेनराः सुखमस्त्वदृति अनेन विरोधःत
स्य दुःखासत्त्वरत्वादितिचेन्न ॥ अनुकूलतर्काभावेन मरणदुःखनि
यत्वेमानाभावात् नावेवामरणदुःखजनकाधर्मजन्यान्यसुख
स्य प्रवृत्तिनिमित्तत्वात् ॥ एतेन स्वर्गेपि नाडीनिश्चवणानुत्तरायोनि
पुण्यप्रत्ययत्तकृयास्वर्गेपि दुःखोत्पत्तेरसंभवइति निरस्तं ॥ तदन्येना
प्यधर्मस्य विशेषणीयत्वात् स्वर्गिशरीरस्य सुखमात्रावच्छेदकत्वेन
तत्र दुःखधीर्भ्रांतिरेव अत एव तद्धर्मानजन्यमेवेति तद्विशेषत
पित्ततिविरहाच्चेत्याहुः अविरलप्रवाही विरक्तापीष्टामात्रयोनिदुः-
खासंभिन्नसुखत्वं शक्यतावच्छेदकं तत्प्रकारकबोधस्यानुत्पत्तिस
त्वादित्याहुः न च—समित्यस्याग्रस्तात्तां विरक्तापि तं प्रवाहस्येति बोधं
विवरणं कथापाचतिपाकं करोति नाख्यानविवरणात् आख्यातस्य
यत्नत्वविशिष्टेशक्तिः यद्यपि पूर्वेषां रितु वाक्यस्य समानार्थकीभारि
तनाकोनार्थकयत्नरूपविवरणस्य शक्तिग्राहकतानशह विधयाइ

न.प्र.
२५

दं पदं अत्र शक्तं इति शक्तिबोधकपदान्तराभावात् तथापि आख्यात
पदं यत्नत्वविशिष्टे शक्तम् यत्नत्वविशिष्टशक्तं करोति धातुप्रतिपा
दितार्थत्वात् पाकत्वविशिष्टशक्तं वा कपदप्रतिपादितार्थकपचधा
तुवत् यत्नपदमपि विशिष्टशक्तं प्रतिपादितार्थकं भवतीति नतु तद्धर्म
विशिष्टशक्तं भवतीति सामान्यमुखी व्याप्तिश्चात्राभिमता इह सहकार
तरौ मधुरं पिको रौतीत्यत्र सहकारतरुरूपप्रसिद्धपदसमभि॥
व्याहारेण पिकपदं कोकिले शक्तमिति प्रसिद्धपदसमभिव्याहारेण
शक्तिग्रह इत्यवधेयं॥ ननु कोशस्य शक्तिग्राहकत्वे गुणः शुक्लः पटः पुं
सि गुणि लिंगास्तु तद्वतीत्यनेन शुक्लादिपदानां गुणे गुणविशिष्टे च श
क्तिप्रतिपादनात् गुणविशिष्टे शक्तिः स्यात् इति चेन्न असंति नन्यल
भ्यसत्वाद्यापतया शुक्लादिपदानां गुणविशिष्टे लक्षणयैवोपपत्तौ
न तत्र शक्तिः कल्प्यते॥ असति बाधक एव कोशस्य शक्तिग्राहकत्वात् अ
त एव व्याकरणेनाख्यातस्य कर्त्तरि शक्तिप्रतिपादनेपि लाघवात्तता

वे शक्तिरिति अग्रे वक्ष्यते इति दिक्॥ तयोः प्रयोज्यप्रयोजकवृद्धयोः पदप्रला
पातेन अन्ययोः स्वपूर्वकालीनप्रयोज्यप्रयोजकवृद्धयोः अनवस्थि
तयोर्व्यवहारोप्यत्र व्यवहारपूर्वक एवेत्यनवस्थितस्य इत्यनव
स्था बीजांकुरवत् अनादित्वनवस्थानदोषाय प्रामाणिकत्वादिति [illegible]
तदनंतवादिति तत्राधीत्यत्र बालस्य पूर्वकालीनप्रयोज्यप्रयोजक
वृद्धव्यवहारादर्शनाच्छक्तिग्रहासंभवादित्यर्थः॥ ननु संसारस्याना
दित्वात् एवं खंडप्रलयापत्त्या वा कथं तदसंभवइत्याशंकते॥ प्रलय
इति॥ खंडप्रलयइत्यर्थः कार्यद्रव्यतिमहिकालकारणापकार्यद्रव्या
नधिकरणेति कालिकसंबंधेनावानधिकरणत्वं बोध्यं॥ कार्यान
धिकरणेत्युक्तावपि तथा परमाण्वादेः सत्वादतः कार्येति संतेनम
हाप्रलयध्वंसरूपकार्याधिकरणत्वसत्त्वेपि अभावातिरिक्तकार्य
परं कार्यपदं सामान्यपदस्य विशेषपरत्वादित्यपि कश्चित्॥ महाप्र
लयस्य चरमदुःखध्वंसादिरूपतया प्रतियोगिता संबंधेन कार्या

धिकरणत्वात्कालेतिकालिकसंबंधेनाधिकरणत्वप्रापकं निमित्तंका-
तिनयोर्नाधाराधेयभाव इतिभावः वस्तुतस्तु॥आकाशादिरूपकार्याधि
करणत्वाद्गगनेतिभाति रतः कालेतिआगमेति॥धातायथापूर्व
मकल्पयदितिवेदप्रसिद्धत्वादित्यर्थः तथाच संसारस्यप्रवाहानादि
त्वंनतुतन्निसत्वमेवेतिभावः कालजकत्वाद्यात्ववृत्तिघटप्रागभावः
कार्यद्रव्यानधिकरणवृत्तिः अभावत्वात् गगनवृत्तिघटात्यंताभा
ववत्पक्षधर्मवताश्च घटप्रागभावे ध्वंसाकालवृत्तित्वसिद्धेत-
खंडप्रलयवृत्तित्वमादायपर्यवसतीत्यनुमानमपितत्साधकं
बोध्यं॥शरीरद्वयं॥प्रयोज्यप्रयोजकवृद्धशरीरद्वयं॥तथापूर्वकृ
संकेतैनैः घटपदादिपदसंकेतंनन्वेवं सर्ववतीश्वरेमान[illegible]
तदेवनेत्याशंकते॥ईश्वरएवेतिव्यवहारइतिः शक्तिग्राहकाभावा-
च्छक्त्यईश्वरेग्रहेघटादिगोचरप्रवृत्त्यनुपपत्तिरेवमानमित्यर्थः प
रम्परयापितत्तिर्नास्मन्मतेप्रमाणंतरंतत्राशिसंमाधि[illegible]कालिनशक्ति

ग्रहः प्रयोज्यप्रयोजकवृद्धव्यवहारप्रयोज्यः प्रयोज्यप्रयोजकवृद्धव्यव
हारान्यापप्रयोज्यत्वेसति प्रयोज्यत्वात्पन्नेचैतन्नैवंयथागगनादीति
व्यतिरेक्यनुमानमेवंतितत्रदानीमन्यवृद्धासंज्ञवादीश्वरसिद्धिरसाध
कमितिरुद्धपूतत्वादयइति॥तथाचनेश्वरसिद्धिरितिभावः वंघपि
नावतानसंकेतग्रहानुपपत्तिः तथापिप्रसंगादीश्वरोपिसाध्यत
इतिभावः तेषामिति॥कपिलमन्वादीनांसर्वज्ञत्वेनवतुव्यवहारहे
तुत्वंपरंतुतेनेषांतथात्वएवविवाद इतिभावः ननुव्यवहारान्यथा
नुपपत्तिर्नचत्वमतेईश्वरेइवमन्वतेपितेषांसर्वज्ञत्वएवंमानंस्या
त्॥धर्मिकल्पनातोधर्मकल्पनापातघीयस्त्वंचेत्यादिव्यवहारेति
एवमपिपूर्वसर्गसिद्धसर्वज्ञत्वकल्पनालाघस्वीकारेपि अनुपपत्ते
रितिपूर्वसर्गात्पूर्वसर्गासिद्धसर्वज्ञात्मकः कश्चिद्घटिस्यात्तदानत-
त्तत्रव्यवहारप्रवर्त्तनास्यात् सएवतुनास्तीतिभावः सत्रापिपूर्वसं
गेपिअन्यएवेतिस्वपूर्वसर्गसिद्धसर्वज्ञ—वकः अन्याएवेत्यर्थः त-

त. प्र.
२७

याजाव: व्यवहारप्रवर्त्तकत्वं ननु सर्वदा सर्वत्ताादिशालो एको मनु
रिव सर्वत्र मूलमित्याशंकते ॥ अस्त्वेकएवेति तएवेति सर्वत्तादि
शालिमनुत्वेन्नवृदन्त्रिमत इत्यर्थः तथा च नान्त्रिमे दोषः ननु नामव
तीति भाव: दिगिति ॥ स्वोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त
मजन्यानि सकर्त्तृकाणि कार्यत्वात् घटादिवदित्यनुमानमपीश्वरसा
धकमवनेयन्न ननु शाब्दबोधे शक्तिज्ञानस्य हेतुत्वे पि घटपदं घटे
शक्तमिति शक्तिज्ञानकाले घटशाब्दबोधापत्तिः न च तदा घटशाब्दो
त्पत्त्याशाब्दत्वावच्छिन्नं जायते एवं घटशाब्दत्वावच्छिन्नस्य तु आपाद
कत्वाव एवेति वाच्यं योग्यताज्ञानादेरेव तदवच्छिन्नापादकत्वादित्या
शंकते ॥ स्यादेतदिति ॥ ननु तदर्थविषयकशाब्दत्वावच्छिन्नं प्रति त
ज्ज्ञपदज्ञानत्वेन हेतुत्वकल्पनायोक्तापत्तिरित्याशंकते ॥ अपेति
तस्य देशान्तरस्थस्य पुंसः तस्या एव: काशीस्थगोरेव अप्रतीतिरिति
असंनिकृष्टत्वादिति भावः गो: काशीवृत्तिरिति वाक्यजन्यबोधेकाशी २७

स्थगोरेव विशेष्या एवं विदेशान्तरीणएव सः तादृशगोरसंनिकृष्ट
त्वेन तत्र शक्तेरग्रहात् शाब्दबोधानुपपत्तिरिति तद्विशेष्यकशाब्द-
त्वावच्छिन्नं प्रति तद्विशेष्यकशक्तिग्रहत्वेन कारणता उच्यते ति शा
ब्दत्वशक्तिज्ञानत्वाभ्यामेव कार्यकारणभावो वाच्यः योग्यताबला
च्चागृहीतशक्तिकव्यक्तेरपि भानमुपेयं ॥ एवं च घटपदात् घटशा
ब्दबोधापत्तिमाशंकते वेत्यनुपपन्नाशाब्दप्रमितिरिदनुमितं तर्ग
तैव एवं घटपदात् घटशाब्दानुपपत्तिः तन्निरूपितत्वाभितानादरि
नावादित्याखंडजाताभावापत्तेर्विसेयः अत्र शाब्दत्वशक्तिज्ञानत्वाभ्यां का
र्यकारणभावविचारेगोत्वएवेति गोत्वविशिष्टे शक्तिस्वीकारे आव
श्यकत्वात् नागृहीतविशेषणान्यायेन गोत्वएव शक्तिः विशिष्टे श
क्तिस्वीकारमपेक्ष्य विशेषणे शक्तिस्वीकारे लाघवात् तादृशमुद्रंकं
विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिविशेषणे इति कथं तद्धीतिव्य-
क्तेरशाक्यवेइत्यर्थः यौज्ञ. बोधविषयता अशाक्यस्यापि शाब्दबोधवि
ला

वयत्तोपगमेघटादेरपिशाब्दबोधोपत्तेरितिभावः ननु आक्षेपोऽ
नुमानं तच्च न संभवति साध्यहेतुप्रयोगासंभवात्॥ तथाहि॥ अ
पगौ गोत्वादिति तावत् अनुमानं असंभवि स्वाद्यात् पक्षतानाभावा
त्॥ नापि गोत्वं गविस्थितं गोत्वादिति पक्षतावच्छेदकहेतोरैक्येन
न सिद्धसाधनत्वात्॥ अपगोत्वं व्यक्त्याश्रितं जातित्वादित्यनुमाने
न पक्षधर्मतावत्तात् गोत्वाश्रयव्यक्तिसिद्धिरिति चेन्न जातित्वादे
र्लिंगस्य पदादनुपस्थितेः आस्यादिप्रतिसंधानमंतरापि व्यक्तिबो
धस्यानुभवसिद्धत्वाच्चेति कथं आक्षेपाद्व्यक्तिज्ञानमित्याशयेना
शंकते॥ ननु कोपमिति॥ समाधत्ते॥ तस्येति गवादिधर्मिण इत्य
र्थः अथापत्तिमेवाह गोत्वहीति॥ अनुपपन्नमिति आनयनाद्य
न्वये अनुपपन्नस्येतिपदार्थधर्मिण इत्यर्थः मित्यर्थः तं स्वाश्रयं आ
क्षिपति अनुपपत्तिज्ञानजन्यापि स्वाएकत्वाने आस्यादितानस्यान
पेक्षितत्वात् अत एव शाब्दत्वं बन्जी विनोगरहे अभावः वहिःस्तबकिना

अनुपपन्न इत्यनुपपत्तिज्ञानात् अन्तिकरणेनापि ज्ञातत्वबन्जी
विनोपरहाभावे बहिःस्तस्सिद्धिरिति भावः॥ तथा च गोशब्दात् गो
त्वस्याशाब्दबोधः अन्ते तु अनुमितिविषयत्वं अर्थापत्तिविषय
त्वं वा न तु शाब्दबोधे तस्याः प्रवेशः॥ नैयायिकमते पदोपस्थितावशाब्द
बोधतास्तेनेयपागापानयेस्याद्दीपधूतुस्थितत्वाएववापुरूपताः
स्वेतमारूपं हि शाब्दं वस्य एवतः—रविरू पशाब्दं वस्येतो स्वोधा
वतीत्यर्थादिस्तत्र पदानुपस्थितानामेव शाब्दबोधे विषयतत्र
शाब्दत्वाभीत्यनुभवात् न तु केचित्पदोपस्थिपिताः केचित्पदानु
पस्थिता इति अर्धजरतीन्यायप्रसंगेरनंगीकारात्॥ न च गौरिप
दात् युगपदेव जातिव्यक्त्योः प्रतीतिर्व्याहन्येत॥ एवं गोपदाक्षिलक्ष
नंततः अनुपपत्तिज्ञानं ततः व्यक्तिबोध इति ज्ञानधाराकल्प
नं चेति गौरवमिति वाच्यं॥ पदस्य जातिमात्रवाचकत्वे सिद्धे युगप
त्प्रतीतेरसिद्धेः ज्ञानधाराकल्पनस्य च फलमुखत्वे गौरवत्वेनादो

ष्टत्वात्॥ यथा पचतीत्यत्र कृतिमात्रशक्त्याख्यातेन कृतिमात्रप्रती
तिः कर्त्रंशस्तु आक्षेपात् एवं अन्यथा सकर्तृकक्रियाया एवाव
गतेस्तथापि कर्त्तरि शक्तिः प्रसज्येत॥ अन्यलभ्यत्वात्तत्र तच्छक्ति
रिति चेन्न अत्रापि तुल्यत्वात् इति ध्येयं॥ अनुपपत्तिरिति॥ गामान
येत्यादौ गोत्वस्यानयनेऽन्वयानुपपत्त्या व्यक्तेराक्षेपसंभवेपि
गौरस्तीत्यत्र गोत्वस्यास्तित्वेऽन्वयसंभवेनानुपपत्तिज्ञानस्या
संभवितया न तेन व्यक्तेर्लाभसंभव इत्यर्थः न तु अनुपपत्तिज्ञा
नं विनापि व्यक्तिज्ञानस्यानुभविकतया तदनुपपत्तेरित्यर्थः॥ तथा
सति पचतीत्यत्रापि आख्यातस्य कर्तरि शक्तत्वापत्तेः अनुभवस्य
तुल्यत्वात्॥ अत एव गामानयेति विहाय गौरस्तीत्युक्तमिति॥ चिं
तामणिकृतस्तु॥ व्यक्तेरपदार्थत्वे सुबर्थसंख्यादीनां तत्रान्वयस्या
संभवः सुप्तिङ्प्रकृतीनां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमा
त् तिङर्थसंख्यादीनां कर्तर्येवान्वयात् सुप्तिङोः ज्ञानादेवत्रा

क्तिस्वीकारेपि घटादिपदे उपाधिविशिष्टव्यक्तेरपि शक्तिस्वीकार
णं तत्रैव तन्नियमावतारणात्॥ नच प्रकृतितात्पर्यविषय एव त
त्त्व इति वाच्यं लक्षणोच्छेदापत्तेर्गौरवाच्च॥ नच पचतीत्यत्र यथा
आक्षेपजन्यैव कर्त्रसंख्यान्वयः॥ तथा आक्षेपजन्यव्यक्त्यापि त
दन्वयः स्यात् तादृशनियमस्य तत्रैव अत्रापि संकोचादिति वाच्यं
तत्रापि नैव इति परमध्याहार्यैवान्वयबो— स्वीकारादिति॥ तदिद
मुक्तं अयमेव हि आक्षेपोपनीतपदार्थानां पदोपस्थाप्यत्वनामेति
असंकोचेनोपपत्तौ व्युत्पत्तिसंकोचे मानाभावाच्च न घटकद्रुसंकोच
-- अन्यत्रापि संकोच इति व्युत्पत्तिमात्रोच्छेदापत्तिरिति यत्तु गोपद
स्य गोत्वे शक्तिः व्यक्तौ पं लक्षणयेति मंडनमिश्राः तदुक्तं जातावस्तित
नास्तित्वे न हि कश्चिद्विवक्षति॥ नित्यत्वाल्लक्षमाणायाः व्यक्तेस्तु हि विशि
षण इति अस्तित्वनास्तित्वे उत्पत्तिविनाशौ उत्पन्नो गौर्नष्टे सांदौ गोत्व

स्यनित्यत्वेनोत्पादविनाशयोरसंभवेत्॥ व्यक्तौपलक्षणतान्य
पत्तानसत्वेगंगायांघोषमत्स्यौस्तइत्यत्रेवयुगपदितिसिद्धप
विरोधेमानाभावादितितन्न॥ शक्याद्भेनेनरूपेणतानेभवतिल
क्षणेतियथागंगायांघोषइत्यत्रतीरत्वेनतातेनप्युत्रव्यक्तिर्गोत्वा
दृतिरिक्तेनरूपेणताता॥ तद्यक्तित्वेनसंस्तादिमत्वेनवाताते
नैवशाब्दबोधापत्तिः॥ जत्तनावृच्छेदचरूपेणजहत्स्वार्थावृविप
यात्॥ किंचजातिमात्रेशक्तिः व्यक्तौलक्षणेतिदास्यात्पदिमुख्य
प्रयोगः॥ नचैवंसंभवतिविन्वगौपरूपगौरश्वोत्यादौमुख्याप्य
भयानुपपत्त्याभावेनलक्षणायांमानाभावान्नासिमानं॰ व्यक्तिबो
धानुपपत्तिश्चेतिध्येयं॥ तस्मादिति॥ अन्यविधातेपस्मद्वर्ष्वत्वादि
त्यर्थः समानेतिएकतानविषयत्वमेवेत्यर्थः इदमेवविशदय
तियावानीति॥ व्यक्तिप्रसक्तंविताभातिप्रत्यक्षस्याभावेनतत्रैवतन्नि

यमावधारणादित्यर्थः ननुप्रत्यक्षस्थलेसंयुक्तसमवायादिरूपजा
तिभासकसामग्रीसत्वेनसंयोगादिरूपव्यक्तिभासकस्यसत्वादस्तु
तथा॥ शाब्देतुकथमेषमित्याशंकते॥ इदमेवेति॥ समानवित्तिवे
द्यत्वमेवेत्यर्थः॥ जातिभासेति॥ जातिविषयकशाब्दबोधंजातिशक्ति
ज्ञानस्यहेतुतयानद्व्यातातिशाब्दबोधजायमानेव्यक्तिरपिभास
ते॥ तत्पदंविषयशाब्दबोधेतत्पदनिरूपितजातिशक्तिज्ञानस्यहे
तुत्वादित्यर्थः॥ इदंचगुरुमतेकुत्रशक्तिस्वीकारेबोध्यं॥ तथाहि॥ त
न्मतेजातौव्यक्तौचशक्तिःपरंतुजातिविषयकशक्तिज्ञानमेवजाति
विषयकशाब्दबोधेकारणं॥ व्यक्तिशक्तिस्तुस्वरूपसत्युपयुज्यते॥
नचजातिविशिष्टव्यक्तिविषयशाब्दबोधेव्यक्तिशक्तिज्ञानमेवहेतु
जातिशक्तिस्तुस्वरूपसत्युपयुज्यतइत्येववक्तिंतस्मादितिवाच्यं॥ तथा
सतिदंडगोनरस्थगोविशेष्यकशक्तिज्ञानाभावेनतद्बोधानुपपत्तेः॥
एवंचघटादिबोधापत्तिरपितत्तस्यदशाक्यविषयकशाब्दबोधंप्रति

तस्य दुर्निरूपितजातिशक्तितानत्वेन कारणत्वादिति कुब्जशक्तिवा
दिमते निष्कर्षः ननु कुब्जशक्तिवादिमते व्यक्तिशक्तितानस्याहेतु
त्वपानस्वीकारे प्रयोजनाभावः नचतथा सति जातिविषयकशाब्द
त्वमेव जातिशक्तितानकार्यतावच्छेदकं योग्यताव ज्ञानव्यक्तिरपि भा
सतेइत्युपेयम तथाच घटादेरपि भानापत्तिः अशक्यत्वाविशेषात्
मन्मते च तत्तद्शक्यविषयकशाब्दस्यैव कार्यतावच्छेदकत्वेन अनु
पपत्त्यभावादिति वाच्यं जातिप्रकारकव्यक्तिविशिष्टविषयकशाब्दबोधं प्रति
जातिविषयकशक्तितानत्वेन कारणत्वमिति विरहादित्यनैनं कुब्जश
क्तिवादिमते नैतत आदर्शयदिति ॥ न तथा चेष्टापत्तिरिति भावः ॥ कुब्ज
शक्तिवादस्यैकदेशिमते नेति तत्स्वीकारे तेषां सिद्धान्तविरोधः ॥ जा
तिशक्तिरेवेत्येवकारेणाभक्तो कुब्जशक्तिः स्वरूपसदुपयोगित्वं व्यव
च्छेदः ॥ अशक्यशक्त्या ॥ जातिशक्त्या ॥ अन्यबोधने ॥ न तु तदाशक्यव्यक्ति
बोधने ॥ अतिप्रसंगः ॥ घटादिबोधनप्रसंगः ॥ तस्यदाशक्यत्वाविशे

षात् ॥ मन्मते च व्यक्तेरपि तत्सद्शक्यतया व्यक्तिबोधनेन का पिक्ष
तिरिति भावः ॥ उत्तरयति ॥ गोत्वशक्तिमिति ॥ गोत्वप्रकारकगोविशे
ष्यकशाब्दबोधं प्रत्येव गोत्वशक्तितानत्वेन कारणतया न घटादिबो
धापत्तिरित्यर्थः ॥ ननु गोत्वप्रकारकगोविशेष्यकशाब्दं प्रत्येव गोत्व
शक्तितानस्य कारणत्वमुपेयं ॥ घटत्वप्रकारकघटविशेष्यकशा
ब्दबोधं प्रति तु नेत्यत्र विनिगमकाभावः ॥ अशक्यत्वाविशेषादित्य
भिप्रेत आह ॥ अमथ्यानुपपत्त्येति ॥ गोपदाद्गोत्वविशिष्टस्यैव बोधः
न तु घटत्वादिविशिष्टस्येति फलानुपपत्त्येत्यर्थः न त्वेव ॥ गोत्ववि
शिष्टशाब्दबोधं प्रत्येव ॥ कल्पनात् ॥ गोत्वशक्तितानस्य हेतुत्वक
ल्पनात् ॥ एवकारेण घटादिशाब्दबोधं प्रति तु न तथा हेतुत्वक
ल्पनं कल्पनादिति सूचितं ॥ अथवा पूर्वोक्तकुब्जशक्तिवादिमते अ
त्वरसं प्रकाशयति ॥ अन्यथेति ॥ अन्यथा कुब्जशक्तिस्वीकृत्य व्यक्ति
बोधोपपादने ॥ अनुपपत्त्या ॥ उपपत्त्यभावेन अभक्तौ कुब्जशक्तिस्वीका

रेप्रयोजनविरहेनैण॥ तन्मते प्रमाणज्ञानेनेतिपावत्॥ तथैव गोत्व
विशिष्टबोधं प्रत्येव कल्पनात् गोत्वशक्तिता न हेतुत्वकल्पनादिसर्व
इति वस्तुतस्तु॥ जातिज्ञासकसामग्र्या एव व्यक्तिज्ञासकत्वादिति अ
ग्रेव जातिशक्तिरेव व्यक्तिबोधिकेति ग्रंथपर्यालोचनतया कुत्र श
क्तिवादप्रमादापयथापूर्वग्रंथसंगमने गोत्वपदस्य व्यक्तौ शक्त्य
भावेन तथा सत्वत्रिमदूषणादानस्य यथापूर्वकल्पेसंज्ञवितया
तेनैव व्याख्येयं॥ न च पदेति। निरूक्तमते॥ एवं तथा सतीति दूष
णमिति वाच्यं॥ सदेर्नम्भुद्धेरपरिहारात् किंत्वन्यथैव॥ तथा हि॥ ज्ञा
तिज्ञानेति॥ जातिः शक्यत्वमेव जातिशक्तितानकार्यतावच्छेदकं॥
जातिज्ञाने चतापमाने व्यक्तविषयकस्य तस्याज्ञावात् व्यक्तिरपि
ज्ञासते॥ यद्धि येन विना न ज्ञासते तन्द्धितद्बोधकत्वनियमात्॥ ज्ञा
तिज्ञानकसामग्र्या एव तद्बोधोपधायकत्वादित्यर्थः॥ ननु जातिवि
षयतां विनापि व्यक्तिप्रत्यक्षोदयात् ज्ञातिज्ञासकसामग्र्यतिरिक्त

व्यक्तिज्ञासकसामग्री अवश्यमुपेया न च शब्दजतया नियम
:तथा सति ज्ञातिज्ञासकसामग्र्याः व्यक्तिबोधोपधायकत्वेन तो घ
टादेरपि कुतो न बोधः॥ न च व्यक्तिबोधे समानवित्तिवेद्यत्वमेव
नियामकमिति वाच्यं॥ तर्हि व्यक्तिबोधे समानवित्तिवेद्यत्वेन कार
णतातथा च व्यक्तिविषयतायाः कारणनियम्यत्वाक्रमकत्वे व्यक्ति
शक्तिज्ञानमेव कारणं स्यादित्यस्वरसादाह॥ यद्वेति॥ जातिशक्तिरे
वेत्यवकारेण व्यक्तिशक्तिव्यवच्छेदः तथा च व्यक्तिविषयतायाः जा
तिशक्तिज्ञानकार्यतावच्छेदककोटौ निवेशान्न तस्याः कारणनिय
म्यत्वमिति भावः॥ गोत्वशक्तिज्ञानस्य घटबोधं प्रत्येव हेतुत्वमास्ता
मित्यत आह॥ अन्यथेति गोपदाच्छाब्दबोधः ननु घटादेरतो गोशा
ब्दं प्रत्येव हेतुत्वकल्पनादित्यर्थः॥ यदा न तु व्यक्तिरेव जातिविशि
ष्टबोधकत्वेव किं न स्यात् जवन्मते तस्यदाशंकायाः॥ व्यक्तेरिय मन्य
ते पि जातिज्ञाने बाधकाभावादित्यत आह॥ अन्यथेति॥ अपवान

पुनस्तदाशास्त्रबोधनेतिप्रसंगाज्जातिविशिष्टशक्तिरेवबोधिकेत्ये
वास्तामित्यत आह॥ अन्यथेति॥ व्यक्तिशक्तितानुस्यकारणत्वेदृष्टांत
रत्वस्यगोबोधानुपपत्त्याजातिशक्तितानत्वेनैवहेतुत्वकल्पनादि
त्यर्थ इति बोध्यं॥ तथासतीति॥ जातावेवशक्तिस्वीकारेगोत्वविशि
ष्टविषयकशाब्दप्रत्येव गोत्वविषयकशक्तितानत्वेनहेतुत्वस्वी
कारेइत्यर्थः॥ गोत्वमस्तीति॥ गोत्वपदस्यापि गोत्वशक्तत्वेनगोत्व
पदगोपदयोरविशेषात् गोत्वविशिष्टशाब्दबोधापत्तेरित्यर्थ
॥ नच गोत्वंगोपदशक्यमिति निधर्मितावच्छेदकंगोपदशक्तिता
नंगोत्वविशिष्टबोधेहेतुः॥ गोत्वत्वधर्मितावच्छेदकगोत्वपद
शक्तितानंगोत्वरूपेणगोत्वशाब्दबोधेहेतुरितिकल्पनान्नातिप्र
संगइतिवाच्यं॥ गोत्वंनगोपदशक्यमितिबाधकालेपि निर्धर्मिता
वच्छेदकशक्तितानसत्त्वेन गोत्वविशिष्टबोधापत्तिरिति गोत्वत्व
धर्मितावच्छेदककशक्तितानहेतुताया अवश्यकत्वात्॥ एवंगो

त्वस्य शक्यतावच्छेदकत्वाविरूपकतयानदपेक्षागोत्वजातेरेवत
थात्वमुचितमित्यपिनाएवमवसेयं॥ अथगोत्वेनिरवच्छिन्नैध
शक्तिः गोपदंगोरित्याकारकंशक्तिसंबंधेनस्वरूपेतः गोत्वप्रकार
गोपदत्वावच्छिन्नवृत्तिन्नविशेष्यकशक्तितानंगोत्वबोधेहेतुरिति
बोधकालेनशाब्दबोधापत्तिः गोत्वपदंगोत्ववदितिगोत्वंनगोत्व
प्रकारकशक्तितानंचगोत्वशाब्दबोधेहेतुरितिनगोत्वमस्तीत्यत
गोत्वविशिष्टबोधापत्तिरितिचेन्नतथापिगोपदात्कदाचित्सम
येन गोत्वविशिष्टबोधः॥ कदाचिच्चकालिकादिसंबंधेनतद्विशिष्ट
बोधइतिनियमानुपपत्तिः॥ गोत्वविषयकशक्तितानस्याविशि
ष्टत्वात्॥ अस्मन्मतेतुसमवायेनगोत्वविशिष्टशाब्दबोधंप्रतिस
मवायेनगोत्वविशिष्टशक्तितानस्यहेतुत्वादनुपपत्तेरभावात्
नचनासंपत्तेः नियमात् तथानियमः तथासतिनानातावपिश
क्तिस्वीकारेप्रयोजनविरहात्॥ एवंगोत्वंगोपदशक्यमितिस्वीका

रंस्यैकशक्तितानवच्छेदकत्वोपगमेन सिद्धांतभंगाच्चेति॥ एवं तूपाधि
प्रवृत्तिनिमित्तस्थलेतरत्र तूपाधिविशिष्टे शक्तिस्वीकारात्॥ तथा
पशुपदस्य लोमवल्लांगूलविशिष्टे शक्तिः॥ तथा जातिविशिष्टेपि
अनुगतत्वस्य तुल्यत्वात्॥ न च जाते वृत्तिवैयर्थ्यं नियमाद्व्यक्तेर्भानं
उपाधौ तु नादृश नियमाभावात् व्यक्तिबोधार्थं उपाधिविशिष्टे श
क्तिरिति वाच्यं नदीनियमवज्जातेरेव व्यक्तेर्भानं॥ कारणनियमस्य तात्का
र्यस्य॥ तथा च जातिविशिष्टबोधे जातिशक्तितानवच्छेदकारणत्वात्तदुपा
धिविशिष्टेप्येवमुपाधिशक्तितानस्यापि कारणत्वस्य सुवचत्वादिति
दिक्॥ कुत्र शक्तिवादिनस्तु जातौ व्यक्तौ च न शक्तिः परं तु जातिविषय
कत्वेनैव तात्पर्यशक्तिः व्यक्तिविषयकशाब्दबोधे कारणं॥ व्यक्तिशक्ति
स्तु स्वरूपसत्युपयुज्यते॥ न चैवं व्यक्तिशक्तिस्वीकारवैयर्थ्यमिति
वाच्यं॥ तत्पदशक्यस्यापि ज्ञाने घटादेरपि ज्ञानप्रसंगेन व्यक्तिशक्ति
स्वीकारस्यावश्यकत्वात्॥ तथा गौर्गोत्वप्रकारकगोविशेष्यकशा

ब्दबोधं प्रति गोत्वविषयकगोपदशक्तिमत्तागौरित्याकारकं तज्ज्ञा
नं हेतुः न तु गोत्वविशिष्टविषयकगोपदशक्तिमत्तगौरित्याका
रकगोत्वमस्तीत्यादौ तु नात्र शक्तिप्रवृत्ती गोत्वप्रकारकशक्तिताना
भावाद्गोत्वविशिष्टबोधापत्तिः इत्याहुः तदसत्। गोत्वविष
यकगोपदशक्तिमत्तागौरित्याकारकस्य गोत्वविषयकत्वेन शक्ति
तानस्य हेतुत्वे गोत्वविषयकत्वस्य कारणतावच्छेदककोटौ निवे
शगौरवं॥ अथ मास्तु गोत्वविषयकत्वनिवेशः तथापि गो.पद
शक्तिमत्ता गौरित्याकारकगोत्वप्रकारकशक्तितानस्यैव गोत्ववि
शिष्टशाब्दबोधं प्रति हेतुता न त्वेवमविवाद इति वाच्यं व्यक्तिविषय
तायाः कारणतावच्छेदककोटौ न निवेशाद् इत्येव तन्मत—कुर्वन्॥
रोक्षैँ तत्र स्थले गोबोधानुपपत्त्या समानविशेष्यकत्वेन कार्यकारण
भावासंभवेन जायवेन च समानप्रकारकत्वेन वक्तव्यकारणता
वोपगमादिति चेन्न॥ व्यक्तिविषयतायाः कारणतावच्छेदककोटाव

त. प्र.
३५

नियेशो व्यक्तिशक्तिस्वीकारवैयर्थ्यात् ॥ नचतद्स्वीकारे गोत्वप्रकार
कशक्तिज्ञानत्वेन हेतुत्वासंभवः ॥ व्यक्तौ शक्त्यभावेन शक्तिज्ञानस्य
असत्वापत्तिरिति वाच्यं ॥ शक्तिर्हि न स्वरूपसती शाब्दहेतुः अपभ्रं
शादपि शाब्दोदयात् किंतु ज्ञाता तथा च पदं नो शक्तिज्ञानं हेतुस्सा
देवशाक्यमितिजातिवत् व्यक्तिवैशिष्ट्ये च शक्यमेव अयथा व्यक्ता
वेव शक्तिः व्यक्तिशक्तिज्ञाने च जातेरपि प्रकारत्वात् समानप्रका
रकत्वेनैव कार्यकारिभावग्रहः इति जातावपि शक्तिरुच्छिद्येत ॥ न
च यदि पपकत्वेन शक्तिज्ञानं हेतुस्तद्वत्स्वशक्यमिति नियमा
त् जातावपि शक्तिवाच्यं तद्धि वेच्छियकत्वेन शक्तिज्ञानस्य हेतु
त्वं तदेव शाक्यमिति नियमेन व्यक्ति विषयकशक्तिज्ञानस्य हे
तुत्वेनैव व्यक्तिशक्तिस्वीकारो चित्यादिति दिक् नैवापि कमतंद
र्शयति तस्यादिति ॥ गोत्वविशिष्ट इति ॥ ज्ञानो व्यक्तौ वैशिष्ट्येव
शक्तिरित्यर्थः ॥ ननु योग्य[illegible]प्रकरणात् लैकत्वयोरिव जातौ व्य

क्तौ च निशक्तिनतयाशक्तौ गोत्वव्यक्तिश्चेति बोधप्रसंगात् ॥ ननु गौरिति
तथा च वैशिष्ट्ये पि शक्तिः ॥ एवमवयवसंयोगरूपा कृतौ तद्वैशिष्ट्यैवगो
पदशक्तिः गोपदाज्जान्यानतिविशिष्टस्यैव प्रतीतेः ॥ तथा च तदुक्तं जा
त्याकृतिव्यक्तयः पदार्थ इति ॥ एवं शक्तिसत्वे नायं पदार्थ इत्येक वचनं
ननु तत्प्रकारक नविशेष्यकशाब्दबोधं प्रति तत्प्रकारक तद्विशेष्यक
शक्तिज्ञानत्वेन हेतुत्वमित्यायातं तत्र च काशीस्थगोविशेषग्रहाणात् तद्बो
धनापत्तिरूपबाधकमस्तीत्याशंकते ॥ नन्वेवमिति ॥ इत्यदोषः ॥ शक्तिग्र
हाविषयीभूतव्यक्तिबोधानापत्तिरूपो दोषः समाधत्ते गोत्वेति ॥ त
था च सर्वत्रापि शक्तिग्रहाच्छक्तिग्रहाविषयव्यक्तेरजीकतयानतद्बो
धानुपपत्तिरितिभावः सामान्यलक्षणानंगीकारे त्वाह अस्तु वेति ॥ ए
कत्रैव ॥ लौकिकसाक्षात्कारविषय एव अन्यत्र वा ति ॥ शक्तिग्रहावि
षयगविद्त्यर्थः ननु योग्यता वलाच्छक्तिग्रहाविषयेव्यक्तेरपि ज्ञाते
बोधकाभाव इत्यत आह अन्येति ॥ [illegible] अतिप्रसंगः गोपदात् घटादे

रपि बोधापत्तिः शक्तिग्रहाविषयत्वस्य विशेषादिति भावः॥ प्रतान
क इति गोत्वप्रकारकगोविशेष्यकशाब्दत्वावच्छिन्नं प्रति गोत्वप्रका
रकगोविशेष्यकशक्तिज्ञानत्वेन हेतुतया न घटादिबोधापत्तिः पू
र्वं तु न तत्तद्गोत्वेनापि गोनिर्विशेषः इह तु गोत्वेनैवेति द्रष्टव्यं॥ नन्वे
कस्य प्रवाहस्य तीरत्वतीरत्वतीरयोरन्वयाबाधकसंबंधरूपायाः ल
क्षणाया एकस्या लक्षतावच्छेदकलक्ष्ययोः संभवितया लक्षताव
च्छेदकविशिष्टे लक्षणाया अनंगीकारेण गंगायां घोष इत्यादौ स्व
रत्वानुपस्थितस्यापि तीरस्य शाब्दबोधे भानानात् शक्यतावच्छेद
कैः शक्यत्वाभावेपि तादृशाकार्यकारणभावबलादेव गोत्वभाननिर्वा
हे जन्तव्यशक्तिकल्पने नेति संप्रदायमतेऽरुचेः संप्रकाशयन्न
व्यमतमाह॥ गव्येवेति॥ गौरवात्॥ केवलव्यक्तौ स्वीकारेपि बोधा
पत्तौ जातिविशिष्टव्यक्तौ शक्तिकल्पने गौरवादित्यर्थः॥ नच्चैवमिति
एवं गविमात्रे शक्तिस्वीकारे घटादेरपि बोधापत्त्या अशक्यस्य शा

ब्दविषयतया गोत्वबोधानापत्तिरित्यर्थः॥ गोत्वेति गोत्वविशिष्ट
शाब्दबोधं प्रति गोत्वधर्मितावच्छेदकशक्तिग्रहस्य हेतुत्वेनानति
प्रसंगादित्यर्थः॥ गोत्व एव शक्तिस्वीकारे वगोत्वत्वधर्मितावच्छेद
ककशक्तिग्रहस्य हेतुतया गौरवापत्तेरिव शक्तिरिति ध्येयं॥ ननु जा
तिविशिष्टे शक्तिस्वीकारे एव शाब्दे व्यक्तिभानोपपत्तावपि वाक्यार्थ
रूपान्वयस्यापि शाब्दविषयतया तत्रापि शक्तिरस्तु न वेष्टापत्ति
ः जात्याकृतिव्यक्तयः पदार्थ इत्यक्षपादसूत्रविरोधादिति संप्रदाय
मतेऽङ्गीकृतेऽस्मादेतदिति नत्वन्वयेऽपि शक्यतावेत्यत्र आहतस्येति॥
तत्वातिविशिष्टे शक्तिस्वीकारादिति भावः॥ ननु योऽप्यतावज्जातौ पि जास
तदुक्तमाह॥ नचेति॥ अतिप्रसंगाद्घटादेरपि बोधप्रसंगात्॥ गो
शब्दो हीति॥ इतरपदासमभिव्याहृतं गोपदमित्यर्थः॥ गवा च चेति
न च गौरमुकेत्यत्रान्वेदः गामानयेत्यत्र चान्वयविधः संसर्गोन्नासन
इत्यत्र किंचिन्निगमकमिति वाच्यं॥ अन्वेदाद्वयबोधे समानविभक्ति

कत्वात्तस्य तत्समभिव्याहाररूपानुपूर्वीतानस्य अन्यत्र च तस्मानुपू
र्वीतानस्य हेतुत्वादिति भावः॥ पदानां तावदभिधारूपा शक्तिः आ
क्षेपेणान्वयलक्षितन्तेः अन्वयस्य चाक्षेपेणाज्ञातसंभवाद्वाक्यबोध
नैयत्यसंगात् अन्वयेपि शक्तिः इत्थं च जातौ अन्वितेवाभिधारूपा
शक्तिरिति च्छन्मतं दूषयति॥ तदास्त्विति॥ अन्वयविशिष्टे शक्ति
ग्रहात्॥ अभिधारूपशक्तिग्रहात्॥ अन्वयेपि॥ वाक्यार्थरूपान्व
येपि॥ शक्तिरेव॥ अभिधारूपा शक्तिरेव॥ अन्वयस्येति गौः शुक्ल
ल इत्र वाक्यार्थरूपान्वयस्येत्यर्थः॥ अन्वयजन्यत्वादिति॥ अन्वय
विषयकशाब्दबोधे तत्सदानुपूर्वीतानहेतुत्वपातदुजादेवान्व
यज्ञानस्वेपपत्तिरित्यर्थः॥ अन्वयविशेषभावावार्थं तत्तत्सदानुपूर्वी
तानहेतुतायास्त्वावश्यकत्वादिति भावः॥ ननु अजन्यत्वेपि
शक्तौ बाधकाभाव इत्यत आह॥ अनन्येति॥ शक्यत्वात् शक्यत्वा
दित्यर्थः॥ ननु शक्त्यैव शाब्दविषयत्वमिति नियमादन्यजन्यत्वे

पि तत्र शक्तिरेवावश्यकीत्यत आह अन्वयेति॥ शक्यत्वं शाब्दबोध
विषयत्वमिति नियमात्तत्र शक्तिकल्पने लक्षणेति लक्षणया ता
र्वबोधोपपत्तिरित्यन्यजन्यत्वात्तत्र शक्तिर्नास्ति॥ शाक्यस्यैव शाब्द
विषयत्वमिति नियमे तु नीरे गंगापदशक्तिप्रसंगेन लक्षणोच्छेदापत्ति
रित्यर्थः॥ इदनुपलक्षणं॥ अन्वितशक्तिस्वीकारे अन्वितत्वेन पदार्थोप
स्थितिः अन्वयप्रकारशाब्दबोधश्च स्यात्॥ न त्वनुच्चवृत्तिसिद्धं न त्वन्वि
ते शक्तिः स्वरूपसत्तु उपयुज्यते न तु ज्ञाता ज्ञाता तु तात्ते बोपयुज्यत इ
ति तन्मतनिरस्तमिति बोध्यं॥ पदिपपकलेनैवतातात् शक्तिरनुभ
वहेतुसात्त्रे वृशक्तिरित्यन्वये शक्तिस्वीकारवैयर्थ्यात्॥ शाक्यस्यैव शा
ब्दविषयत्वमिति नियमस्य च लक्षणया व्यभिचारादिति रहस्यमनुसंधे
यं॥ केचित्तु॥ चरममते अन्वितेवाभिधारूपा शक्तिः अन्वितविषयक
शाब्दत्वावच्छिन्नं प्रति घटत्वानन्वयं कारणमिति घटपदादौ अन्विते
आनुभाविका शक्तिः नैयायिकमते आनुपूर्वीतानस्यैवान्वितशा

ष्टत्वं कार्यतावच्छेदकत्वं इति मते घटशक्तिज्ञानस्येति मतत्वेदः अन्व
यविशिष्टे शक्तिग्रहात् वा जेन घटपदादेशानुभाविकशक्तिग्रहात्
शक्तिरेव ॥ आनुभाविकशक्तिरेव अन्वितविषयकशाब्दत्वं घटपद
शक्तिज्ञानकार्यतावच्छेदकमित्यर्थः ॥ अन्यजन्यत्वात् अन्वितशाब्द
स्यानुपूर्वीज्ञानकार्यतावच्छेदककोटिप्रविष्टत्वात् इत्यर्थः अनन्य
जन्यस्य चानुपूर्वीज्ञानादिरूपप्रकारांतरजन्यस्य च शाब्दस्य पलात्
घटपदशक्तिज्ञानकार्यतावच्छेदकत्वादित्यर्थः ॥ तथा चान्वयवि
शेषशाब्दत्वस्यानुपूर्वीज्ञानकार्यतावच्छेदकतावत् पकत्व अन्वय
विशेषशाब्दत्वस्य घटपदशक्तिज्ञानकार्यतावच्छेदकत्वे मानाभा
वादित्याशयः ननु शक्तिज्ञानकार्यतावच्छेदककोटिप्रविष्टस्यैव शाब्द
विषयत्वमिति नियमानपेक्षत आह अन्यथेति तादृशनियमम
नुपेत्य तथा कल्पने लक्षणेति तादृशनियमानुपगमे तीरवि
षयता या अपि गंगापदशक्तिज्ञानकार्यतावच्छेदककोटिनिवेशे

न तरां वतीरत्वाद्यां नोपपन्नेत्यत्र जघन्यत्वीकारोपपः वृत्तिर्हि
नस्वरूपसत्युपयुज्यते किंतु ज्ञातैव हि स्वंपुंच धुनसंदर्भविरोधा
ननुपेयं ॥ प्राचां करात्विति ॥ कार्यान्विते ॥ कृतिसाध्यानयनान्वि
ते इत्यर्थः तत्र प्रयोजकत्वं यदा प्रवृत्तिप्रयोजकत्वं यदा कार्यतावि
शिष्टज्ञानमिति कार्यताकृतिसाध्यता न तु विशिष्टविषयकं ज्ञान
मित्यर्थः अनुमिनोति प्रयोजकस्येति अयं घटानयनगोचरका
र्यताविशिष्टज्ञानवान् घटानयनगोचरप्रवृत्तिमत्वात् त्वनयान
गोचरप्रवृत्तिविशिष्टमहदित्यनुमाताकारो बोध्यः ॥ अप्रयोजकत्व
मात्रं व्याहस्वप्रवृत्त्वाविति स्वप्रवृत्तौ स्वीयत्वनयानगोचरप्रवृत्तौ
तेन वा तेन कार्यताविशिष्टज्ञानस्य कृतिसाध्यताविशिष्टज्ञानस्यै
तु ला व धारणदिति तथा च कार्यकारणभावग्राहानुकूलतर्कइतिभा
वः तद्वेता कांक्षायां कार्यताविशिष्टज्ञानकारणत्वं तासामां ॥ शाब्दमेव
घटमानयेति शब्दमेव ॥ तथा कार्यत्वविशिष्टज्ञानत्वहेतुत्वं तत्र कि

र्यं हि कारणं हि कार्यत्वविशिष्टसाधनोपधायकं निर्वाहकं॥ कार्यतान्वि
तेति॥ यद्यपि घटानयनगोचरप्रवृत्तौ प्रदानसमनगोचरकार्यता
विशिष्टज्ञानत्वेन हेतुः कार्यान्वितज्ञानत्वेनेति कार्यान्वितेशक्तौ
ज्ञानावस्त्वपि न केवलं कार्यमिति ज्ञानं प्रवृत्तिः॥ किंतु घटानय
नं कार्यमिति ज्ञानात् तच्च कार्यताविशिष्टज्ञानं कार्यान्वितज्ञानमे
वेति तत्र शक्तिः एवमानयतिपद विभागस्य घटमानयेति वाक्य
स्य कार्यताविशिष्टज्ञानजनकत्वं कार्यान्वितशक्तौ एव निर्वहति॥ त
स्यापि एकपदस्यैव कार्यस्य विशिष्टशक्तौ इतरपदस्य वैयर्थ्यात्॥
कार्यान्वितशक्तौ तु सर्वेषामपि कार्यताविशिष्टज्ञानजनकत्वं स॰
भवति कार्यताविशिष्टज्ञानप्रयोजकत्वेन कार्यान्वितज्ञानस्यापि प्र
वृत्तिप्रयोजकत्वानपायात् कार्यान्वित एव शक्तिः न च कार्यतावाच
कतिङादीनां कार्यान्वितवाचकत्वासंभव इति वाच्यं सर्वपदानां का
र्यत्वपरशक्तिगोचरज्ञानजनकत्वाच्च कार्यान्वितस्यार्थप्रतिपादक

त्वादितरान्वितस्यार्थप्रतिपादकत्वाच्चेति तथा च कार्यत्वमात्रावि
ष्टं कार्यं तत्रिन्नेनावच्छिन्नमिति सर्वत्र कार्यान्विते एव शक्तिः इत्यास्यं
उज्ञाप्य॥ आवापोद्वापाभ्यां संग्रहत्यागाभ्यां प्रपञ्चेति शब्दसामान्ये
कार्यान्वितज्ञानजनकत्वनिर्वाहिकशक्तिकल्पनानुरोधादित्यर्थ
ः ननु ज्ञापकत्वात् तथास्त्वित्यत आह आद्येति शब्दसामान्ये कार्यान्वि
तशक्तिकल्पनायाः विरोधापत्तेरित्यर्थः शब्दसामान्यस्य कार्यान्वितएव
शक्तत्वे धत्ते विधेरेव प्राधान्यमापद्येत एवं वादस्येति दर्शयति इत्थं चे
ति॥ शब्दसामान्यस्य कार्यान्वितशक्तत्वे नेत्यर्थः॥ यत्र॥ ऋतत्वे घटो
ऽस्तीत्यादौ कार्यतावाचकेति॥ कार्यतावाचकपदं लिङ्लोटतव्यपंच
म॥ लकारः कृत्प्रत्ययश्चेति विधिप्रत्ययानां समभिव्याहारो नास्ती
त्यर्थः विधिसमभिव्याहृतं वैदिकवाक्यामप्यवाह॥ पक्षमेव॥ शा
ब्दबोधानुपधायकमेव॥ ननु तर्हि प्रवर्तकतानावात् प्रवृत्त्याद्य
नुपपत्तिरित्यत आह व्यवहारस्त्विति॥ प्रवृत्तिस्त्वित्यर्थः॥ आसंसर्गे

ति॥ असंसर्गग्रहाभावाद्बाधाभाववज्जादितिपायत्॥ तन्मतेसर्व
त्रप्रवृत्तिंप्रतिविशिष्टज्ञानस्यहेतुत्वानभ्युपगमात्॥ ननुशाब्दसा
मान्यस्यैवकार्यान्वितशक्तित्वात्कार्यान्वितशक्तिज्ञानस्यैवत्र॥
शाब्दबोधेहेतुतयाविधेरिवशब्दसामान्यस्यकार्यतावाचक
पदत्वात्कथंसिद्धार्थवाचनांप्रामाण्यमित्याशंकतेनन्विति॥
कार्यान्वितेति॥ कार्यताविशिष्टान्वितेत्यर्थः कार्यान्वितवाचकत्वा
त्कार्यादितिपाठवत्नवाचकेति॥ कार्यतावाचकेत्यर्थः॥ विधिरिवप
दसामान्यस्यैवकार्यतावाचकत्वादित्यर्थः॥ असंगतंचेतिसर्व
स्यापिकार्यतावाचकपदत्वात्कार्यतावाचकपदासमभिव्या
हारेऽप्रयुक्तमप्रामाण्यंकथनमर्थवादस्येत्यर्थः॥ अत्रपदानांका
र्यान्वितेऽभिधारूपैवशक्तिः घटादिवदात्कार्यान्वितंघटत्वा
दिनैवपदार्थोपस्थितिः॥ घटादिपदेकार्यान्वितविषयकशाब्द
बोधेजननीयेइतरविशेषणतयाकार्यत्वोपस्थापकलिंङादि

पदस्यसहकारित्वाद्धनसिद्धार्थकार्यवादस्यप्रामाण्यमितिकार्या
न्वितेऽभिधारूपशक्तिमादायअर्थवादस्य— —एपनुपपादयितुं
शक्यतेतत्रापिकार्यत्वोपस्थित्यर्थंहिघटादिपदानांकार्यान्विते
शक्तिःसावश्यापेक्षणीयलिङादिपदादेवज्ञानेतिव्यर्थंघटा
दिपदानांकार्यान्वितेऽभिधारूपशक्तिकल्पनेन॥ एवंकार्यान्वि
तत्वेनशाब्दबोधेअनुभवबाधश्चअभिधारूपशक्तिमुपेत्यअ
नुभाविवशक्तिमादायसमाधत्ते॥ अत्रोच्यतइति॥ आनुभावि
कशाब्दानुभवजननीबा॥ स्मादिवापदार्थस्मृतिजनिका॥ तत्रे
ति॥ कार्यान्वितविषयकशाब्दत्वावच्छिन्नंप्रतिघटपदशक्तिज्ञान
त्वेनकारणतेत्यर्थः॥ स्मारिकाचेति॥ जातिशक्तिज्ञानात्केवलं
घटत्वजातिस्मृतिः॥ शक्तिज्ञानस्योद्बोधकतयापदार्थस्मृति
हेतुत्वादितिभावः ननुकार्यान्वितबोधेघटादिपदज्ञानस्यहे

तु तथा शक्यते कथं नानुगमव्यञ्जनकत्वमत आह ॥ कार्यत्वात्पबो
धे इति घटादिपदेन कार्यान्वितविषयकशाब्दबोधजननीयका
र्यताबाचकलिङादिपदोपस्थितेः सहकारित्वादित्यर्थः ॥ नापवाद
स्येति । विशेषसामग्रीसहिताया एव सामान्यसामग्र्याः फलोपधा
रितत्र तथाकार्यत्वोपस्थापकलिङादिपदाभावेन तत्तन्यकार्य
त्वोपस्थितेः सहकारिण्याः अभावात् शाब्दानुगमव्यञ्जनकत्वरू
पं प्रामाण्यं नापवादस्येत्यर्थः ॥ लाघवात् ॥ कार्यान्वितघटवि
षयकत्वापेक्षया लाघवात् ॥ घटत्वादिति ॥ घटविषयकशा
ब्दत्वावच्छिन्नं प्रत्येव घटपदशक्तिज्ञानत्वेन कारणत्वमित्यर्थ
न्तिति ॥ ननु घटपदादेः कार्यान्वितघटविषयकशाब्दत्वं कार्य
तावच्छेदकमित्यपि अनन्यत्वात् ॥ कार्यताबाचकलिङादिप
दज्ञानजन्यबोधविषयत्वादित्यर्थः घटविषयकशाब्दत्वावच्छि

न्नं प्रति घटपदज्ञानत्वेन कार्यान्वितशाब्दत्वाभ्युपगच्छिन्नं प्रति त
लिङादिपदज्ञानत्वेन हेतुत्वाद्यत्र च लिङादिपदसमभिव्याहा
रः तत्र समभिव्याहारादेव कार्यत्वान्वयबोधः यत्र न तत्समभिव्या
हारस्तत्र केवलघटादेर्बोध इति अपवादस्य प्रामाण्यमितिभा
वः ननु अनन्यजन्यत्वं न स्वरूपसत्प्रतिबन्धकं किन्तु तज्ज्ञानं यदि
शक्यं स्यात्तदा अनन्यजन्यत्वं न स्यादिति न कौशायनात् ॥ तथाच
मत्र तत्रोपस्थितं तत्र कार्यान्वितेशक्तिग्रहे बाधकाभाव इत्या
शङ्कते ॥ प्रथममिति ॥ प्रथमं लिङादिपदस्य कार्ये शक्तिग्रहात्पूर्वं ॥ कार्या
न्विते शक्तिग्रहोऽस्तु ॥ घटपदस्य कार्यान्वितविषयकशाब्दत्वं का
र्यतावच्छेदकमस्त्वित्यर्थः ॥ ततः अनन्यजन्यत्वं ॥ घटमात्रेति ॥ घटविष
यकशाब्दत्वं घटपदकार्यतावच्छेदकमस्त्वित्यर्थः ॥ सा कार्यान्विते शक्ति
कल्पना बाध्यतां अप्रामाण्यग्रहविषयीक्रियतां ॥ गौरवात् ॥ घटमात्र
शक्तिकल्पनापेक्षया गौरवात् ॥ ननु सामान्यतः प्रथमकल्पनाबाधः व

जवत्त्वे कथं तद्बाध इत्यत आह॥ अप्रमैवमिति॥ ननु प्रथमप्रवृत्तस्य जलव
त्वप्रयोजकतयाकल्पनं नवज्जलत्वमत आह॥ नहीति॥ शास्त्रादिति॥ शास्त
योजनश्चंद्र इति चंद्रपरिमाणबोधकात् ज्योतिःशास्त्रार्थं दृष्ट्यथः त
था च तुरादिनात्तानन्तस्वल्पयोनायामप्रामाण्यस्तान वदत्रापि घटपदा
देः कार्यान्वितघटादौ शक्तिस्तानि अप्रामाण्यं कल्प्यत इति भावः॥ ननु
चंद्रतारादौ शास्त्रजन्यमहत्परिमाणतानि न बाधात् तत्र स्वल्पपरि
माणतानि अप्रामाण्यं कल्प्यते प्रकृते च प्रथमकार्यान्वितघटादि
शक्तिकल्पने बाधकाभावान्न तद्बाधः॥ असति बाधके प्रथमप्रवृ
त्तस्यैव जलवत्त्वे तन्त्रत्वादत आह वरमकल्पनायामिति लाघवेति का
र्यान्वितघटादौ शक्तेरबाधेऽपि कार्यान्वितत्वविशिष्टघटत्वस्य घटत्वा
पेक्षया गुरुतया शक्यतावच्छेदकत्वासंभवेन कार्यान्वितघटत्वावच्छि
देन शक्यत्वाभावेन तेन रूपेण तत्र शक्तिकल्पने बाधः स्यादेव॥ तद्धर्मा
वच्छिन्नाभाववति तद्धर्मावच्छिन्नप्रकारकत्वान्नत्वमेव हि भ्रमत्वमिति

भावः॥ ननु कंबुग्रीवादिमत्त्वं घटत्वापेक्षया न गुर्विति गौरवेऽपि तान
मत्त्वेऽपि कंबुग्रीवादिनाम्नां तीनां प्रतीतत्वात् यथा गुरुधर्मस्य प्र
तियोगितावच्छेदकत्वमुपैयते॥ तथा गौरवेऽपि प्रथमप्रवृत्तेः कार्या
न्वितघटे शक्तिः स्यादित्यत आह स्तु व्यत्ययदर्शनत इति भावेनाह किंचे
त्यमिति॥ एवं कार्यान्वितघटादौ शक्तिकल्पने शक्तिताने न तं शाब्द
त्वमान्वियननीयेकार्पता वाचकलिङादिपदजन्योपस्थितिः सह
कारिणीचेत्यर्थः अनुत्व व सिद्ध इत नेनउरपकृवृत्तं सूचितं न स्या
दिति लिङादिपदरूपकारणाभावादिति भावः नन्वेति यदापि पस्थि
तिः बाधकाभावामोत्रादि व्यवहारादिति भावः तदापत्तेः असंस
र्गग्रहापत्तेः कार्यादौ अनुत्व व सिद्धस्यापि संसर्गानुत्व व स्यापजा
पि लिङ्समभिव्याहारेऽपि अपत्यापापत्तेरेव स्यादिति भावः न चि
रापत्तिरितन्नाह तथावेति॥ ननु प्रथमं कार्यान्वितएव शक्यवधा
रणात् सहकारिकार्पतानान्वकपदरूपकारणाभावात् विधमसम

भिव्याहृतस्थले संसर्गाग्रह एव बोधे पतेकापच्छिन्नस्यावत्रूपकता
त् विधिसमभिव्याहृतस्थले तु बाधकाभावेन शाब्दानुभवस्यो
पपत्तेः अत एव शाब्दे प्रामाण्यमपि इत्यत आह। किंचैवमिति॥
एवं कार्यतावाचकपदसमभिव्याहारस्थल एव शाब्दानुभवस्वी
कारे। स्यादिति तादृशकार्यतापदसमभिव्याहाराभावादिति भा
वः ननु केषांचिद् प्रामाण्येऽपि लिङ्समभिव्याहृतपदसंसमुदा
यवशात् प्रामाण्यं स्यादेवेति तेषां प्रामाण्येऽपि तत्प्राप्तिरित
त आह तथाचेति॥ पुराणादीनामपि प्रामाण्यस्वीकारे चेत्स
र्वः मिश्रैः वाच्यमिति मिश्रैः बुद्धबन्धुरिति॥ बुद्धैः नवस्यापि शास्त्रस्य
प्रामाण्यमनुपेयते प्राभाकरैस्तत्कस्यापि छन्दस्य प्रामाण्यांगीकारा
त् ननु तदन्तत्र तत्त्वं अतद्रूपं बधुरिति॥ यथा तैरनुभवसिद्धोप्य
नुभावोपपद्यत इति वेदस्याप्रामाण्यमुच्यते तथा पुराणादेरप्रामा
ण्यं न वेति तात्पर्यं तत्र बोध्यम्॥ एवं वदन् अनुभवसिद्धस्य संसर्गाग्रह

मात्रं वदन्॥ वर्णव्यत्यासः॥ इकृद्त्वमकर इति सादृश्यं तकारत्वम्
रूपो गौरिति प्यासादृश्येन तत्त्व अनयोः सादृश्यं बोध्यम्॥ युत मुतं
रूपाम इति॥ अनुभवानुरोधेनैव कल्पनात् तथाच लिङादिपद
समभिव्याहृतस्थलेप्यनुभवस्यापलापानर्हत्वेन लाघवेनचा
घटत्वविशिष्टएव शक्तिस्वीकारउचित इति भावः वस्तुतस्तु॥ अ
तिप्रसक्तधर्मसामान्यान्वयव्यतिरेकग्रहासत्त्वात् प्रसक्तस्थ
ले कार्यत्वकारणतावच्छेदकग्रहासंभवेपि शाब्दे अतिप्रसक्तध
र्मसामान्याधिकरण्येनापि तद्ग्रहः यथा स्वर्गकामो यजेतेत्यादौ
गंगास्नानादितोपि स्वर्गोदयात् स्वर्गत्वावच्छेदे यागजन्यत्वास
त्त्वेन वैजात्यस्य च प्रथममनुपस्थितेः स्वर्गत्वयागत्वसामाना
धिकरण्येन कार्यकारणभावग्रहः तथा प्रकृतेपि शक्येकार्यान्वि
तत्वानवच्छेदकत्वं गृह्यते ननु कार्यान्वितत्वानवच्छिन्नप्रतीतव्यु
तरपदसमभिव्याहारादेरुपपन्नमिति न कार्यान्विते शक्तिरिति

पदं तावच्चतुर्विधं रूढं यौगिकं यौगिकरूढं योगरूढं च ॥ यत्रावय
वशक्तिनैरपेक्ष्येण समुदायशक्तिमात्रेण बोधः तद्रूढं यथा गोपु
रं यत्रावयवार्थ एव बुध्यते तद्यौगिकं यथा पाचकादिपदं यत्र यौ
गिकरूढ्यर्थयोः स्वातंत्र्येण बोधः तद्यौगिकरूढं यथोद्भिदादि
पदं यौगिकं खु मित्रे रूढं च यागविशेषे ॥ योगरूढं यथा पंकजादिपदं
तत्रैकसमुदायः पद्मत्वविशिष्टे रूढो भवतीति विप्रतिपत्तिः पंक
जपदात् पद्मत्वविशिष्टे पंकजसमुदायस्य रूढिरवयवरूपकापद
न्निपतोपस्थितेर्वृत्तिसाध्यत्वात् ॥ पंकजपदाद्योगेन कुमुदस्या
पि बोधप्रसंगाच्च मन्मते कदाचित्कुमुदबोधस्तु जहल्लक्षणयैव न
तु रूढिस्वीकारपि तन्निह पदेन खु नित्यमिव पंकजपदात् कुमु
दमपि बोध्येत् योगसत्त्वात् ॥ अत्र प्राद पद्म योगरूढिभ्यामेक
स्थबोधस्तत्र केवलयौगिकार्थबोधे रूढेः प्रतिबंधकत्वान्न कु
मुदबोध इति ॥ तत्र मणिकृतस्तु ॥ रूढ्यादिमतः स्मृतपद्ममे

घवृन्तरूपकरव्यक्तिवाचकडप्रत्यर्थसंधकुजनिरुन्दुपा अनु
नुत्वात्तद्बाधकं विना योक्तिवचनानां सन्निहितविशेष्य
परत्वनियमात् व्यक्तिवचनानां किंचित् व्यक्तितात्पर्यकारण
सन्निहितः प्रथममुपस्थित इत्यर्थः तथा च पद्मे तात्पर्यस
त्वे स पंकजनिकृन्तनपात् देवयोगेनाभिप्रतीयते न कुमुद
मिति रूढेन प्रत्ते बंधकत्वं यागभावान यगाहित्वात्जनक
तान विरोधित्वात् सिद्धेरनुमितिप्रतिबंधकत्वस्यानायन्या
स्वीकारे पिकान्यत्रतानस्य मणिमञ्जादिन्यायेन प्रतिबंधकत्वे मानाभा
वात् ॥ इत्थं च पद्मानुभवसामग्रीसत्त्वात् पद्मस्यैव बोधः न तु कुमुदस्य
सामग्र्यां सत्यां फलाभावेन प्रतिबंधकान्तकल्पनादिति वदंति ॥ अत्रेदं वि
च्यं ॥ पंकजकुमुदमानयेत्यादौ यत्र पंकजपदस्य पद्मे तात्पर्यज्ञानं वा कुमु
दे च तात्पर्यग्रहस्तत्र जहल्लक्षणां विनैव कुमुदबोधापत्तेः ॥ पद्मानुभवसाम
ग्रीविरहात् पद्मे तात्पर्यग्राहविनिश्चयस्यैव तत्र बाधकं विना व्यक्तिव

त.प्र.
४५

चनानां सन्निहितविशेषणत्वमिति न्यायस्य तत्रावचतारात् ॥ घटे
नजलमाहरेत्यत्र सच्छिद्रघटस्यप्यमोपस्थितत्वादन्वयवारण
ईयवाधं विनैतस्यावर्त्तकत्वात् ॥ तथावगृहीतपद्मप्रयोगस्य पद्मा
त्वयानुपपत्तिनुरः सरैव कुमुदधीरिति न स्यात् ॥ कुमुदं पंकजमि
त्यत्र कुमुदस्यैवान्वयमसन्निहितत्वसत्त्वाच्च कुमुदस्य नित्यपदो
पस्थाप्यत्वेपि प्रत्ययोपस्थितत्वाच्च ॥ अथ कुमुदबोधस्तत्र शक्त्यै
वास्तां पंकजपदस्य कुमुदे लक्षणेति प्रवादस्तु कावित्काभिप्रायेण
यत्र योगरूढिभ्यां पद्मानुभवस्तदनन्तरं कुमुदे तात्पर्यज्ञानं तत्रैव
तत्र स्वतंत्रोपस्थितं यत् कुमुदे लक्षणयानूपरं विशेषो दर्शं प्रदाय
तनेसमुच्चलक्षणा मणिकृतो नैका वित्कीनि चेन्न ॥ तत्रापि पंकजनि
कृन्ततेर्यैतस्य कुमुदे तात्पर्यग्रहकाले पुनः स्मृतपंकजपदेनश
क्त्यैव कुमुदोपस्थापनसंभवात् ॥ पद्मे तात्पर्यज्ञानविनिश्चयेन कु
मुदे तात्पर्यनिश्चयसंतेनपद्मेन्वयासंभवात् अन्यथा लक्षणानो ४५

पत्तेरिति ॥ यत्तु शक्त्या पुनः नानापदतदर्थानुसंधानपत्तेर्वाक्यार्थ
विधयागुरूपस्थितिकल्पं लक्षणापांकजनिकर्त्तृत्वस्य पद्मार्थतया
लघुपस्थितिकत्वमिति ॥ तन्न पंकजत्वकर्तृमानयेत्यादौ वाक्यमा
त्र एव लक्षणापत्तेः श्रत्नेकंशक्त्यैव योग्यतावजादिशिष्टबोधात्र
लक्षतेतिचेन्न प्रकृतेपिसमानं ॥ तस्मात्तत्रूवितानप्रतिबंधक
त्वकल्पनए एव लक्षणासंभवः विरोधविषयत्वेपि सिद्धिरनुमिताव
वरुद्धितानंप्रतिबंधकं इति ॥ स्यात् पद्मान्वयानुपपत्त्यनंतरं कुमु
दधीरिति लक्षणा व्यवहारो वस्तुतो मुख्यतयैवेति तु मणिकृन्मतेन
तिरिति ॥ ननु पंकजपदस्य पद्मे लक्षणेवास्तां वाक्यैकशक्त्याचावे पिस्त
दरकेसंभवात् न च शाक्यलक्षणसाधारणैकरूपाभावेनान्तरत्वापर्या
मात्तस्या अन्नाघातपुगपत्तिरुपविरोध इति वाच्यं सतितात्स
र्येगंगायां घोषमत्स्यादत्तिस्त्वत्रैव मणिकृन्मतेतस्यादोषत्वा
त् इति मैवं ॥ शक्येवाधकेसति वलक्षणेति मुख्ये बाधकाभावेज
न

त. कृ.
५६

क्षणे यन्नीतान्नपेक्षणे कुमुदस्यासाधारणबोधापत्तेः तात्पर्यानुप
पत्त्या पक्षीः प्रदेशमिति तत्लक्षणोपपादनेपि पद्मकुमुदयो
स्तुल्यत्वापत्तेः लक्षणाविशेषात् तथा च पद्मान्यानुपपत्तिप्र
तिसंधानानंतरं कुमुदधीरिति सिद्धांतव्याकोपः॥ एवं धेनुपद
मपि योगरूढमिति॥ ननु पद्मत्वमेव॥ प्रयोगोपाधिरस्त्विति
चेन्न पद्मत्वानन्प्रतिबंधकत्वाग्रहीतपद्मप्रयोगस्य कुमुद
साधारणबोधदर्शनानुरूढितानत्वमेव त्वाज्ञावृत्त्यसंबंधेन
प्रतिबंधकमिति॥ नन्वयोग्यतया पद्मत्वमपहायकेवलशक्त्या
कुमुदबोधोस्तु किं लक्षणया रूढे योगप्रतिबंधकत्वमते तथाप्य
न्वयेपि मणिरूपन्यतेन रूढेरप्रतिबंधकत्वादिति चेन्न॥ पद्मांत्वि
तत्वेनोपस्थितस्य पंकजनिकर्तृत्वस्यान्वयतिशक्तांत्तत्पायस्व
तंत्रोपस्थितपैलक्षणागौकारात्॥ एवं पंकजपदात्स्थलपद्म
बोधो लक्षणयैव स्थलपद्मं विजातीयमेवेति पद्माकृतिसदृशाकृ

तौ स्थलपद्मत्वविशिष्टे वा पंकजपदस्य लक्षणा॥ यदि कुमुदगतप्र
तीत्या तत्रापि पद्ममेव कथ्यत इति चेन्न॥ योगार्थवत्वेन पद्मस्यो
पस्थित्या निराकांक्षत्वात्॥ स्वतंत्रोपस्थितेतदावरूपकत्वात् पद्म
पिशकयादन्येन रूपेण तानेव वृत्तिलक्षणेतिन्यायात् समुदा
यस्य लक्षणान्नयुक्तात् तथापि कर्तृवाचकपद एव सा बोध्या॥ अत्र
इदं चिंत्यं स्थलेपंकजमित्यत्र यं पंकजनिकर्तृत्वस्य प्रतीतावपवि
वग्रहेनतदनन्वितपद्मत्वस्य ताकांक्षत्वमेव॥ यत्र वा प्रपद्मम
न्वयस्तत्रापि स्थलपद्मतान्वयप्रदानंतरं पुनः स्मृतपंकज
पदात् स्वतंत्रोपस्थितिः लक्षणयैवोपेया॥ एवं शक्तैव तदा
तदुपस्थितिरावश्यकत्वादयोग्यत्वेन योगापत्यान्वयादिति॥ अपि च
रूपेणैनाग्निवर्त्तनेते त्वन्नवज्जवद् निर्णाननुसंधीसत्साधन
त्वरूपविधेयविशेषणाकांक्षपहाययथा विशेष्यान्वयप्रयत्तात्
अयोग्यतया विशेषणानन्वयेपि विशेष्यान्वयेप्रविशेष्यान्व

बाधकाभावः योगार्थस्यैव विशेष्यान्वयेव पंकजं कुमुदमिति तत्र
साकांक्षतया जहत्स्वार्थलक्षणानुपपत्तेरिति दिक् ॥ इदं तु बोध्यं ॥ आका
शपदे निरवच्छिन्नैव शक्तिः व्यक्तीनामानन्त्येनाननुगम
कधर्मानपेक्षणात् ॥ ननु वस्तुपस्थापितस्यैव शाब्दबोधवि
षयत्वाच्छब्दाश्रयत्वं ततः कथं नाम सेति वाच्यं नियमतो यद्
धर्मवत्त्वेनोपस्थिते यत्र शक्तिग्रहस्तत्स्मरणजनकसंस्कार
स्य तद्धर्मे विषयतानियमेन तदुद्बोधकादेव तदंशेप्युद्बोध
कनियमेनाकाशपदाच्छब्दाश्रयस्याप्युपस्थितत्वात् ॥ तथा हि ॥
शक्तिर्हि एकसंबंधितानमपरसंबंधिस्मारकमिति शब्दप
दार्थयोः केनापि रूपेणोपस्थितयोः पदार्थयोः संबंधता
नेन तद्रूपावच्छिन्नतानामनुसंबंधांशेऽप्युद्बुद्धसंस्कारसहकृतात्त
द्रूपावच्छिन्नस्मरणं तत्र च संबंधितावच्छेदकस्यापि तन्मताव
च्छेदककोटिनिवेशोपक्षयः अन्यथा हस्तिपके चैत्रत्वेनोपस्थिते

चैत्रत्वेन चोपस्थिते हस्तिनि संबंधग्रहे मनुष्यत्वेन हस्तिनकता
स्तियकतानाद्युदत्वेन हस्तिस्मरणापत्तेः तथा च यद्धर्मविशिष्टे
शक्तितानं तद्धर्मविशिष्टमेव तत्स्मारयतीत्याकाशमात्रे शक्ता
वपि शब्दाश्रयत्वस्य स्मृतिसंभवः वस्तुतो यस्यैव शाब्दबोधविष
यत्वेन तत्त्वं न तु स्वरूपस्थाप्यस्वेति लक्षणतावच्छेदकता
तच्छाब्दबोधविषयत्वमपि ॥ अपैवं गौत्वमपि शक्यं स्यात् ।
यदि च विशेष्यवृत्त्येव संस्कारवशाद्विशिष्यस्मरणे लक्षणता
वच्छेदकवन्नियतस्मृतेरनुपपत्तिः रूपांतरेण शक्तिग्रहे संस्कार
विषयत्वधानात् किंचान्यसंस्कारोद्बोधे पदान्तमप्युत्तताकस्म
रणानपपत्तिः अनुत्तवविषयतायां अपि नियमेन ज्ञानसंभ
वाद्यदृशांके संबंधेनाम्नेररेव तदंशेप्युद्बोधकत्वसंभवा
त् ॥ उद्बोधकान्तरानुसरणे च लक्षणतावच्छेदकवत् ॥ नियतस्मर
णानापत्तेः ॥ तस्मात्पदानियतोपस्थितिः स्वसंबंधसाध्यासंबं

धः परिशेषात् वृत्तिरेव पर्यवस्यतीति पदान्वितोपस्थितिः वृत्ति
साध्येति नियमाद्दूरोत्सं शक्यमिति विभाव्यते तदा शब्दाश्रयत्वेपि तु
ल्यवदास्तां तदपि वाक्यं ॥ यदि नियमेन तदुपस्थितिः ॥ आकाशः
शब्दाश्रय इति अस्य वाकाशपदवाच्य इत्यपनैवोपपन्नत्वान्नय
यपि त्वेन सह प्रयोगानुपपत्तिः वस्तुतस्तु कदाचिच्छब्दाश्रयते
न कदाचिच्चाष्टद्रव्यातिरिक्तद्रव्यत्वेनाप्युपस्थितेर्ननियतां तदु
पस्थितिं न तेच्छक्यधर्म्मशैत्वद्बोधकादेवतुदर्शेप्युबोधसंभवा
त् ॥ शब्दबोधस्तत्वोपपन्नत्वात् ॥ यदि च संस्कारस्य कदाचित्
तद्दृशोनो बोधः ॥ तदा अस्तु वा पदादपि निर्विकल्पकं ॥ आकाश
पदादपि निर्विकल्पकं ॥ आकाशपदान्निष्प्रकारमेव स्मरणं शा
ब्दबोधश्च पदार्थान्तरमादाय सविकल्पक एव आकाशो द्रव्य
मित्यत्र नित्रवितत्त्वपनीत संख्यामादाय भिन्नप्रकारकोपस्थि
तिसत्वादन्वेदान्वयोनानुपपन्न इति द्रष्टव्यं ॥ अत्राहुः नियतानुप

स्थिताव्यपि विनिगमीकां मत्वावालकं अत्रादिपद्वृत्रानां [illegible] ना
नुपपत्तेः एकत्रधर्मिण्यपि शंवृत्तिनिमित्तद्वये बोधकाभावा
त् ॥ वस्तुतस्तु ॥ शब्दाश्रयत्वमवशात्परिवच्छेदकं अस्त्वनेजा
घवत्वत्वतरूपांतरेण बोधस्तच्छक्तिभ्रमात् ॥ कंबुग्रीवादिवदु
पपाद्यमिति तेन नाप्यत्वमपीति ॥ केचित्तु अन्त्रे रैवागतानति
प्रसक्त्या प्रयोजनभावेन धर्मेन शक्तिकल्पनमित्याहुः ॥ नि
र्विकल्पकोपस्थितावाकाशो आकांक्षादितानासंभवेन शाब्द
बोधानुपपत्तिः एकस्मैवचैकत्वस्योपपाद्यत्वात्तद्विवक्ष
यानुप्रवृत्ति विभिन्नत्वपर्यसंख्यामादाय विभिन्नप्रकारकोपस्थि
तत्वाचान आकाशोद्रव्यमित्यत्रेदात्वयानुपपत्तिरन्वेतिय
दान्निर्विकल्पकस्मृति स्वीकारो तु चितइत्यन्यइत्यादिक् ॥ नन्विम
तात्र बंधेन पदतानेन शाब्दसामान्येजननीयेशक्तिग्रहः सहकारिपाम
राणां च तदभावात् नशाब्द ॥ बोध इति विवेचितं नचेदं संभवति ॥ गंगा

त.कृ.
४५

यांघोष इत्यादौ गंगापदस्य तीरेऽन्वयबोधितत्वाद्बाधोद्धारादित्याशंक
ते॥ नन्विति॥ तीरे गंगापदस्य शक्त्यभावादिति भावः तत्त्वेन शक्तित्वेन
प्रयोजिकातात्पर्यतीशाब्दबोधोपयोगिनी। किंतु वृत्तित्वेनेति॥ प्रयो
जिकेति प्रवृत्त्यान्वितं॥ वृत्तित्वं च शक्तिलक्षणान्यतरत्वं॥ लक्षणैवेति
शाब्दसामान्ये वृत्तित्वेन हेतुतया गंगापदस्य तीरे लक्षणारूपवृ
त्तिसत्वेन सत्वात् तीरशाब्दबोधो नानुपपन्न इति भावः॥ ननु गंगायां घो
षः प्रवसतीति व्यवहारदर्शनात् गंगापदस्य तीरेपि कथं न शक्तिरि
ति चेन्न॥ लक्षणीयपदार्थानामनंततया सर्वत्र शक्तिकल्पने गौरवा
त्॥ शक्यसंबंधरूपा लक्षणानुकूलैव॥ एकसंबंधिज्ञानस्यापरसं
बंधिस्मारकतया गंगापदजन्योपस्थितेः॥ शक्यसंबंधरूपालक्षणा
जन्यतमपि तद्धर्मिवलक्षणाजन्योपस्थितेः शाब्दबोधानुकूलत्वमात्र
कल्पने॥ शक्तिस्वीकारे त्वतिरिक्तधर्मिकल्पना तद्धर्मकल्पनापातघौ
मरत्वादिति स्यापिन नीरे लक्षणैव॥ अथ शक्तिनीतिरिक्ता किंत्वीश्वरेच्छा ४५

रूपा सानुरूपैव एवं च शक्तेरपि क्लृप्ततया तज्जन्योपस्थितेः शाब्दबो
धानुकूलत्वमात्रमपि कल्प्यं इति न धर्मिकल्पनापाद इति स्यात् मा वधार
॥ नन्वस्माच्छब्दादुभयमपि बोध्य इत्याकारकेश्वरेच्छासत्वेपि तथा
स्मं गंगायां तीरबोधादपेनेश्वरेच्छायास्तादृशाकारकत्वाभ्युपगत्वा
त्॥ तस्याः सर्वविषयकत्वात् नन्वतादृशिर्ण्णकं परं नानुमानकं इति
गंगापदात्तीरबोधानुरूपा मा भवत्वितीच्छाकारकत्वमस्मिन्नपि वेतिवाच्यं
तपासति गंगापदस्यानुभावकत्वे तादृशाकारशक्त्यभावः तन्नस्य भावे
वानुभावकत्वमिति॥ अन्योन्याश्रयापत्तेः॥ अपतारशेच्छयोच्चरित
त्वं शक्तिः साधुमनार इति तत्र लक्षणैव अतएवाप्रभ्रंशेपि शक्तिभ्रम
इति चेन्न॥ ईश्वरोच्चरितत्वं हि जनकत्वं अपभ्रंशादिसाधारणपात्॥ न
त लंक तन्त्वाद्युच्चरितत्वं आधुनिकचैत्रादिपदे अभावात्॥ तादृशा
हेपि नामा मकुर्यादित्यादिना सामान्यतः नाममात्रेणैतदुच्चारणे यो पाद
तेना पभ्रंशेति तच्चैत्यादिना पभ्रंशत्वेन तदुच्चारणस्याप्यभ्रंशेपिस

लात्वैदिकपदस्यापि लक्षणिकत्वापाताद्दृशोच्चयोऽनुरित्वसत्वात्॥
लक्ष्येपि शक्यत्वापत्तेश्चेति चेत्॥ अत्राहुः॥ अपभ्रंशादपि शाब्दबोधो
दयेनास्माकं द्वारपतत्थाविधभ्रमस्याकारकैस्तदापास्तत्रापि सत्वान्नता
दृशाकारकैस्तदापामात्रं शक्तिः किंतु पदपदार्थसंसर्गकत्वविशेषविता
सा॥ तथाचतस्यानानार्थतीरादिसंबंधत्वकल्पनेगौरवात् इत्यादयः
संबंधग्राहकत्वस्य नूरिप्रयोगस्याभावाच्च न गंगापदतीरयोः संब
धत्वं किंतु प्रवाहसामीप्यस्यैवेतिक्रमक्रमेण वृत्तिरिति॥ किंचपि धेहा
तत्रहादस्योपस्थापकपदानामनंततयाविशिष्यानुपस्थितेः प
येतरपदमेवानुभावकं न लध्याकृतपदं तथा घोषपदादेवतीर
स्य बोधोपपत्तेन गंगापदं तीरानुभावकमिति तथा च गंगापदात्ती
रबोधोऽनुपपत्तामिति भ्याकारत्वमप्यसिद्धमेवेति दिक्॥ लक्षणानि
रूपयितुं पृच्छति॥ अथ केयमिति॥ शक्यात् गंगापदशक्यात् प्रवाहात्
शक्यस्य॥ गंगापदाशक्यस्य तीरस्योपस्थितिर्लक्षणेत्यर्थः॥ गंगा

पदेनशक्यात्प्रवाहोपस्थितौ तत्रान्वयानुपपत्तिप्रतिसंधानानंत
रं गंगापदात् पुनस्मृतेन प्रवाहेन एकसंबंधितानस्य च परसंबंधि
स्मारकं तया स्वमत्रधीतारमुपस्थाप्यते सैवोपस्थितिर्लक्षणेतिचा
कः॥ नुपस्थितिर्हेतुर्हि वृत्तिर्ननु इति॥ पदज्ञानस्य पदार्थस्मारकता
एकसंबंधिस्मारकमितिरीत्या सर्वसंबंधी वृत्तिरेव ननु तस्याउपस्थि
तिरूपत्वमित्यर्थः॥ सैव॥ उपस्थितिरेवेत्यर्थः॥ अशक्यइति॥ गंगायां
घोषइत्यादौ गंगापदाशक्येतीरे तात्पर्यं॥ गंगापदात् तीरबोधो नाय
तामिति तद्विषयत्वं तीर इति तदेव लक्षणेत्यर्थः॥ शक्येतात्पर्य
स्य लक्षणात्वबारणाय शक्येति॥ अन्वयेति॥ घटमानयेत्यादौ घट
कर्मत्वयोराधाराधेयत्वरूपसंसर्गेतात्पर्यसत्वात्॥ अन्वये लक्ष
णास्यादित्यर्थः॥ न चैषापत्तिः अन्वये न शक्तिः न वा लक्षणेति सिद्धां
तव्याघातात्॥ नन्वशक्यसंबंधस्य लक्षणात्वस्वीकारेप्येपदोपपत्तिवा
क्यं॥ अन्वयेशक्यसंबंधस्य सत्वेपि तस्य लक्षणात्वबोधानुपपत्तेरित

त.म.टी.
५१

यातच्छाब्दबोधानुकूललक्षणायास्तत्राभावात्॥ अन्यथा गंगा
पदस्य मुख्यपरत्वेपि शक्यसंबंधस्य तीरे सत्वात् लाक्षणिकत्वापत्ति
रिति लक्षणायास्तत्र मूकत्वमेवोपेयमिति॥ तात्पर्यस्य लक्षणात्वे
च अन्वये तात्पर्यस्य शाब्दबोधानुकूलत्वेन तत्र तच्छाब्दबोधोप
योगित्वं लक्षणायाऽउचरितत्वादिति ध्येन॥ ननु शक्यपदार्थतात्पर्यं
लक्षणा पदार्थत्वं धपदजन्यप्रतीतिविषयत्वं विषयता च प्रकार
ताविशेष्यतान्यतररूपा इत्थं च संसर्गस्य पदार्थत्वाभावादेव न
दोष इत्यत आह किंचेति॥ तात्पर्येति॥ वृत्त्या पदार्थोपस्थितौ सत्यां
शाब्दबोधे जाते न तत्प्रतीतीच्छयोच्चरितत्वरूपतात्पर्यनिर्वाहोन्य
यतिइति तात्पर्यातिरिक्ता वृत्तिरवश्यमुपेया न हि स्वमेव स्वनि
र्वाहकमिति भावः॥ ननु वृत्तेः शाब्दबोधनिर्वाहकत्वमेवोपेयतेन तु
तात्पर्यनिर्वाहकत्वमप्यत आह॥ शक्तेरपीति॥ नत्वापत्तेः॥ तात्पर्या
त्मकत्वापत्तेरित्यर्थः तथा सति शक्तिलक्षणयोरभेदापत्तिः॥ यदि ५१

च तात्पर्यादिवत्तिरिति प्रवादात्तत्र पैच पंचाप्यपीन्वयानुपपत्तात
न्निर्वाहकतया शक्तिः स्यादतिरिक्ता तदा लक्षणायामपि तुल्यमिति
भावः अत्र यद्यपि ईश्वरेच्छारूपशक्तेस्तात्पर्यात्मकत्वे इष्टापत्तिरे
व न तथापि वसामान्यशक्तेस्तात्पर्यात्मकत्वापत्तिरिति बोध्यं॥ स्वश
क्येति॥ स्वं लाक्षणिकं पदं तस्य यच्छक्यं तत्संबंधो लक्षणा इत्यर्थः
इदमेवोपपादयति अस्तीहीति॥ गंगायां घोष इत्यादौ गंगा
पदं तच्छक्यः प्रवाहस्तत्संबंधः संयोगादिरूपस्तीरे अस्तीति गंगा
पदस्य तीरे लक्षणा इत्यर्थः गौण्यापृथक्त्वं तरवादिमतव्यवच्छेदाय ल
क्षणायामेव तदन्तर्भावं दर्शयितुं लक्षणां विभजते साचेति॥ शक्य
संबंधरूपा लक्षणा चेत्यर्थः॥ तत्रा गौणीं लक्षयति सादृश्येति तद्भि
न्नत्वे सति तद्गतभूयोधर्मवत्वं सादृश्यं तदात्मकः शक्यसंबंधो
गौणीत्यर्थः॥ गौणीमुदाहरति यथेति॥ वाहीक इति वाहीदेशोद्भव
नरो गौर्बलीवर्द इत्यर्थः॥ अत्र वाहीके गवाभेदस्य बाधान्नु गोपदेनमो

समर्द्दमेलक्षणेति गौणसारूप्यं च नोगतजात्यमाद्यादिकमेव॥ तथा च जडो
मं दृश्च वाहीकन्तत्सजातीयबोधः॥ एवं च लक्षणायैवोपपत्तौ गौणवृत्तिरि
कृवृत्तिनोपेयालक्षणायामेव तदंतर्भावादित्याशयः॥ एवं सिंहो मा
णवक इत्यत्रापि गौणलक्षणा सिंहसदृशोपस्थितौ सिंहसदृशाभि
न्नो माणवक इत्यन्वयबोधो वसेयः॥ शक्यस्य पतिनद्यमेति सार
रूपान्यशक्यसंबंधरूपित्यर्थः शक्या मुदाहरतियथा आपुरिति॥ आ
पुपदस्या पुजनिकेलक्षणातत्राबुः पदशाक्यसंबंधो जनकत्वरूपोबो
ध्यः आपुजनिक निर्जंघनमित्यन्वयबोधः॥ ननु शक्यादशक्योप-
स्थितिर्लक्षणेति प्राचीनमते जालक्षणैकपदं नानुभावकमिति मवाद
ः संगच्छते लक्षणायो पस्थितिसंबंधेन पदस्यानुभावकतया गंगापद
जन्यतीरोपस्थितेरज्ञावाङ्गंगापदस्य तीराननुभावकत्वात् किंतु घो
षशब्दस्यैव तज्ज्ञानं प्रति तदन्वययोग्योपस्थापकपदत्वेन कारण
त्वात्॥ नचतज्ज्ञानं प्रति हेत्वानम्पदवृत्तिज्ञानजन्यपदार्थोपस्थि

तेर्हेतुतमा कुप्तमेव इति वह्व्यं॥ लक्षणावकतत्पद निरूपितशक्ति
ज्ञानजन्यतज्ज्ञानं बोधं प्रति तत्पदनिरूपितशक्तिज्ञानत्वेन हेतुत्वं
तादृशालक्षणाजन्यशाब्दबोधं प्रति च तादृशस्वरूपसत्वदायोपस्थि
तित्वेनैव हेतुत्वं न तुकरूपेण हेतुहेतुमद्भावः शक्यसंबंधस्य लक्ष
णात्वे तु तीरोपस्थितित्वेन तीरोपस्थिते गंगापदजन्यत्वात्॥ अन्वयप्र
तियोग्युपस्थापकतया अनुभावकत्वसंभवत्येव तिनादृशप्रवाद वि
रोधः॥ अपमन्यते गंगापदात् स्वशक्यसंबंधेन प्रथममेव तीरो
पस्थितिः तवमते तु पुनः शक्यस्मरणात् तस्मतो गौरवात् इतिचे
न्न॥ पदस्य स्वशक्यसंबंधेनान्वयप्रतियोगिस्मारकत्वस्याकृप्तस
त्वेन तत्कल्पने गौरवात्॥ एवं चस्यतेनप्रवाहेण स्वसंबंधितीर
स्यतेरेवौचित्यादितिचेन्नैव॥ गंगापदात्तीरानुपस्थितो प्रत्यपानां
प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिभंगप्रसंगापत्तेः प्रकृत्यर्थो
पस्थाप्यैव विभक्त्यर्थान्वयेति प्रसंगात्॥ अननुभावाञ्च प्रकृतिता

स्वपरविषयेण स्वार्थान्वयबोधकत्वेऽपि तथा धूमोऽस्तीति तात्पर्यविशेषे
ण वह्निना धूमपदोत्तरविभक्त्यर्थान्वयापत्तेः॥ तस्मात् गंगापद
स्यापि तीरस्मारकत्वमेवावश्यमुपेयं एवं च क्रमरूपसंबंध एव ती
रस्मारकत्वेन कल्प्यते न तु शक्तिः तां विनाप्युपस्थितेः तथा चान्वयप्रति
योग्युपस्थापकत्वात् लाक्षणिकस्याप्यनुभावकतापत्तिरवशिष्यते
सापि वदतां स्वशक्यानुभवं प्रत्येवकारणत्वावधारणादितरपदा
र्थेति सह स्वशक्यानन्वयानुभावकत्वेन क्लृप्तात् घोषपदादेव ती
रानुभवसंभवात् लाक्षणिकपदस्य नानुभावकत्वमिति रीत्या वा
रणीयेति॥ वस्तुतस्तु उद्देश्यविधेयभावेन लाक्षणिकपदस्य नानु
भावकत्वमिति तदर्थः उद्देश्यविधेयभावेनान्वये शक्तिमत्त्वस्यैव प्र
योजकत्वात् अत एव जात्यादेर्विधेयतयैव ज्ञानात् वृक्षादेरपि
विधेयतयैव ज्ञानान्न विधौ परः शब्दार्थ इति संगच्छते किं तं
तुसंयोगस्य परसंयोगहेतुत्वतात्पर्यके तंतुः परं करोतीति समवेता

लाक्षणिकस्थलेऽन्वयानुभवोपस्थितिर्लक्षणेति मते लक्ष्यतावच्छेद
के लक्षणा नास्तीति प्रवादव्याघातः शक्यसंबंधो लक्षणा न तु शक्य
संबंधस्य लक्ष्यलक्ष्यतावच्छेदकोभयसाधारणस्यैकस्याभावादनुप
पत्तेरिति॥ न॥ त्वन्मतेऽपि यत्र लक्ष्यतावच्छेदके लक्ष्ये चोभयसाधार
णं शक्यसंबंधि तत्रागतेः॥ लक्ष्यमात्रवृत्तिना निरूपकसंबंधेन त
स्य लक्षणोपगमे ममापि तत्र लक्ष्यमात्रवृत्तिविषयतासंबंधे
न तथोपस्थितेः॥ लक्षणोपगमादिति॥ एतेन लक्ष्यतावच्छेदके
लक्षणा नास्तीत्यस्य लक्ष्यतावच्छेदकप्रकारकशक्यसंबंधरूपलक्षणाग्र
होनापेक्षत इत्यर्थः यत्र चोभयसाधारणशक्यसंबंधस्तत्र लक्ष्यवृ
त्तित्वेनैव तत्संबंधग्रहोपेक्षा न तु लक्ष्यतावच्छेदकवृत्तित्वेनापि श
क्यतावच्छेदकविशिष्टे शक्तिग्रहाच्छक्यतावच्छेदकेऽपि विशेषण
विधया शक्तिज्ञानमपेक्षितमिति परास्तं॥ लक्ष्यमात्रवृत्तिविषय
तासंबंधेनोपस्थिते विशिष्टबोधप्रयोजकत्वस्य ममापि तुल्यत्व

ताहिति॥ इदंचात्रबोध्यं॥ शक्तिलक्षणातानयोरेकएवायकारणत्वाव
:तथाहि शक्तित्वावच्छिन्नसांसर्गिकविषयतानिरूपितपदनिष्ठप्रका
रतानिरूपितायनिवृत्तिविशिष्यताकज्ञानत्वेनशाब्दबोधंप्रतिकार
णत्वंशक्तिसंबंधेनशाब्दसंबंधेनवापदप्रकारतानैशक्तिः संसर्ग
त्वात्शक्तित्वनिष्ठावच्छेदकतापर्यायपर्याप्तिः परंनविरूपते॥ तेनशाब्द
संबंधेनपदप्रकारकज्ञानस्यापिसंग्रहः परंतुपदप्रकारतानिरूपि
ताःशक्तिनिष्ठायासांसर्गिकविषयतासानाविशेष्यतानिरूपिता
तेनशक्तिसंबंधेनपदाभावप्रकारकबाधबुद्धिप्रतिवध्यत्वंनलक्ष
णाज्ञानस्यतिबोध्यं॥ शाब्दसंबंधस्याविनाभावइतिप्राञ्चइत्तन्न
॥ संबन्धः कोशज्ञानात्मज्ञाभावात्तत्रापितत्त्ममपमादायाविनाभावोपपी
दनेपिकिमनेनशाब्दसंबंधमात्रस्यैवलक्षणालौचित्याकञ्च विना
भूतबोधस्यतात्पर्यज्ञानाभावेनैववारणीयः अनेकाविनाभूतसत्त्वे
पिएकतरज्ञानंतात्पर्यविषयादेवेतिभवतोपिवाच्यत्वात्॥ मंडपंभोज

येरित्यादौरूढिपूर्विकालक्षणेतिमीमांसकाः॥ मंडपपदस्यगृहवि
शेषेरूढिः मंडपानकर्त्तरिचयोगः रूढिः समुदायशक्तिः योगोवयवश
क्तिः॥ तत्ररूढेर्योगापहारितितिप्रवादात्तत्रावयवशक्त्यामंडपानकर्तृ
बोधासंभवेनमंडपपदस्यमंडपानकर्त्तरिलक्षणाइत्थंचरूढ्यर्थ
गृहसंबंधितावच्छेदकतयागृहीतचैत्रत्वादिनान्वयबोधोनतुमंड
पानकर्तृत्वेनेतिपंकजनित्यादौतुपद्मस्वरूपयस्यपंकजनिकर्तृत्व
योगार्थस्यविरोधाद्रूढ्यर्थस्यैवपंकजनिकर्तृबोधः॥ ननुशक्यार्थपरत्वे
संभवतिलक्षणाकल्पनमसाध्यं॥ नचरूढेर्योगापहारात्तत्रापीतिवा
च्यं॥ कोयंअपहारः नएतावद्योगिकार्थस्योपस्थितिः सूक्ष्मपद्मवद्योगि
पिस्मारकसंबंधस्यशक्तेस्तुल्यत्वात्॥ नचयोगार्थस्यअपमन
स्मृतिः सइतिवाच्यं॥ मंडपसमुदायेनपदार्थस्यापस्मरणांतराश्र
वयवार्थस्मरणेबाधकाभावात्लक्षणापक्षेपिपदारूढ्यर्थेनस
संबंधिस्मरणांतराश्रवयवार्थस्मरणसंभवेनयोगिकान्वयधी

पसंत्रवात् नन्वस्य तत्साध्यपदवाच्यस्यान्वयबोधकत्वं हि मंतव्यमेव स
इति वाच्यं॥ अयोग्यत्वात् रूढ्यर्थस्यान्वयबोधाभावेपि यौगिकार्थसि
द्धेर्बाधकाभावात्॥ अथ मंडपपदस्य सर्वत्रापि योगे प्रयोगप्राचुर्य
भावादेव यत्र क्वापि कुंडनं कल्प्यते॥ अन्यथानेकार्थकादिपदादि
वं मंडपानकर्तृत्वगामी पिकदाचित्स्यादिति चेन्न॥ तन्त्रैव पक्षे सिद्ध्यान
पतिसा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्यत्र वाजमन्नमामिक्षा
रूपं येषामिति योगाद्वाजिपदेन विश्वेदेवा उच्यंते॥ ननु रूढ्याश्व
इति सिद्धांतस्तु न स्यात् न चात्रं विश्वेदेवेषु वाजिपदप्रयोगप्रा
चुर्यमस्ति॥ मंडपानकर्तरि किराविरपि मंडपपदस्य योगेन प्रयो
गो नास्तीति तु नैवाभिमान इति॥ मैवं पदा मंडपपदात् गृह
विशेषस्मृतिस्तदैव मंडपाद्यर्थस्मृतिस्तदुत्तरं पि बलवत्त्वात्
दनंतरं॥ अस्य यास्य पतिनो मंडपानकर्तृत्वेन तात्पर्ये तिथौ गिकार्थस्य
तिविजं वात्तन्न देव रूढियौगिकयोर्बलाबलं विनाधिकृतमेव॥ तथा

च रूढ्यर्थस्मिन्नाघ्रमुपस्थितत्वाद्बलवत्त्वमौत्सर्गिकं यत्र तु यौगिका
र्थस्य प्रमाणवशात्प्रथममुपस्थितिस्तत्र रूढेर्योग एव बलीयान् य
था अश्विर्वसुभिः सोमाहरदिंद्रो मरुद्भिरुद्रैर्वरुण आदित्यैर्बृहस्प
तिर्विश्वैर्देवैः पदेन स्मृतिः ननु रुद्रा रुद्र वो मार्दव॥ अन्वतिगणानामु
पस्थितिः एवं तन्त्रेपि पक्षे सिद्ध्यानपतिसा वैश्वदेव्यामिक्षा वाजिभ्यो वा
जिनमित्यत्र वाजिपदमिक्षारूपं येषां ते वाजिन इति योगाद्वाजिनो
पि विश्वेदेवा देवताकत्वं प्रकरणेनोपस्थितत्वात्॥ ननु वाजिपदा
द्रूढ्याश्वानामुपस्थितिरिति वाजिनामिक्षाधिकरणसिद्धांतव्याघातः न
च रूढेर्योगः बलीयस्त्वेन रूढ्यर्थधारिवस्मादिति वाच्यं रूढ्यर्थयोगा
र्थयोरुपस्थिताव तु पस्थितौ वा रूढेर्बलीयस्त्वं प्रकृते तु प्रकरणे
बलीयस्त्वोगार्थस्यैव स्मरणात् ननु रूढार्थस्य प्रकरणेनोपसं
स्कारस्ये वशाद्बोध इति ताह्वेन प्रकरणमं बलिनेन योगार्थस्म
तिरेवजन्यते॥ ननु रूढ्यर्थस्मृतिरिति॥ नचैवं मंडपादाव पियोगा

त॰ प्र॰ यस्यैव प्रथमं स्मृतिसंस्कारेण न लक्षणेति वाच्यं॥ अत्र प्रकरणादेरभा
५६ वाद्रूढ्यर्थस्यैव प्रथमं स्मृतिरिति रूढिपूर्विका लक्षणा॥ यत्र च यौगि गा
२ प्रकरणाद्यवतारस्तत्र योगार्थस्यैव बलवत्त्वात् न लक्षणा यद्यपि य
दृताभिनेवाधकं न प्रकरणादिकं तथाप्येकतरप्रकरणायपरस्मृ
तिप्रतिबंधकमवश्यमिति वदंति॥ तन्न॥ रूढ्यर्थान्वयबोधाभा
वदशायां योगिकार्थान्वयबोधे प्रतिबंधकानतावदाद्यः॥ रू
ढ्यर्थस्य प्रथममुपस्थितत्वेपि तस्या योगिकार्थान्वयबोधेबा
धकाभावात्॥ न द्वितीयः॥ प्रकरणादेर्यत्र योगिकार्थान्वयबो
धस्तत्र रूढ्यर्थस्मृतेरजातात् तस्याः प्रतिबंधकत्वोपपत्तावपि
तस्या योगिकार्थस्मृतेर्नान्वयबोधे वा प्रतिबंधकत्वे मानाभा
वात् साक्षाद्विरोधिनोत्वान्यजनकत्वान विघटकत्वेनैव प्रति
बंधकत्वात् अनुमितौ तु सिद्धेरत्वागफलवत्वेनन यात्वकल्पना ५६
त् तस्मायत्र मंडपपदस्य गृहपरत्वं हैव त्र मंडुपानकर्तृत्वं सूपयोग्या
त रू

यस्या योग्यतया नान्वयबोधो न तु रूढ्यर्थस्मृतिस्तत्र प्रतिवधि
का योग्यत्वरूपप्रकारेण विरहेणैव तद्बोधाययत्तिः यत्र तु
रूढ्यर्थस्य योग्यता तत्र योग्यतया योगेन योगिकार्थबोधो न व
सेवरूढे योगापहारप्रवादस्त योग्यत्वात् रूढ्यर्थस्यान्वयबोधो
न तु योगिकार्थस्य अयोग्यत्वादित्येतत्सरीनतु योग्यतादिमतो
पि योगिकार्थस्य नान्वयबोध इत्येतत्परः यत्र च रूढ्यर्थगृहस
बंधि चैत्रत्वादिनानास्य यंप्रमाणांतरादेवधायते केचित्तु पदेना
योगिकिमथपिरत्वं तदज्ञाने स्वपरत्वं तथात्व प्रत्यक्षेण पदजन्यो
पस्थितिसत्वाच्छाब्दतादानमित्याहुः॥ तन्न प्रत्ययानां प्रकृत्यर्थान्वित
स्वार्थबोधकत्वनियमे वतन्त्र विशेष्यतान्वयानुपपत्तेः इति लौका
रस्याप्रवृपकत्वात् अत एव पदस्य स्वबोधकत्वं इति विनैव सत्वाय
त्॥ अन्येत्तु हि अन्यबोधने अतिप्रसंगात् इत्तिः कस्यास्य स्वबोध
कत्वेत्वे तु नैवमित्यादिपदस्यार्थान्वयानुपपत्तेः सहकारित्वाद्धनस

वन्नत्वबोधप्रसंग एवं सत्त्वोधिते तस्मिन् विवक्ष्यपर्याप्तियोगीति निर
स्तं॥ प्रत्ययानामिति ब्युत्पत्तिभंगप्रसंगात्॥ नन्वेवं निरर्थकजलदग
उदगशाम्याहित्यादौ स्वशक्यजावावच्छलक्षणानुपपत्तिरिति वाच्यं॥ प्रत्येकव
र्णेषु दंडोत्तरम्भूयमाणक्रियापदार्थान्वयान्तसमुदायस्योच्चारण
संभवेन तत्र तदन्वयात्॥ तेषां च शाक्तत्वेन तत्रैव लक्षणोपगमा
दिति॥ गुणाश्रुत्यादयः पुंसि गुणि लिंगास्तद्वतीत्यादौ कोशस्योत्त
पदशक्तिबोधकत्वेपि नीलादिपदानां धर्मे शक्तिः॥ धर्मिणि लक्षणा
मञ्जरशाद्धेतु मात्रपर्यं धर्मे धर्मिणि च शक्तिरिति संप्रदायः॥ नीला
दिपदवत्पाचकादेः धर्मे शक्तिः धर्मिणि लक्षणा नव्यमञ्जरशाब्दस्यध
र्मेधर्मिणि च तुल्यवत्प्रयोगात्तदुभयत्र शक्तिरिति वाच्यं॥ नीलादि
पदस्यापि गुणि तत्प्रयोगप्राचुर्यात्॥ धर्मिणि लक्षणोपपत्तौ न त
त्र शक्तिरिति तु॥ नव्यमञ्जरशाब्देपि धर्मे शक्तिः धर्मिणि लक्षणेत्य
पे॥ अत्र तु पविक्तौ न लक्षणा सर्वनाम्नि न लक्षणा वादिवाक्येन ल

क्षणा विधौ न लक्षणा विधेयार्थे न लक्षणा विधेयताशालिबोधं
शक्तितानकार्यतावच्छेदकं लक्षणयाशाब्दबोधस्तत्र विधेयताशा
लीति न व्यभिचार इति विधेयता लक्ष्यार्थबोधे नास्तीति प्रवादवी
जं॥ लक्षणैकपदं नानुभावकमिति प्रवादस्योद्देश्यविधेयभाव
नान्वयोनास्तीत्यर्थः एवं विशिष्टवाचकानां पदानां विशेष्यमात्र
परत्वेन लक्षणा॥ शक्यार्थेन रूपेण तानेव ति लक्षणा लक्ष्यता
वच्छेदकेन लक्षणेत्यादि प्रवादा अनुसंधेयाः॥ केचित्तु॥ लक्ष्यताव
च्छेदके लक्षणा या अकल्पने गौरवेपि शक्तिविनोपप्रसंगः॥ वस्तु
पस्त्वाप्यसौ च शाब्दबोधविषयत्वात्तत्त्व शक्तिकल्पने लक्ष्यताव
च्छेदकेपि न यथा॥ अपतीरमलेन उपस्थिति विना तीरं गंगायाइ
ति संबंधापत्रुभावात्तत्र न लक्षणेति चेन्न॥ यद्दोनेत्यादौ यथा त्र
लिपोगितावच्छेदकत्वं संसर्गमर्यादया लक्ष्यते न यागंगापास्ता
रमित्यत्र तीरत्वेपि सामीप्यावच्छेदकत्वं संबंधो भासते संबंधाग

द्वेचपारद्धं मस्यानं तथैव तत्स्मरणं तथा च जन्यतावच्छेदके
परंपरासंबंधरूपा लक्षणैवेति भावः ॥ राजपुरुष इत्यत्र शक्त्या
लक्षणया वा राजसंबंधिपुरुषबोधानुपपत्तिरिक्तवृत्तिरवश्यमु
पेयात्तथा च कृपं शक्तिलक्षणे एव वृत्ती इत्युक्तमित्यत्ति प्राच्यमता
नुशक्तेनान्विति ॥ एतेएवशक्तिलक्षणे एवएवकारेण तु स्वंत
रव्यवच्छेदः ॥ षष्ठ्यर्थेति तत्र षष्ठ्याः शक्तत्वेन राजपदादेश्च सं
बंधेशक्त्या घसंज्ञवात्मकपसंबंधबोध इत्यर्थः तदेवाह नही
तिनतु प्रकारतया विशेष्यतया वा बोधे वृत्तेरपेक्षा न तु संसर्ग
मर्यादया अवतयाच घटमानयेत्यादौ घटकर्मत्ययोराधारा
धेयतारूपसंसर्गवत् राजपुरुष इत्यत्रापि स्वस्वामिभावरूपसं
बंधज्ञानं वृत्तिं विनैव स्यादित्याशंकते ॥ अयेति ॥ नीत इति ॥ नी
जपदस्य निरूढलक्षणया नीजविशिष्टमर्थः तस्य चंडस्पेद संस
र्गेण घटेनान्वय इत्यर्थः ॥ तथा च यथा नीज घटयोरुभेदः सं

सर्गमर्यादया भासते तथा षष्ठ्यन्तपुरुषेपि सस्वसेवकभावल
क्षणः संबंधविधयैव भासत इत्याशयः ॥ नद्यापन्ने रिति ॥ षष्ठ्यर्थसं
बंधज्ञानापत्तेरित्यर्थः राजपुरुष इत्यत्रैवानापि संसर्गस्य संबं
धविधया भानापत्त्या राजसंबंधी पुरुष इत्यन्वयबोधापत्तेरि
त्याशयः ॥ ननु घटः कर्मत्वमानयनं कृतिरित्यत्र घटमानयेत्यत्रेवा
धेयतासंबंधेन कर्मत्वे घटान्वयबोधापत्त्या घटकर्मकानय
नानुकूलकृतिमानित्यन्वयबोधापत्ते नमित्याधेयत्वेनातिरिक्त
संबंधेनान्वयबोधोनस्वीक्रियत इत्यवश्यमुपेयः एवंच राज
पुरुष इत्यत्र कथं अभेदातिरिक्तसंबंधेनान्वयबोधोन स्वीक्रिय
त इति पाठ्यपसीमांसां कते ॥ अथेति अभेदेनैवेत्येवकारेण भे
दातिरिक्तसंबंधव्यवच्छेदः एवकारार्थस्य स्पष्टयति नन्वित्यर्थेति न
न्वयथा ॥ ननु अभेदातिरिक्तसंबंधेनेत्यर्थः ॥ नन्वेवं तिप्रमेया
ताजावइत्यत आह ॥ तथैवेति ॥ अन्यथा घटः कर्मत्वमानयनं

कृतिरित्यत्राप्याधेयतासंबंधेन घटीयाकर्मतायां त्वन्वयबोधा
पत्तेरिति भावः॥ ननु राज्ञः पुरुष इत्यत्र राजपुरुषयोरभेदातिरिक्त
संबंधेनान्वयबोधोदयाभावात्तादृशनियमस्य तत्राह राज इति ना
मार्थयोर्द्वयोरेव न तथान्वयः राज्ञः पुरुष इत्यत्र तु षष्ठ्यर्थस्य ना
नाप्रसिद्धत्वाभावेन भेदातिरिक्तसंबंधेनापि अन्वयो नानुपपन्न
इत्यर्थः विभक्त्यर्थेति॥ षष्ठ्यर्थसंबंधनामार्थपुरुषयोरित्यर्थः
षष्ठ्यास्तन्नामत्वं स्वस्यांतमेव नामेष्टमित्यत्रिमुक्तविरुद्धत्वा
दिति भावः॥ ननु राज्ञः पुरुष इत्यत्र सेव्यसेवकभावलक्षणसंबं
धेन राजप्रकारकपुरुषविशेष्यकोऽन्वयबोधो भवति यथा घ
टमानयेत्यत्र कर्मतासंबंधेनानयनीयस्य घटो मुख्ये तीतिरि
क्तानात्॥ तथात्वे तन्नियमभंग इति चेन्न॥ तस्यैकदेशिमतत्वात् म
न्मते तु नामार्थयोरभेदातिरिक्तसंबंधेन साक्षादन्वयबोधो न स्वी
क्रियत इति नियमात् विभक्त्यर्थमद्वाराकृत्य नामार्थयोरभेदाति

रिक्तसंबंधेन नान्वय इति यावत् प्रकृते च संबंधस्य विभक्त्यर्थ
त्वात्तद्वारा तथान्वयबोधोपगमे विकृतिविरहात् इति ध्येयम्॥
नहीति॥ तादृशनियममनुपेत्य राजपुरुष इत्यत्र तथान्वयबा
रतेहीत्यघः नयोः राजपुरुषयोः तथाऽन्वयः अभेदातिरिक्त
संबंधेनान्वयः विभावनीयमिति तादृशनियमाभ्युपगमे राज
पुरुष इत्यत्रैव तथान्वयबोधापत्तिः अनुपगम्येऽस्त्रापि न त
पास्यादित्यर्थः॥ ननु राजपदस्य राजसंबंधे लक्षणैवास्तां राजपु
रुष इत्यत्राभेद एव नान्वयो ण्याचासतेन संबंधे लक्षणे लाङ्कते
अयेतिरूपापीति राजपदस्य राजसंबंधलक्षकत्वेपीत्यर्थः इ
तिवदिति॥ इति वाक्यवदित्यर्थः नामार्थयोरभेदातिरिक्तसंब
धेनान्वयस्याव्युत्पन्नतया राजपदार्थस्य संबंधस्याश्रयाश्रयी
भावसंबंधेन पुरुषेऽन्वय इति भावः॥ न दोष इति॥ राजसंबंधी
पुरुष इत्यत्रान्वयानुपपत्तिरूपदोषतादवस्थ्यादित्यर्थः॥ ननु राज

पदस्य राजसंबंधलक्षकत्वसत्त्वेपि राजपुरुष इति वाक्यमेव राज
संबंधिपुरुषलक्षकमस्त्वित्याशंकते ॥ अथेति: समुदाय एव राज
पुरुष इति वाक्यमेव ॥ शक्तिविरहे ॥ वाक्ये कुत्रापि शक्तिविरहे ॥ ल
क्षणायाः ॥ वाक्ये लक्षणायाः अयोग्यत्वादित्यर्थः न तु गंगापदस्य ती
रे शक्त्यभावेपि यथा तीरलाक्षणा एवं वाक्ये कुत्रचिदपि अर्थे शक्त्य
भावेपि लक्षणा स्यादत आह स्वशक्येति ॥ तथा च लक्षणायाः शक्तिघ
टितत्वात्तदभावे तदनुपपत्तिः तीरे गंगापदस्य शक्त्यभावेपि गंगा
पदशक्यप्रवाहसंबंधसत्वात्तत्र लक्षणोपपत्तिः अत्र तु वाक्ये कुत्र
चिदप्यर्थे शक्तेरभावेन लक्षणा अनुपपन्नेति भावः ॥ सर्वथानिरा
जसंबंधिलक्षकमित्यर्थः क्वचित्तथैव पाठः ॥ ननु नामार्थयोरन्वय
बोधो न स्वीक्रियत इति कथं पुरुषपदार्थे तदन्वय इत्यत आह तथा
चेति ॥ राजपदस्य राजसंबंधिलक्षकत्वे चेत्यर्थः ॥ अभेदेनैवेति ॥ अ
भेदसंबंधेनैवेत्यर्थः ॥ अन्वयः राजसंबंधिपुरुषयोरन्वयबोधः

:नामार्थयोरभेदातिरिक्तसंबंधेनान्वयो न स्वीक्रियते न त्वभेदेनापि
तदस्वीकार इति भावः ॥ तथैवमिति ॥ षष्ठीतत्पुरुषेपि विशेषण
विशेष्यवाचकपदार्थयोरभेदान्वयस्वीकारे इत्यर्थः ॥ अभेदे कर्मधा
रयपद इत्यनेनाभेदबोधस्थले कर्मधारयं विधास्यतीति भावः ॥ स
माधत्ते ॥ समासेति लक्षणादि वाक्यार्थान्वयानुपपत्त्या स्वीक्रियते स
मासपूर्वं तु राजपदादौ लक्षणा अनुपपत्तेरभावात् तथा च समा
सपूर्वं विशेषणविशेष्यवाचकपदयोः समानार्थकयोः तुल्येति ॥ ए
कविशेष्यकबोधजनकत्वाभावादित्यर्थः पदे तुल्याधिकरणे विज्ञेय
:कर्मधारय इत्यनुशासनादिति भावः ॥ ननु राज्ञः पुरुष इत्यत्र संबं
धप्रकारकबोधः राजपुरुष इत्यत्र संबंधिप्रकारक इति विग्रहवाक्य
समासवाक्ययोः समानार्थकत्वभंगापत्तिः ॥ समानार्थकसमासजन
कवाक्यस्यैव विग्रहवाक्यत्वादिति राजसंबंधी पुरुष इत्येव विग्रहवा
क्यं वाच्यमिति कर्मधारयसापत्तौ तत्पुरुषोच्छेदः नन्वशक्त्या अभेदप्र

स.प्र. तियोगुपस्थापकैकमधारय इति वाच्यं॥ नीलोत्पलमित्यादौ नीलपदस्य
६१ नीलविशिष्टशक्यत्वाविनकर्मधारयत्वाद्बाधापत्तेः तस्माद्राजपदस्य
राजसंबंध एव लक्षणा स्वीकर्तुमुचिता॥ न च राजसंबंधः पुरुष इ
ति वदनं चपापतिरुक्तेन नामार्थयोरिति व्युत्पत्तेरिति वाच्यं॥ घटो
नेत्यादौ नामार्थयोरप्यन्वयस्य दृष्टत्वात् अव्ययातिरिक्तनिपातात्ति
रिक्तस्थल एव तादृशनियमास्युपगमाच्च समासातिरिक्तस्थल एवम
मपि तादृशनियमाभ्युपगमात्॥ नन्वेवं राजपदे लक्षणा वैयर्थ्यमिति
वाच्यं॥ व्याससमासयोः समानप्रकारकबोधजनकत्वात्॥ नचैवं रा
जपुरुषे लक्षणयैवैकरूपसमानार्थकत्वनिर्वाहायैव संबंधे लक्षणा
भ्युपगमात्॥ संबंधप्रकारकबोधस्यानुभवसिद्धत्वाच्चेति॥ नैवं॥
समानविषयकबोधजनकत्वमित्येव हि समानार्थकत्वं न तु समान
प्रकारकबोधजनकत्वं तत्॥ आरूढवानरो वृक्ष इत्यत्र आरूढः वानरो
यमिति विग्रहात् तत्कर्मकारोहणकर्त्ता वानर इति बोधेन समासाच्च ६१

वानरकर्त्तृकारोहणकर्मवृक्ष इति बोधेन भिन्नप्रकारकबोधस्यैवो
दयेन व्यभिचारात्॥ एवं प्राप्तोदको ग्राम इत्यादावपि प्राप्तमुदक
यमिति विग्रहात् यत्कर्मकप्राप्तिकर्तृक इति समासाच्चोदककर्तृक
प्राप्तिकर्मतो ग्राम इत्यन्वयबोधात्॥ अपि च बहुव्रीहेर्विग्रहतया
भासमानविग्रहवाक्यत्वं चित्रगुरित्यत्र चित्रा गौर्यस्येति समासार्थकथ
नं न तु विग्रहः समासमानपदैरेवार्थकथनस्य विग्रहत्वादिति चेन्न
नहि तत्र विग्रह एव नास्तीति ब्रूमः समासारंभकवाक्यस्यैव विग्रह
त्वात् किंतु बहुव्रीहौ तस्यासाधुत्वं समस्यमानपदैरेव विग्रहस्य
साधुत्वात्॥ अत एव बहुव्रीहौ विग्रहस्यासाधुत्वात्पतनापत्तेर्नि
त्यसमासत्वाभिधानं॥ एतदेवन्वा विग्रहो अस्वपदविग्रहो वा नित्य
समास इति लक्षणं॥ अपि समस्यमानपदैरेवार्थकथनरूपवि
ग्रहस्य चारइति चेन्न॥ अप्रयोजकत्वात् वस्तुतस्तु॥ नामार्थयोरभेदे
नैव व्युत्पत्ते॥ संकोचे मानाभावात् संबंधिनि लक्षणायाश्चावश्यक

त्वे समानविषयकबोधजनकत्वमित्येव कल्पनात्॥ ननु समानप्र
कारकबोधजनकत्वरूपसमानार्थकत्वमिति चेत्॥ षष्ठ्येवेति॥
स्मृतास्मृतीति शेषः। एवं च षष्ठ्या एव संबंधोपस्थितेः सत्वात्प्रयोज्यतया
वसंबंधेन पुरुषे ज्ञासत्तेनामार्थयोरेवाभेदातिरिक्तसंबंधेना
न्वयबोधनिषेधादिति भावः। ननु यस्य न षष्ठीलोपज्ञानं तस्य लु
प्तषष्ठीस्मरणासंभवेनान्वयबोधानुपपत्तिरित्यत आह षष्ठीलो
पमिति॥ अजानतः अनुभवतः शक्तिभ्रमात् राजपुरुष इति स
मुदायस्य राजसंबंधिनि पुरुषे शक्तिभ्रमात्॥ ननु राजपदस्य श
क्तिभ्रमादित्यर्थः॥ तथा च सति राजपदलक्षणया वेति राजपदस्य
लक्षणयैव सहान्वयप्रकृष्टनानुपपत्तेरिति ध्येयं॥ नन्वेवं तत्र शक्ति
भ्रमाच्छाब्दबोधस्वीकारे तत्र दोषादीनां अननुगतानां नियामकत्व
कल्पने। नियमतस्तत्र वृत्तिज्ञानदोषकल्पनेन गौरवमत आह॥ रा
जपदेति॥ पूर्वकल्पे तु राजपदस्य राजसंबंधिनि निरूढलक्षणा एत

न्नेतु षष्ठीलोपस्मरणासंभवस्थले राजपदे स्वारसिकी लक्षणाइ
दमिव च लाघवमिति भेदः। न च कुत्रस्य राजमातंगाइत्यादावेतन्म
ते लुप्तषष्ठीस्मरणस्यावश्यकत्वेन समानविभक्तिकत्वेनाभेदान्व
यबोधापत्तिरिति वाच्यं॥ नहि समानविभक्तिकत्वं निबंधनमभे
देनान्वयानुभवकत्वं। किंतु समासघटकपदसापेक्षत्वात
दभावेन सविशेषणानां वृत्तिर्न वृत्तस्य विशेषणयोगो नेति नि
यमात् न चैवं छत्रैः शातितपत्रः चैत्रस्य दासभार्या इत्यादौ शारकर
णत्वचैत्रनिरूपितत्वयोः समानविशेषणीभूतज्ञातत्वदासत्व
योः कथमन्वय इति वाच्यं अभेदेनान्वये तथा नियमात् स्तोकं पद
तीत्यादावभेदान्वयानुरोधेन समानविभक्तिकत्वनियमस्य विरु
द्धविभक्तिरादित्यमित्यर्थकत्वावश्यकतपान्वमते प्रागतेव॥
स्वोचकुरित्यत्रैव स्वरसोऽन्वतां तदीनं तु कथित्समास पूर्वविग्रहश्र
वणस्य समासार्थकथनपरतया विग्रहश्रवणस्य सर्वत्र नावश्य

त.प्र.
६३

कृतपाजुग्नषष्ठीस्मरणकल्पने गौरवात्॥ किंच राजसंबंधिनिस्वा
रसिकजन्यत्वग्रहस्थलानुरोधेन राजसंबंधिप्रकारकबोधे तादृश
समभिव्याहारज्ञानस्य कारणत्वकल्पनापेक्षावश्यकतया तत्र नि
रूढलक्षणापराववगाप्यत्वात्॥ नन्वसंबंधिनि लक्षणातात्पर्यस्यादर्श
नादिलकल्पनमेव निरूढलक्षणाकल्पनागुरुः अनादितात्पर्यवि
षयानृतापि निरूढलक्षणायाव निरूढलक्षणात्वादिति वाच्यं निय
मतो लुप्तषष्ठीस्मरणकल्पनामपेक्ष्य तात्पर्यस्यानादित्वकल्पना
या एव मुक्तत्वात्॥ न चैवं दधि पश्यतीत्यादावपि दधिपदस्य दधि
कर्मके लक्षणापत्त्यानत्रापि लुप्तविभक्त्यनुसंधानं विना पि बोधा
पत्तिरिति वाच्यं तत्र दधिपदस्य दिन पितर विलक्षणतत्तत्क्रमद
र्शनाया दधिकर्मकः पश्यति दधिकर्मकेण पश्यतीत्यत्रैवान्वयबोधे
नैकत्वापर्के विभक्तिं विना निराकांक्षः तेन तदनुसंधानस्यावश्य
कत्वात्॥ समासस्तु जैरन्यथैव प्रसक्तिः अत एवाग्निनोदनं पच

६३

६

निसाहौ ... पदाऽसिमर्थानि तु तदर्थकाणि अग्निकरण
कौदनकर्मकपाककर्तृनिरिष्टसाधनमिति तु वाक्यं न पदमित्यु
क्तमिति॥ समासस्त्विति॥ घटमानयेत्यादिसमुदायवारणाय
समा..स्तु इति राजपुरुष इत्यादिसमासवाक्यसंग्रहः॥ विशिष्टा
र्थे राजसंबंधिपुरुषादिरूपे विशिष्टार्थे॥ शक्तिरेवेति॥ तथा च
समासशक्त्यैव विशिष्टार्थबोधोपपत्तौ नातिरिक्तवृत्तिकल्पनमि
तिभावः॥ एवं समासे शक्तिस्वीकारे॥ राजपदेति राजपुरुष इत्यत्र
राजपदं राजनि शक्तमिति शक्तिज्ञानसत्त्वकाले पि राजपुरुषपदं रा
जसंबंधिपुरुषे शक्तमिति शक्तिज्ञानसत्त्वेन तादृशबोधोपपत्ते
रित्यर्थः॥ समस्तेति॥ समासस्तु जैर्विशिष्टार्थे शक्तिग्रहादित्यर्थः॥
न चेति नहि त्वर्थः॥ अवयवशक्तिग्रहे॥ राजपदादिशक्तिग्रहे॥ अ
नुशासनग्रहः॥ अनुशासनजन्यः विशिष्टार्थे शक्तिग्रहः॥ तच्छक्ति
ग्रहस्य॥ अवयवशक्तिग्रहस्य॥ समुदायग्रहे॥ समुदायशक्तिग्रहे

त.प्र. ६४

हेतुत्वादिति॥ व्यवहारादिना नात्र शक्तिग्रहः। किंतु व्याकरणादिनः॥ व्या
करणेन हि प्रत्येकशक्यराजपदादिसमुदायो विशिष्टार्थे शक्त इति
बोधनाय न तु प्रत्येकशक्यग्रहेन संभवतीति तज्जन्यसमस्तशक्ति
ग्रहे अवयवशक्तिग्रहस्य हेतुत्वाद्राजपदादिशक्तिग्रहाभावे समुदा
यशक्तिग्रहस्याप्यभावात्तन्नोन्वयबोध इति भावः॥ अपपवेति॥
राजपदस्य राजसंबंधिनि लक्षणापैवेत्यर्थः॥ समुदायशक्तौ समा
सवाक्ये विशिष्टार्थशक्तौ॥ मानाभावादिति॥ अनन्यलभ्यस्य हि शब्दार्थ
इति न्यायादिति भावः॥ ननु गंगायां घोष इत्यत्रेवाजहत्स्वार्थैवात्र ल
क्षणोपियासा तु न संभवति राजपदस्य राजसंबंधिनि लक्षणायां
स्वार्थपरित्यागाभावादित्यत आह॥ तदुक्तमिति॥ यत्र रूढिः शक्तिः
विरोधिनी स्वार्थविषयकविशिष्टार्थबोधस्वरूपायोग्यात्रैवाज
हत्स्वार्थनित्यत्र अन्यत्र तु अजहत्स्वार्थपायागंगायां घोष इ
त्यत्र तीराधिकरणकघोष इत्येवान्वयबोधरूपे वक्तव्ये च प्रवाह ६४

स्य तादृशबोधविषयत्वाभावेन तादृशबोधे स्वरूपायोग्यत्वमस्त्येव
गंगापदस्येति गंगापदे जहत्स्वार्थलक्षणा मताः क्रोशंतीत्यत्र सुमंच
पदस्य मचस्थपुरुषे लक्षणायां मंचरूपस्वार्थस्यापि तादृशबोध
विषयत्वादजहत्स्वार्थैव लक्षणा एवं च पदस्य मंचनके वलजह
त्स्वार्थैव लक्षणायेन राजपदस्य राजसंबंधिनि लक्षणा कल्पनं न
स्यात् किंत्वजहत्स्वार्थैवेति सात्रांगीकार्येति भावः॥ वस्तुतस्तु नन्वे
वं पंकजमित्यादावपि समुदायेशक्तिर्न स्यात्॥ अवयवलक्षणयैवे
वपद्मत्वविशिष्टबोधोपपत्तेरित्यत आह तदुक्तमिति यत्र रूढिः
प्रसिद्धिः योगविरोधिनी तत्रैवाजहत्स्वाप्यी लक्षणा॥ यथा कर्मणि
कुशल इत्यादौ रहे प्रसिद्धिः कुशान् लातीति कुशादानकर्तृयोगार्थ
स्य विरोधिनी॥ इत्ते कुशादानकर्तृत्वबाधादिति कुशलपदस्य विवे
चकत्वरूपप्रत्याख्यासंबंधमत्वादेच्चे लक्षणा बाधेन शक्यावयवार्थ
बोधाभावात् न चात्रापि विवेचकत्वेन लक्षणायां महजत्स्वार्थत्व मि

तिवाच्यं यत्र स्वार्थस्य विशेष्यतया क्रियान्वये प्रवेशः स जहत्स्वार्था
यथा छत्रिणो यान्तीत्यादौ एवं च यष्टीः प्रवेशयेत्यत्रापि जहत्स्वार्थे
य प्रकृते च राजपुरुष इति समुदायस्य राजसंबंधिपुरुषे रूढि
प्रसिद्धिः राजाभिन्नपुरुषस्य योगार्थस्य विरोधिनीति तत्र जहत्स्वा
र्थलक्षणा स्वार्थस्य रातो विशेष्यतया क्रियान्वयप्रवेशाभावात्
पंकजनिकर्तृबोधः पद्मत्वविशिष्टबोधार्थं च पंकजपदस्य पद्मत्व
विशिष्टे लक्षणा कल्प्ये न तु शक्त्या पंकजनिकर्तृयोगार्थस्य लक्षणा
या च पद्मत्वविशिष्टार्थस्य बोधो वाच्यः॥ तस्य च युगपद्वृत्तिद्वयवि
रोधेनासंभवात् पंकजपदस्य पद्मत्वविशिष्टे समुदायशक्तिरेव
रूपकीर्तस्या युगपद्वृत्तिद्वयविरोधेन शक्त्या लक्षणया च योगानुप
पत्तेः पंकजपदे समुदायशक्तिरावश्यकी समासे तु नैवमिति॥
अथवा पंकजमित्यत्रापि लक्षणयैवोपपत्तेः समुदायशक्तिर्न स्या
दत आह॥ तदुक्तमिति॥ यत्र रूढिः समुदायशक्तिः योगविरोधि

नी योगो च यच्छक्तिस्तद्विरोधिनी तत्रैवं जहत्स्वार्थलक्षणया यथा मं
डपं भोजयेदित्यत्र हि मंडपपदस्य गृहविशेषे रूढिः योगविरोधि
नी रूढ्यर्थगृहे मंडपानकर्तृत्वरूढे योगापहारितेति प्रवादात्
अवयवशक्त्या मंडपानकर्तृबोधासंभवान्मंडपपदस्य मंडपान
कर्त्तरि लक्षणा इत्थं च रूढ्यर्थगृहसंबंधितावच्छेदकतया गृहीतत्वे
न तादृशान्वयबोधो न तु मंडपानकर्तृत्वेन पंकजमित्यादौ तु
रूढ्यर्थस्य पद्मस्य पंकजनिकर्तृश्च योगार्थस्याविरोधादवयवशक्त्या
तैव बोधः॥ पद्मत्वविशिष्टस्य च लक्षणया बोधोपगमे युगपद्
वृत्तिद्वयविरोधात् पंकजपदे समुदायशक्तिरावश्यकी॥ राजपुरुष
इत्यत्र तु राजसंबंधिपुरुषे राजाभिन्नपुरुषस्यावयवार्थस्य वि
रोधादवयवशक्त्यात्मबोधाभावेन युगपद्वृत्तिद्वयविरोधाभा
वाद् लक्षणयैव स्वार्थस्यावयवार्थस्य सामानजहत्स्वार्थलक्षणेति
सारं॥ स्वान्ते समासे वयवजात्या लक्षणैकत्वेन पंक्तजकमाह॥ तदुक्तमि

त. प्र.
६६

ति॥ यत्रेति॥ यत्रानुभूयमानसमुदायार्थेऽवयवार्थविरूद्धस्तत्र
पदे जहत्स्वार्थलक्षणेति समुदायार्थ इत्यपि॥ कश्चित्॥ एतन्नानीत
त्रजहत्स्वार्थैवेत्यन्वयं विनाऽगतिरिति ध्येयं॥ जहत्स्वार्थापीनतत्रै
व यत्र रूढिविरोधिनीति कश्चित्साव॥ यत्र लक्षणा रूढिविरोधिनी
शक्तिविरोधिनी यत्र जहत्स्वार्थलक्षणा यथांगीकृतार्थाशक्त्यास
हान्वयबोधस्तत्र न लक्षणेति यावत्॥ न तत्र लक्षणा किंतु समु
दायेशक्तिः राजपुरुष इत्यत्र तु संबंधिलक्षणा नतयेति न तत्र
समासे शक्तिरिति॥ उपसंहरति॥ तस्मादिति॥ अन्ययेति॥ अव
यवलक्षणयैवोपपत्तेरित्यर्थः॥ अनन्यलभ्यस्यैव शब्दार्थत्वात्
अन्यथा गंगापदस्यापि तीरे शक्त्यापत्त्या लक्षणोच्छेदापत्तेरिति
भावः॥ ननु चित्रगुरित्यादौ चित्रगोःस्वामीत्यन्वयोनुभवसिद्ध
स्तत्सम्बन्धावयववशात्प्राप्त्यालक्षणयाबाधाबोधोपपत्त्या बाधाक्येश
क्तिरावश्यकीवेतिरूपं न समाजे स्यात्तां कते॥ स्यादेतदिति॥ वक्त्री

६६

हीतु॥ चित्रगुरित्यादिवक्त्रीहौ तु॥ नन्वत्राप्यवयवलक्षणयैवोपप
त्तौ न शक्तिः कल्पनीयेत्यत आह॥ नहीति॥ लक्षणयाऽवयवल
क्षणया निर्वाहः विशिष्टार्थबोधः॥ अनिर्वाहमेवोपपादयति॥ त
थाहीति॥ गोपदस्य गोस्वामिलक्षकत्वे चित्रपदार्थस्य गवि अन्व
यो वाच्यः स च न संभवति पदार्थैकदेशत्वादिति भावः॥ चित्रस्य चि
त्रपदार्थस्य चित्रत्वविशिष्टस्य गवान्वयः॥ गव्यन्वयः॥ गवेति
नतीयां नवा गवा सहेत्यर्थः संभवतीति॥ चित्रपदार्थस्य चित्रस्या
भेदेन गव्यन्वयेन संभवतीत्यर्थः॥ तस्मा गोः नच तत्तद् स्वा
म्यवहिन पूर्वोपस्थितमुख्यविशेषमात्रपरत्वाशंकितयाकथं गो
बोधइतिवाच्यं॥ तात्पर्यवशादन्वयोपसर्जनस्यापि गोबोधनेवा
धकाभावात् उक्तौ पांतत्वे दोषासंस्पर्शाच्च॥ पदार्थैकदेशत्वात्॥
गोस्वामिरूपपदार्थैकदेशत्वादित्यर्थः॥ गोनिष्ठस्य त्र गोत्वनिष्ठ
त्वान्वयवारणाय पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति

धुन्नत्वं गोशब्दस्यावरूपकत्वादितिभावः॥ केचित्तु चित्रस्य चित्र विशे
षणएतयोपलक्षितस्य चित्रत्वस्येत्यर्थः॥ चित्रपदस्यान्यपदार्थयोगात्
तस्य चित्रत्वस्य पदार्थैकदेशत्वात्। चित्रपदार्थैकदेशत्वात् एकवि
शेषणतयोपलक्षितस्यान्यत्र विशेष्यणत्वेनान्वये निराकांक्षत्वा
दितिभावइत्याह॥ तत्र एवमपि चित्रस्य गवि अन्वये नान्वयबाधक
युक्तेः॥ अत एवेति। चित्रस्य गवान्वयासंभवादेवेत्यर्थः। गवानन्वये
ति चित्रस्यापीति॥ नामार्थयोरभेदेनैवव्युत्पत्तेरितिभावः॥ पदद्वये
इति चित्रपदेगोपदे चेत्यर्थः॥ ननु पयज्ञलक्षणायांगौरवात्तदपेक्ष
समुदायशक्तिरेवास्तामित्यत आह नलितिअन्येति॥ अनन्यलभ्य
स्यैवशब्दार्थत्वेनोक्तपदलक्षणायागौरवस्याप्रापाणिकत्वादितिभा
वः॥ पदद्वयेलक्षणाकल्पनेऽप्यन्तरपदवैयर्थ्याद्वाक्यएवलक्षणावा
दिमीमांसकमतमाह मीमांसकास्त्विति॥ नतुदापएव। चित्रगुरित्या
दिवाक्यएव॥ लक्षणं चित्रगोःस्वामिनिलक्षणा॥ समुदायस्य॥ वाक्य

स्यशक्यत्वाभावादिति॥ वाक्यस्यकुत्रचिदप्यर्थेशक्त्यभावान्नवाक्यसंबं
धरूपलक्षणासंभवेत्यर्थः॥ स्ववेःध्येतिगंगागापदबोधस्यप्रकार
स्य संबंधस्तीरेऽस्तीतितत्र तत्त्वमुपपन्नं परंतु शाक्यत्वेन तत्र
वेशः किंतु बोध्यत्वेनेति॥ तत्र चित्रगुरित्यत्र बहुव्रीहाविसर्थः॥ वा
क्यस्यापि। चित्रगुरित्यस्यवाक्यस्यापि विशिष्टं बोध्यमिति॥ एकदेश वि
कृतमनन्यवद्भवतीतिन्यायेन चित्रगुरित्यत्र चित्रागोरितिवाक्यस्य
सत्त्वात् तस्य च बोध्यं चित्रागोस्तत्संबंधश्च चित्रगोस्वामिन्यस्तीति
भावः॥ शाक्यसंबंधस्य लक्षणात्वदूषणं दत्त्वापि नस्वबोध्यसंबंधस्यै
वलक्षणात्वमुपपादयति॥ अन्वयीतिवाक्यलक्षणायाअनंगीकारे
वागतिः॥ कथमन्वयबोधः॥ नदेवोपपादयति॥ नहीति॥ गंभीरायां
मितिनदीपदस्य तीरलक्षकत्वे गंभीरायामित्यस्य तीरेऽन्वयो बाध्य
:स्यैवनसंभवतीत्यर्थः॥ अनन्वयमेवाहनहीति॥ नदीपदस्य नदी
तीरत्वेन वा लक्षणायां गंभीरस्य पदार्थैकदेशतयानतीरेऽन्वयासं

नवान्वातीरेन्वि विशेषणविशेष्यभावापन्नकपदयोः समानविभक्तिकत्व
स्थलेऽभेदान्वयस्यैव व्युत्पन्नतया भेदेनान्वयासंभवादभेदेनैवा
न्वयो वाच्यः॥ स तु न संभवति बाधादिति भावः॥ नद्यामित्यस्येति॥ गंभीर
पदस्य गंभीरसंबंधितीरत्वेन तीरत्वेन वा लक्षणायां नद्याः पदार्थैकदे
शतया गंभीरेऽन्वयासंभवात् तीरे च समानविभक्तिकस्थलेऽभेदान्व
यस्य व्युत्पन्नतया भेदेनैवान्वयो वाच्यः स तु न संभवति बाधादिति भा
वः॥ अनन्वय एवाह नदीतीरं नदीति॥ उपसंहरति॥ तस्मादिति॥ अन
न्वेति॥ शक्त्या लक्षणया वा विशिष्टार्थबोधानुपपत्त्या॥ वाक्यमेव॥ गंभी
रायां नद्यामिति वाक्यमेव॥ तदेकमिति॥ पंकजपदेनापताकौ बोधशक्ति
स्वीकारेपि अन्यजन्यत्वादव लक्षणैव एकत्र वाक्ये शक्तिकल्पनादन्यत्रा
पि तत्कल्पने च गंगापदस्य प्रवाहे शक्तिग्रहत्वेन तीरेपि शक्तिकल्पना
पत्त्या लक्षणोच्छेदापत्तेरतः स्वबोध्यसंबंधस्य लक्षणात्वमुपगम्यैवा
रीतिरित्याह॥ वाक्यमिति॥ चित्रगुरित्यादिवाक्यमित्यर्थः॥ न विशिष्टेति

[illegible]ना चित्रगोरित्यादि विशिष्टार्थबोधकं नेत्यर्थः॥ तद्बोधकतेति॥ वि
शिष्टार्थबोधकतावच्छेदकेत्यर्थः॥ तत्रत्वेन च किं लक्षणायेति भावः॥
अत इति॥ शक्तेरभावात्॥ रिक्त अपभ्रंशं वच इत्यर्थः॥ अपभ्रंशेपि
शक्तिभ्रमेण स्वबोधसत्त्वात् तत्रापि लक्षणापत्तिः॥ नपाच वृत्ति
मत्स्येव साधुत्वरूपत्वेन परिगृह्यते पिप्रयोगापत्तिः नचैतद्वाक्ये सं
भवतीति भावः नतु वाक्ये समुदायत्वेन शक्त्यभावेपि प्रत्येकपदश
क्त्या स्वबोध्यत्वमस्त्येव गंभीरपदसमभिव्याहृतनदीपदशक्तित्वमे
व विशिष्टबोधकतावच्छेदकं अपभ्रंशे तु नैवमित्यस्वरसादाह किंचे
ति॥ स्वबोध्यप्रत्यन्न बोधकत्वमात्रविवक्षणे गंगायां घोष इत्यत्र गंगा
पदमिति समुदायस्यापि लाक्षणिकत्वापत्तिरतस्तत्पदत्वेन तेन बो
ध[illegible] विवक्षणीयं तथा मत्वाह गंभीरायामिति॥ तीरं गंभीरे नदीना
दि[illegible]ति॥ तीराधारत्वेत्यर्थः॥ विभक्तेः प्रसापि का पापत्तावेना
धा[illegible]कानावादिति भावः विभक्तिः स्मृत्यनागस्यापि न लक्षणेत्याह

त.प्र.
६९

ना.प्रातिपदिकार्थमात्रस्य आगास्येत्यर्थः इहतु समभ्याबोधकत्वात् नाधार
ताद्यन्तयानुपपत्तिः॥ तस्य गंभीरायां नदीति भाष्य॥ अबोधकत्वादि
ति। समान विभक्तिकपदस्यैवाभेदान्वयाबोधकतया समासत्व वतो
तिदेयं॥ यद्यपि पदानां स्वस्वार्थबोधकत्वं न समूहत्वेन न वेतरपदा
वछिन्नेतरपदत्वेन स्वरूपयोग्यतेति विभक्त्यंतत्वागस्यापि घटो
ज्ञस्तथापीतरपदावछिन्नेतरपदैकतोपयातरूपं बोधकत्वं संज्ञ
वत्येवगंभीरासुनिम्नानदीति शाब्दबोधे समान विभक्तिकगंभीरप
दसमभिव्याहृतनदीपदतात्पर्येणानुपूर्वीतानसकारणत्वादिति ए
वं अन्नापंपरीक्षट्टतिध्येयं॥ ननु अजेरेनान्वयेन समान विभक्तिक
त्वं न तत्र तोकं पचतीत्यत्र व्यभिचारात्। किंतु विरुद्ध विभक्तिराहित्यमे
व तच्च विभक्तिभूत्यन्वायोग्यस्तीत्यत आह बोधकत्वेनेति॥ नीलो नीर
रूप जलस्य पोविभक्त्यपेति आधारत्वानन्वयापत्तेरित्यर्थः॥ अन्वय
मनैवाह॥ अत्रस्य पानामिति॥ यथा घटमित्यत्र घटीयाकर्मतेति घटरू ६९

पप्रकृत्यसथान्वितकर्मत्वरूपस्वार्थप्रतिपादकत्वं विभक्तेः न च धवखदि
रौ छिंधीत्यादौ द्वितीयार्थकर्मत्वस्य प्रकृत्यर्थद्वयोरन्वितत्वात् कथमेत
दिति वाच्यं यादृससमुत्तरविभक्तिः प्रपत्ते तस्यैव प्रकृतित्वेन धवस्यापि
प्रकृत्यर्थत्वात्॥ सत्याग॥ गंभीरायां नदीति विशिष्टवाक्यात्मकःभागः
प्रकृतिरिति॥ नदीपदोत्तरमेव विभक्तेः प्रयमाणतया नदीपदमेव प्र
कृतिः॥ तदपेक्षया नत्र वक्ष्यते विशिष्टवाक्योत्तरं वाच्यापि विभक्तेः इष्टत्वे
न न वाक्यस्य प्रत्यापकत्वमिति भावः॥ ननु डित्थडपित्थसमुदायवत्
गंभीरायां नदीति वाक्योत्तरमेव विभक्तिरिति तस्यापि प्रकृतित्वमास्ता
मित्यत आह गंभीरायामिति॥ गंभीरायां नदीति वाक्योत्तरं यदि विभक्ति
स्तदा सुपो धातुप्रातिपादिकयोरेतयोरवयवस्य सुपो लुक्स्यादिति अ
नेन गंभीरायामिति सप्तम्याः लुक्स्यात् गंभीरायां नद्यामिति न स्यात् किं
तु गंभीरनद्यामिति स्यादित्यर्थः वस्तुतस्तु ननु नीलं घटमानयेत्यत्र वि
शिष्टैककर्मत्वाबोधकत्वयोनस्यात् नीलस्याप्रकृत्यर्थत्वादित्यत आह गंभी

रायाटमिति विशेषणवाचकपदस्य विशेष्यवाचकपदसमवधानत्वानुरोधे
नगम्भीरायामिति सप्तम्यन्तत्वेन नदीपदस्य विशेष्यवाचकत्वाभावात्
गम्भीरायामित्यस्य विशेषणवाचकपदत्वाभावाद्गम्भीरायामिति सप्तमी
नद्यादित्यर्थ इति सारं॥ नदीपदोत्तरसप्तमीत एव जलरूपाधेयाधारत्वान्व
यसंभवे गम्भीरायामित्यत्र विरुद्धप्रतीत्यपासंभवादिति भावइत्यपि कश्चि
त्॥ तत्र वक्ष्यमाणस्य मतेपि तद्वैयर्थ्यसत्वात्॥ अथ गम्भीरायां नद्यामि
ति विजत्वं तन्नागस्यैवेस्यपो॥ विजत्वं नन्नागस्य नामत्वाचावे न नाप्रा
र्पपो रिति श्रुतमन्नवकाशात्तजे दैनैव घोषेन द्धान्विय इति भावः॥ अश
यत्वादिति॥ गंगायामिति समुदायस्यापि जाहृणिकत्वापत्यात तेन बोध
कत्वं वाच्यं॥ एवमपभ्रंशवारणाय शक्तेरत्वावरूपकन्तू इत्थंच शक्त्यवच्छिन्ना
यात्त्वावच्छिन्ना बोधकतानस्यैव निवेश्यात्॥ वाक्यत्वेन बोधकतायां च
शक्त्यवच्छिन्नायान्तत्वावच्छिन्ना बोधकतानस्यैव निवेश्येदकत्वान्नवा
क्ये लक्षणासंभव इति भावः॥ जयति सदाशिवः॥

गत्वं तदा सम्यग्भ्रंशवारणाय शक्त्या स्वबोध्येत्यस्यावरूपकतया वाक्ये
न शक्तिरित्याह वाक्यमित्यत्रेत्यादि नन्वपभ्रंशस्यापि लक्षकत्वे दु
ष्टापत्तिः वृत्तिमत्त्वमेव पदसाधुत्वमित्यत्र शक्यसंबंधरूपलक्षणा
या एव वृत्तित्वघटकतया नत्र वृत्तिमत्त्वरूपसाधुत्वाभावात् प्रमाधा
तस्य बोधसंबंधिलक्षणेत्यस्यैव न लक्षणत्वेनापभ्रंशस्य प्रमाधा
न बोधाभावाच्चानुपपत्तिरित्यस्वरसात्तत्वेन बोधकत्वावरूपक
त्वमतिप्रसंगदोषमाह किंचेति॥ अशक्यत्वादिति स्वबोधत्वं हि लग्न
न्योपस्थितिविषयत्वं समवायेन घटपदस्यापि गगनादेः संबंधग्र
हात्तदुपस्थितस्य शाब्दानापत्तेः तेन गंगापदेन प्रवाहशाब्दबोधा
जननात् तस्माल्लक्षणास्तजन्य बोधविषयत्वमेव तत्त्व वाच्यं॥ तच्च श
क्यसंबंधस्य लक्षणात्वापेक्षया गुरुतरं वाक्ये शक्त्यभावात्तत्र तच्चासं
भवतीति भावः॥ उपसंहरति॥ तस्मादिति॥ वाक्यलक्षणायाः असंभ
वादित्यर्थः॥ पदरूप एव॥ गम्भीरपदेन नदीपदेन च विनिगमकेति॥ एक
तरपक्षपातिनी युक्तिर्विनिगमना तस्या अभावादित्यर्थः॥ विशिष्टेति॥

विशिष्टं गम्भीराभिन्ना नदी तस्यास्तीरे इत्यर्थः॥ नन्वेवं कस्यैव लक्षणया विशिष्टा
र्थबोधः संभवे परपदं व्यर्थं इत्यत आह नचेति॥ एकपदवैयर्थ्यं तल्लेत्त्व
पः॥ परस्परेति नदीपदेन गम्भीराभिन्ननदीतीरबोधे जनने गम्भीरप
देन वा तादृशबोधे जनने नदीपदसमभिव्याहारो नियामक इत्यर्थः
लक्ष्यार्थबोधे नान्यपदानस्य हेतुतया नदीपदं गम्भीराभिन्ननदीतीरप्र
तीतिजनयोग्यमिति नान्यपदानां गम्भीरपदसमभिव्याहारादेव तत्र व
र्ति॥ अन्यथा केवलं नद्यामित्युक्तौ गम्भीराभिन्ननदीतीरबोधापत्तेरिति
भावः॥ एकत्रैव पदे पदाल्लक्षणाप्रतिसंधानं तदा तस्यदेव लक्षणा पदा
नुपपद्यमानपदे लक्षणाप्रतिसंधानं तदा तत्र यद्यपरलक्षणैव शाब्दबोधे
प्रयोजिका संभवे देनान्यतरपदैकपद्यमिति न्यायेन चैकमेव विशिष्टतीरं ल
क्ष्यत इति ध्येयं॥ अत्रेदं बोध्यं॥ गम्भीरनद्योरन्वयबोधोत्तरं गम्भीरनदी
संबंधग्रहान्नदीपदेन विशिष्टतीरलक्ष्यतेऽन्यथा नदीसंबंधग्रहाद्वि
शिष्टतीरबोधानापत्तेः॥ इत्थं च स्वशक्तिताप्यसंबंधो लक्षणा सा च पद ए
व न वाक्ये क्लृप्तत्वात् वाक्ये लक्षणावादिमतेपि प्रत्येकपदरूपे विनिगमका

भावाल्लक्षणायाः दुर्वचत्वाच्च नन्वेवं नीलं द्विरेफमानयेत्यत्र विशिष्टसंबंधि
विलक्षणानुपपत्तिः पदद्वयस्यापि लाक्षणिकतापानानुभावकत्वेन स्वतात्प
प्रसिद्धिरिति वाक्ये लक्षणावादिना सहतुल्यत्वमिति वाच्यं॥ लाक्षणिकस्या
प्यनुभावकत्वांगीकारात् वस्तुतस्तु शक्यसंबंधात् लक्षणा नदीपदस्य
नद्याइवांभीरनद्या अपि शक्यत्वात् गम्भीरपदस्य नान्वयग्राहकत्वाच
गम्भीराभिन्ना नदीति अवांतरवाक्यार्थबोधं विनापि गम्भीरनदीतीरलाभ
संभवात् अथाभिन्ननदीसंबंध एव तीरे वाच्य इति परंपरासंबंधगौर
वात्॥ साक्षात्संबंधसत्वात् नदीपद एव लक्षणा युक्ता यदि धीरोदार
पदवत् धर्मिण्यपि शक्तिः नीलादिपदवत्केवलं गुणमात्रे गम्भीरपदा
प्रयोगादिति विभाव्यते तथापि शुक्लादिपदानां गुणमात्रवाचकत्वेन शु
क्लायां घटो घट इत्यादौ साक्षात्संबंधाभावात् विशेष्यवाचकपद एव ल
क्षणायाः क्लृप्तत्वात् सर्वत्रोत्तरपद एव लक्षणा एवं चित्रगुरित्यत्रापि गो
पद एव लक्षणा तथा च सर्वत्रोत्तरपद एव रूढौ लक्षणेति॥ केचित्तु ग
म्भीरपदे लक्षणा नदीपदोत्तरमतप्या अन्वयो न स्यात् विशेषणवि

नक्तेः प्रयोगसाधुत्वं इति विशेष्यवाचकपदे एव लक्षणा न च विशेष्यवाचकपदो
त्तरविभक्तेरेवात्र शक्यसाधुत्वमास्तामिति वाच्यं विशेषणविभक्तित्वेन सामान्य
तः प्रयोगसाधुत्वकल्पनादित्याहुः तदसत् लाक्षणिकार्थानुभावकगभीरपद
स्य विशेषणपदत्वाभावेन गभीरपदोत्तरसप्तम्या एवान्वयसंभवादिति ॥ अ
परे तु प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेरुत्तरपद एव लक्षणा
अव्यवहितपूर्ववर्तिनि एव प्रकृतित्वात् न तु अन्यथा राजपुरुषमानयेत्यत्र राजा
नमानयेत्यपि बोधापत्तिः नन्वेवं सर्वप्रधाने द्वन्द्वे पूर्वप्रधानअव्ययीभावेऽ
घटं नूतनमित्यत्र बहुव्रीहौ नञ्समासे अर्धपिप्पल्यादिना तत्पुरुषे च क्लृप्त
प्यन्वयानुपपत्तिरिति वाच्यं नञ्तिरिक्तस्थल एव नियमादित्याहुः ननु चित्र
गुरित्यत्र चित्रपदं चित्रगोसंबन्धिपरं गोपदं च गोस्वामिपरं चित्रगोसंबन्धिन
श्च तादात्म्येन गोपदार्थस्वामिन्यन्वय इति सर्वविदां सार्थक्यं किमिति परस्प
रमात्रपर्याहतत्वं एवमारूढवानरो वृक्ष इत्यत्राधानेव निरकर्तृकारोहणे
क्तप्रत्ययस्य कर्मत्वे वा रेफ पदस्याश्रये लक्षणा वानरकर्तृकस्त्वत्राधानोकारोहण
वर्त्त्याश्रयो वृक्ष इति बोधः एवं चैत्रदधन इत्यत्र चैत्रपदस्य चैत्रकर्तृकेदातौ

धातोर्धनदत्तिकर्मप्रत्ययस्य संप्रदाने धनपदस्याश्रये लक्षणा चैत्रकर्तृकधन
दानसंप्रदानत्वाश्रय इति बोधः अथ वा वानरपदस्य वानरकर्तृकमर्थः तस्य यथा
त्ययेनारोहणे अन्वयेनान्वयः क्तप्रत्ययः कर्मपरः॥ एवं धनपदस्य धनकर्मकम
र्थः तस्य च चैत्रकर्तृकधनदाने अन्वयः क्तप्रत्ययस्य संप्रदानमर्थः एवं गभीरा
यां नद्यां मित्यत्र गभीरपदं गभीरनदीसंबन्धिपरं नदीपदं च तीरपरमित्यत्राप्य
हविस्तार इति चित्रगुपदात् चित्रगोः स्वामीति वानुभवात्प्रकारः साधुः एवं
शोभनचित्रगुरिति त्रिपदबहुव्रीहौ चित्रपदस्य चित्रसंबन्धिपरतया गोपदा
र्थैकदेशतया विशेषणान्वयानुपपत्तेरगत्या चित्रपदस्य शोभनचित्रगोसंब
न्धिपरतया शोभनपदं तात्पर्यग्राहकमिति विना न वाच्यगतिरत्र हि चित्रपद
स्य चित्रस्वामिगोपदस्य गोस्वामीत्यर्थः व्यक्तिवचनानां सन्निहितविशेष्यपरत्वमि
त्यभ्युपेनन्य चित्रत्वेन गोत्वेन च एकव्यक्तिबुद्ध्यनां सन्निबोध्यते ॥ आरूढवान
र इत्यत्र क्तप्रत्ययस्य कर्तृसंबन्धी वा नापरस्य वानरसंबन्धी अर्थः एकदेशोपि
रूढतारोवानरएतस्यान्वयः पक्षेऽस्मिन्ने बेत्याहुः तदपि चित्रगोस्वामीत्यनुभवापला
पादुपेक्षणीयं ॥ अस्मिन् गोपदं गोस्वामी लक्षकं गवि चित्रस्याभेदेनान्वयः एक
देशेऽपि बुद्धिमतित्वे विशेषणान्वयस्वीकारादित्याहुः परे तु गोपदेन शाक्यागोः लक्ष

णपानवस्यापी बोधनेपुपगोहितविषयविरोधानंगीकारात्॥ पंकजपदस्य पद्मत
विशिष्टलक्षणमंगीकारस्तु समुदायेशक्तत्ववृक्षारस्य प्राप्राणिकत्वा॥ यत्र
न्यपार्थत्रापि दृष्टपत्तिरिति वदंति॥ अत्रेदं बोध्यं॥ गोपदस्य चित्रगोस्वामिपरता
यां संबंधिवच्छेदक तया गृहीतचैत्रत्वादिना चित्रगोसंबंधित्वेनैव यावज्ञान
नीयत्ववत्॥ गंगासंबंधितीरपदवत् आरूढवानरो वृक्ष इत्यत्र आरूढः वानरो य
मिति वाक्ये आङ्पूर्वकरुहधातो रूर्ध्वदेशावछिन्नसंयोगानुकूलक्रियाक्तप्रत्य
यस्याश्रयः द्वितीयापाश्चाधेयत्वमर्थः वृक्षवृत्त्यूर्ध्वदेशावछिन्नसंयोगानु
कूलक्रियाश्रयो वानर इत्यन्वयबोधः समासे तु आरोहणकर्तृकवानरसं
बंधी वृक्ष इत्यन्वयधीः संबंधश्च कर्तृकारोहणकर्मत्वं एवं चैत्रदत्तधन इ
त्यत्र चैत्रेण दत्तं धनं यस्मै इति वाक्ये चैत्रकर्तृक स प्रदानसमासे तु चैत्रक
र्तृकदानकर्मधनसंबंधीत्यन्वयबोधः संबंधश्च कर्मकदानसंप्रदान
त्वमिति अत्र च समानाधिकरणबहुव्रीहिः॥ चक्रपाणिरित्यादौ तु व्यधिक
रणबहुव्रीहिः॥ चक्रं पाणौ यस्य इति विग्रहवाक्ये पसंबंधिपाणिवृत्तिचक्रमि
त्यन्वयधीः॥ समासे तु चक्रयुक्तपाणीसंबंधीति बोधः स च तद्गुणसंवि
ज्ञानबहुव्रीहिरतद्गुणसंविज्ञानबहुव्रीहिश्चेति द्विधा॥ तत्राद्यो धातवः वैत्रा ७३

दीनयेनयलंबकर्णमानयेत्यादावाद्यः॥ अन्त्यस्तु चित्रगुरित्यादौ तथा हि॥ लं
वादपइत्यादौ क्रियाविषयत्वेन निमंत्रितत्वेन लंबकर्णविषयविधेयसंबं
धस्तद्गुणाविच्छिन्नत्वेन॥ बाधान्वयबोधः॥ लक्षकसंबंधस्यैवलक्षणत्वावच्छेदकत्वा
त्तेनरूपेणैव बोधात् विशेषणस्यापि लंबादेः क्रियान्वयाद्यद्यत्तत्त्वापन्नलं
लक्षणातस्य समस्यमानपदार्थस्य गुणीभूतस्यापि तस्य कर्तृविशेष्यविधेया
विज्ञानं यस्मादिति व्युत्पत्तेरिति संप्रदायः॥ अत्र केचित् परिलंबकर्णत्वादाव
जहत्स्वार्थलक्षणा न दा लंबकर्णस्यापि विशेष्यत्वेनान्वयेनुवाद बोधः॥
तस्माद्यत्रापि तदुत्तरपदार्थलक्ष्यते न विशिष्टत्वेन विधेयान्वयस्तादृशपरित्या
गात्॥ यत्र विशेषणतया स्वार्थस्य विधेयान्वयः स तद्गुणसंविज्ञानबहुव्री
हिः उपलक्षणतया स्वार्थस्य विधेयान्वयः स अतद्गुणसंविज्ञानबहुव्रीहि
ः विशेष्यान्वयिनान्वयित्वमेव विशेषणत्वं यथा पिलंबकर्णत्वादौ लंबकर्ण
संबंधित्वेनोपस्थितिः चित्रगुरित्यादौ चित्रगोसंबंधित्वेनोपस्थितिस्तु नै
व तथापि लंबकर्णादिः विशेष्यान्वयिनान्वयान् विशेषणतया विधेया-
न्वयः चित्रगोस्तु उपलक्षणतया घिति॥ अत्र स्वान्वयमेव संतत्र इति॥
केचित्तु॥ शूरादिः प्रथमपादतोपेक्षामिति विग्रहं वाक्यात्॥ व्याजित्रः प्रथ

 मपावनीपत्रंबंधीति बोधः सामासानुत्वान्नित्वप्रथमपावतसंबंधीति बोधः
 एवं चैत्रप्रधानस्य ससंबंधीत्यत्र बोधः संबंधश्चत्तपावप्रथमावधित्वं स्वनि
रूपाधान्यावधित्वं च॥ अत्र चत्वा नित्वप्रथमपावतसंबंधित्वं चैत्रानित्व
प्रधानसंबंधित्वादिना आदिशब्दस्य लक्षणा लक्ष्यतावच्छेदकस्यापि आदे
विशिष्यान्वयधानुत्वादिना अन्वयानुपपत्तं लक्षणया आकुर्वंत्यापी त्यंचे
त्याहुः॥ अपरे तु जनककर्णत्वादौ विशेष्यतया अन्वयाननुभवादस्तु नहत्वा
पत्तेरुपादपदस्य अनुगमणपवित्तनिमित्तत्वादिनैव बोधः॥ यथाकाक
योर्द्धेपान्वयाभावात्॥ काकेत्यादिपिरहस्त्यनामित्रान्यत्रैवाद्याकपदस्यापो
विशिष्यान्वयमात्रादेवचलं चक्रणानुवादिसाधारणं॥ नऊणत्वादिकमित्या
हुः॥ अत्रादिशब्देन गणपवित्तनिमित्तत्वादिना लक्षणा॥ यत्त्वेत्रादिप
दं नाम्यपग्राहकमित्यस्येच्छत्वात्वादिना चैत्रत्वादिमत्त्वादिना नानारूपेणो
पलक्षणा युगपद्वृत्तिद्वयविरोधानुपगमात्॥ न तु पगमेतु पुष्पवंता
दिपदनानारूपेणैव शक्तिरिव नानारूपेण एकलक्षणापि॥ स्वीकारान्तरोवद
न्तपरे॥ चैत्रशब्देन शक्यान्वैत्रत्वादिना आदिशब्देन च लक्षणया मैत्रत्वा
दिना बोधः॥ चैत्रपराधादिपदार्थयोरभेदेनान्वयबोधस्यापि तात्पर्यवि

षयत्वात्॥ इदं चात्रेदेनान्वयेनास्य पत्त्रवात् न द्वंद्वापत्तिरिति केचित्। इति॥
रूतं पत्नविते नेति॥ आव्ययीभावसमासे शक्यतावच्छेदकपादपति॥ उपकुं
भमिति॥ उपकुंभमित्यव्ययीभावः॥ अत्र इपिष्पलीति तत्पुरुषः उपशब्दे निपा
ते च ध्वंतसां कान्तत्वाभावात् कुंभस्योपरि इतिनात्र विग्रहः किंतु कुंभस्य स
मीप इति उपकुंभमिति दृष्टव्यं॥ उत्तरपदेति कुंभपदस्य कुंभसंबंधिनि पिप्प
लीपदस्य पिप्पलीसंबंधिनि लक्षणा॥ तस्य च उपार्थे सामीप्यादावन्व
येनान्वयः वस्तुतस्तु उपपदार्थः सामीप्यं न तु समीपः तथा चोपपदस्या
पि समीपार्थे लक्षणा॥ एकदेशान्वय सामीप्ये कुंभादिसंबंधिनस्तादात्म्येना
न्वय इति॥ पदद्वय लक्षणापेक्षया कुंभपदस्यैव कुंभसमीपपरता उपपदं
च तात्पर्यग्राहकमिति॥ केचित्तु॥ चंद्र इव मुखमित्यादौ इवार्थसादृश्यस्य
भेदेन मुखे अन्वयेनाव्ययत्वनिपातातिरिक्तस्थले एवनामार्थयोर्भेदेनान्व
यबोधानंगीकारात् उपपदार्थसामीप्ये कुंभस्यान्वयबोधसंभवात् संबं
धप्रकारकान्वयानुरोधेन परं कुंभपदस्य कुंभसंबंधे लक्षणा अनुभ
वानुरोधेन तु अत्रापि उत्तरपदे न लक्षणा इत्याहुः॥ अन्ये तित्युत्तरपदलक्षण
दिना लक्ष्यत्वादिरर्थः॥ अनन्यलभ्यस्य च शब्दार्थत्वादिति भावः॥ एवं निम

ठिकमित्याहाव घ्य पीत्तावेप्युत्तरपदे मत्वर्थीयाभावे लक्षणा पूर्वपदे तात्पर्य
ग्राहकमिति॥ ध्येयं॥ समाहारद्वंद्व इतरेतरद्वंद्वत्वेदेन द्वंद्वो द्विधा॥ तत्र समा
हारद्वंद्वे पाणिपादमित्यादौ पाणिपादस्य पाणिपादप्रतियोगिकसमाहारे शा
क्तिरिति मतं दूषयति॥ समाहारेति॥ पाणिपादस्य प्राणिप्रतियोगिके पादप
दस्य पादप्रतियोगिके समाहारे च पदद्वये एव हारं च विलक्षणयैकस्यान्व
यः॥ एत एव समाहारस्यैकत्वादेकवचनमिति उत्तरपद एव पाणिपाद
प्रतियोगिकसमाहारलक्षणा पूर्वपदं च तात्पर्यग्राहकमित्याऊः॥ ननु
समाहारे शक्तिरन्यलभ्यत्वादित्याह॥ नपाणीति॥ समाहारं लक्षयति॥ स
माहारश्चेति॥ क्रियाधात्वुपलीनफलानुकूलसजातीयविजातीयव्या
पारश्रयं च यत्तस्यैव रूपेलक्षणः॥ संबंधः समाहारः यथा पाणिपादंवा
दयेत्यत्र वादनक्रियायां तुल्यवदेव पाणिपादयोरन्वयः एवं धवख
दिरौ छिंधीत्यत्र छेदनक्रियानुकूलो व्यापारः संधकवदिरयोस्तुल्य एव
भासते॥ ननु एकक्रियान्वयित्वस्य वादनादिरूपैकक्रियान्वयरूपतया
तस्य च संबंधीभेदात्भेदेनानुगमप्रबंहलन आह सैनेति॥ यथासेना
त्वं नाम तत्तदश्वादिविषयकज्ञानविषयत्वमेवं तत्तद्धस्त्यादि विषयक ७५

ज्ञानविषयत्वमेवं तत्तद्धस्त्यादि विषयकज्ञानविषयत्वं वनत्वं॥ तथा अपेक्षा
बुद्धिविशेषविषयत्वसमाहारः अपेक्षाबुद्धेरव्यासज्यवृत्तेरपि विषयत
याव्यासज्यवृत्तित्वोपगमात् नानुगम इति भावः ननु समाहारस्य संबंधि
तित्वेक्रियाव्ययफलत्वाजिखरूपकमत्वस्य क्रियायाप्रसक्तत्वेन कथं
पाणिपादमित्यत्र कर्मविभक्तिरित्याशंकते॥ नन्वेवमिति॥ एवं समाहा
रस्य तुल्यवदेकक्रियान्वयित्वरूपत्वे॥ वस्तुतस्तु॥ एवंमित्यस्य पाणिपाद
समाहारस्य लक्ष्यत्वमित्यर्थः॥ अनन्वयेऽपीति याषुकमत्वादेरनन्वयेऽन
न्वयेवाद समाहारे तुल्यवदेकक्रियान्वयित्वरूपे इत्यर्थः॥ वादनेतिवाद
नरूपक्रियाजन्यफलशालित्वरूपवाजकमत्वस्य तत्राभावादित्यर्थः॥
तथा च पादनकर्मत्वं पाणिपादयोरेव न तु समाहारे इत्यर्थः॥ परंपरायेति॥
ताश्च प्रतियोगिकत्वरूपपरंपरयेत्यर्थः॥ तत्र समाहारे॥ एकदेशेनेन ता
त्यासंबंधेनानुमतूपमाणकर्मत्वबोधस्य परंपरयोपपादने वेदास्वरसः
समाहारेति समाहारवाचकपदैर्द्वितरविभक्तीत्यर्थः समासप्रमाण एव
समाहारप्रतियोगान्वय एव कारेण न तु समाहारे साक्षा[illegible]दित्संबंधा
भावादिति पूर्वनात्परसौरस्थितिः ननु प्रथमपानां पचत्वपर्यन्वितत्वाद्बी
धकत्वविषयत्वंगप्रसंगइत्यत आह बुभत्सीति बुत्पत्तिराकांक्षानदेवि

ञान् कार्यकारणभेदेन कार्यकारणस्य भिन्नत्वात् प्रकृते च भिन्न एव कार्यकारण
भावः कल्प्यते॥ अनुत्तवानुरोधात् तादृशासमुल्लेखात् संकोच इति भावः॥ अत्रस
माक्षेपमाणे पोदितात् द्विवचनापत्तिः गन्धपानामिति समुल्लेखात् संकोच इति भावः
श्रात्मेर्द्वन्द्वेनास्वरसः सूचितः पाणिपादमित्यत्र पाणिपादसमाहारस्यानुत्तव
सिद्धत्वात् पाणिपादावितिद्विवचनापत्तिर्भिपावादितरेतरसमाहारतानानुरो
धाद्वा पाणिपादसमाहारलक्षणएकत्वं न मितितत्र दूषणं त्रमनुद्धरन्नन्यम
नमुषपादपूर्ति॥ पाणिपादं वादयेत्यत्रेति पाणिपादमात्रेति॥ मात्रपदात् स
माहारव्यवच्छेदः अनुत्तवसिद्धत्वात् समाहारवृत्तिकल्पनं तद्वृतः अनुत्तव
स्यैवान्यायादितिभावः वैयाकरणप्राचीननैयायिकभेदेन शक्तिलक्षणयो
रुपादानं ननु पाणिपादमित्यत्र समाहारवृत्तकल्पने पाणिपादयोर्द्वित्वात्
पाणिपादावितिद्विवचनापत्तिः मन्मते समाहारस्यैकत्वात् तत्रपित्वान्
न्यपसंज्ञत्वेन तदापत्तिरित्यभिप्रेत्याह॥ नचैवमिति॥ एवं पाणिपादयोरे
वप्रतीतावित्यर्थः॥ असाधुत्वादिति व्याकरणप्रतिपन्नत्वादित्यर्थः प्राणि
तूर्यसेनाङ्गानामेकवद्भावो वक्तव्य इत्यादिसूत्रेण तत्रैकवचनमेव विहि
तम् पाणिपादं पूरणं वक्ताभावे पि वहुवचनमिति भावः॥ ननु समाहारसं
ता अनुपपन्ना समाहारबोधस्य ततोऽनुदयेनान्वयसंशयाः सुपा

अन्यायात् समाहारणं समाहारः अनेकस्य एकीकरणं॥ एकीयमिदं तिपावत्
न्नबोधकीयंद्वः समाहारद्वन्द्व इति हि सेत्यत आह इतरेतरेति इतरेतरसंज्ञा
समाहारसंज्ञा लिप्सर्थः॥ नदीति नदीसंज्ञा वृद्धिसंज्ञापपापादिन्यावाविक्री
नपासमाहारसंज्ञापि॥ अन्वर्थसंज्ञापा अन्यावेपि नक्षतिरितिभावः स्वरू
पेतिधवखदिरं स्वरूपद्वयप्रतीतेरित्यर्थः॥ न लक्षणेति पदपिन्डोकेमु
ख्यत्वे ननु शक्तिर्नवा लक्षणेत्येवजेखनमुचितं॥ तथापि प्राचीननैया
यिकमते समाहारद्वन्द्व लक्षणापाः प्रक्रान्तत्वस्यैवादौ विराकृतेति॥ कात्र
पीति इतरेतरयोगेपीत्यर्थः॥ अपिन्यासमाहारद्वन्द्वसंग्रहपः समाहारसा
हित्ये लक्षणा अत्र नु साहित्याश्रये इति परं छेदः॥ धवेति॥ धवपदस्य खदिर
पदस्य वा धवखदिरसाहित्याश्रयेन लक्षणा इतरपदतात्पर्याहकमीमां
सकमतनलाघवाय्येव लक्षणा धवखदिरसाहित्याश्रयोह्गिधीत्यर्थबोध
ः ननु कतं साहित्यलक्षणएवैमत आह तदाहुरिति॥ एतन्मूत्रार्थे हि सर्वथा
कस्यावधारणमितिन्यायेन सहित्वे गम्यमाने एव द्विवचनबहुवचनेज
वतः द्वन्द्वसमासो वा वाकारम्भा पूर्वद्वन्द्वसमासस्य साहित्ये गम्यमान एव न्व
नीत्यर्थः धवखदिरत्वेनवोपस्थिते संख्यान्वयधवद्वयधाः खदिरद्वय

धीश्च स्यात् अन्वयितावच्छेदकव्याप्यसंख्याबोधकत्वाद्विवक्षीनां अन्यथा घट
पटवृत्तिद्वित्वमादाय एकस्मिन्नपि घटे घटाविति प्रयोगापत्तिः साहित्येनज्ञ
णां तु सहितत्वेनोपस्थितेर्द्वित्वान्वयः॥ एवं चार्थे द्वन्द्व इति सूत्रं समुच्चया
न्वाचयमाहारेतरयोगा इति चत्वारश्चार्थाः॥ तत्र समुच्चयान्वाचययोस्तिरि
कृचार्थे द्वन्द्वसमास इति नरर्थः समुच्चयान्वाचययोः साहित्यानवगमान्न
द्विवचनबहुवचनापत्तिः॥ नवा द्वन्द्वसमास इति द्वन्द्व साहित्ये जन्मेणा विना
द्विवचनबहुवचनापत्तिः॥ इदं द्वन्द्वसमासानुपपत्तिम्येति नन्न जह्नणा आव
श्यकी तिश्चावः॥ ननु समुच्चयान्वाचययोः कथं न साहित्यबोधस्तत्रा
ह॥ साहित्यं चेति॥ एतेन साहित्यं जन्तेणास्य पुनर्वचनेमसंगतमिति निर
कानिराकृता समुच्चयादिवारकत्वेन तत्संगतेः तुल्यवदित्यस्य व्यावृत्ति
माह॥ अनएवेति॥ तुल्यवदेकक्रियान्वयित्वस्य साहित्यरूपत्वादेवेत्य
र्थः ननु यत्र मानस्य दपश्या अपि पाणाराचनपात्साहित्यं दुर्वारं तत्रा
ह॥ ह्यागादानीति॥ अनुपनीति॥ एवं कुरुह्यागाहारेत्यर्थः॥ नप्याचयस्था
पनमानस्य क्रियायां कर्तृत्वेनान्वयः न नृपस्याप्यस्ता॥ अत्र पल्ला कर्तृत्वेन सा
हित्यं न विनश्यति व्यापारभेदं धान्यवादात् परमन्वयप्रयोजकत्वमानतयोः सं

बंधो विवहितस्त्वदान्वयत्वेन साहित्यं पच्यारं पत्यादि तादितयान्वद्वंद्वे साहित
त्वेन क्रियान्वया घटान्यो न साहित्यान्वयः पूर्ववेतरेतरपदान्वयस्तत्र समा
सः इतरेतरसमाहारयोस्तदान्वयात्समासः साधुः सामुच्चयेतुअसंबंधयो
रेकैककृतः क्रियान्वयो न तु साहित्याश्रयत्वाय वंबितिवदिरंवछिधीतिस
मुच्चयेतुल्यवरसंबधयोः क्रियान्वयधाः एकरूपसजातीयव्यापारयोगित्व
रूपं साहित्यं तादृशां घोतकतया पपश्यात् मानांतरेणावगम्यते वादीनाव
वाचकत्वेति तुल्य पक्षाहित्यान्वयाभावात् द्विवचनबहुवचनयोरेव साहित्य
व्यंजकत्वादिति क्रियान्वितेदत्वान्वयाः पयैधानादनुबन्नं फजणाकमप्या
नेप्सीतिमं ननु धवंखिदिरवाचंछिंध इत्यत्रान्वाचयेऽव्याप्तिः क्रियान्वि
तान्वयान्न किंव घटं पटं पप घटं चान येत्यत्र समुच्चयेऽतिव्याप्तिः उभयत्रैवप्र
धान्येन क्रियान्वयितायाः सत्त्वात् समुच्चयत्वात् एवं आहरणानयनयोः क्रि
ययोरन्वेदादर्धानाहत्तीमिप्पा घन्वाचयेऽव्याप्तिश्च निरूपकभेदे न क्रियाभेदे
पपादने समुच्चयेऽतिव्याप्तिरिति चेन्न प्राधान्येन यत्र क्रियान्वयितात्पर्यं समु
च्चयः प्रधानगुणभावेन यत्र क्रियान्वयेनात्पर्यं सोऽन्वाचयः समुच्चय कांगल
तीत्यादौ पुत्रस्यैकान्वयित्वेऽपि विशेषणत्वेनैवान्वयान्नातिव्याप्तिः पत्रवसुग

यत्र क्रियान्वयेनात्पर्यं तत्र समासः समुच्चयेन क्रमेण क्रियान्वयेन तु युगपत्
क्रियाचव्यापारमात्रं तथा च तुल्यवदेतत् विधेयान्वयित्वं साहित्यं तेनधवख
दिराविति क्रियारहितेधातूपनीतफलानुकूलव्यापारवत्ताप्रतीतौ कथं साहित्य
बोधं इति निरस्तं चैत्रमैत्रौ पश्यतिगतिमन्तौ इति पद्यासत्त्वस्तेनेनुनच्य नइति
क्रियाध्याहारादिवद्वंद्वः पवमितावता हित्वान्वयार्थं अनन्वयितावच्छेदकतयासा
हित्यज्ञानपित्वायातं॥ नन्व घटेन जलमाहरेत्यत्र छिद्रेतरघटत्वस्येव योग्य
तावच्छेदकतयैवज्ञानोपयत्त्रौ मीमांसकमते साहित्यलक्षणा पानबीजं तथा
पिपिहानुपस्थितस्यशा देज्ञानमितिमतमंगीकृत्येदं॥ अत्राक्रुद्दित्यस्वरसो
द्र यनंत दार्जं तु प्रत्येकमुपस्थितयोर्धवखदिरयोर्द्वित्वबोधसंभवे साहित्य
लक्षणाकल्पनमनर्थकं अवच्छिन्नावच्छेदकसमानाधिकरण संख्याबोध
कत्वविलक्षणानां नत्वाप्यत्वात् ताज्ञविपिगौरवात्॥ घटौ आनयेत्यत्र
त्रयरमाहाय घटेनद्वित्वानन्वयः परस्मात्प्रकृत्यर्थतात् प्रकृत्यर्थमात्रव
त्तिसंख्याबोधकत्वाद्विभक्तीनां पाद्गुणसमुदायोत्तरं विभक्तिस्तस्यैव प्रकृति
त्वेनधवखपापिप्रकृत्यर्थत्वाभावे तेन दोषः किंच धवादिपदात्स हितत्वेनै
नपदि वोधस्तदा चैत्र मैत्रौ गच्छत इत्यत्र गमनस्याआसन्नवृत्तितया तत्रा ७८

नन्वयप्रसंगः एवं च द्वित्वबोधार्थं सहितत्वेन लक्षणा गमनबोधार्थं च चैत्र
नबोध इति युगपद्वृत्तिद्वयविरोधः सहितावस्थितमनकर्तृत्वासंभव अक्षर
ढंचदद्वे क्रियान्वयात्तूवसाहित्यबोधीनत्वसेवः उत्तरंतु नवत्वेवयत्र यु
गपदुपस्थितेष्वपयुगपत्क्रियान्वयतात्पर्यं तत्र समासः समुच्चये तु क्रमेणो
पस्थितक्रमेण क्रियान्वयबोधे तात्पर्यात्समासः एवं प्रधानगुणभावविव
वक्षया विशेषणत्वविशेष्यत्वविवक्षया नानात्वसमासाभावइति दिक्॥ घट
वितिसरूपैकदोषः विरूपैकशेषेतु पितरावित्यत्र जनकशरीरत्वेन लक्ष
णया मातापित्रोरनुगमः॥ विलक्षणपनीतं पुंस्त्वं तु पितर्येवान्वेति॥ योग्यता
त्वात्तथापितुः लक्षणया ल्लाघ निरूपत्वेनशाकासंबंधेन जनकत्वोत्वेनरू
पेण मातृबोधकं एकमेव लक्षणया पितृत्वमानत्वायां बोधकमितिनव्या
ः श्वशुरावित्यत्र पत्नीजनकशरीरत्वेन प्रातिस्विकरूपेण वा बोधः दंपती प्र
मा प्रकृत्य ब्राह्मणौ बानयेत्यत्र पुमान् स्त्रीयेति विरूपैकशेषपरत्वात्
ब्राह्मणपदे स्त्रीपुंसलक्षणैयेवा विलक्षणपुंस्त्वस्य क्रियान्वयः योग्य
त्वाभावात् विलक्षितविवादापदाया पुंस्त्वस्य लक्षणया च स्त्रीत्वस्यैव बोधिका॥
तत्र ब्राह्मणत्वेन तत्रासैव ब्राह्मणीबोधसंभवे ब्राह्मणपदे लक्षणामर्थे

नद्रूपमपि निराचिकीर्षुराह नीलोत्पलमित्यादाविति॥ अन्वयविधयैवसंस
र्गविधयैवेत्यर्थः एवकारेण प्रकारत्वव्यवच्छेदः तेन तत्प्रकारकबोधोपपत्त
यैक्षभेदवृत्तिरपि कल्प्येन इति भावः ननु नीलमुत्पलमित्यत्र सत्त्ववत्त्व
साधुत्वेनाप्यसाधुत्वमप्याप्यमिति न्यायेन न विशेषणविचक्ति॥ प्रयोगसा
धुः किंत्वन्यैराधिकापुत्रंचैतन् नीलमुत्पलमिति तत्र एतत्सामग्रीकाले नीला
भेदाभाववदुत्पलमिति मानसप्रत्यक्षादिवारणाय तत्र सा एतत्सामग्र्याः एव
कप्रतिबंधकतायाः विपरीततात्पर्यात्तरप्रत्यक्षनिर्णयप्रतिविशेषदर्शि
नस्य हेतुतया तदभावादेव मानसवारणात् विशेषदर्शनसत्त्वे च तदभाव
वत्तानिर्णयरूपप्रतिबंधकसत्त्वेन तत्र एतद्बोधस्यैवानुदयात् तादृशसा
मग्र्याः प्रतिबंधः वाच्यः कस्यापि मतान्तरे तोपि नीलत्वस्यापि संबंधेना
न्वयस्वीकारात् तादृशसामग्रीकाले अभेदसंबंधावच्छिन्नप्रतियोगिताक
नीलाभाववदुत्पलमिति प्रत्यक्षादेरनुत्पादस्य विशेषदर्शनाभावादेवेति
बोध्यमिति भाव्यं॥ तथा च नेदं प्रकारकबोधस्यापि रैक्ये अभेदेन नीलस्य निरूपित
त्वसंबंधेन समानाधिकरणमुत्पलमिति शाब्द एतत्सामग्रीकाले निरूपितत्वसं
बंधेन नीलाभाववदुत्पलमित्यादि प्रत्यक्षे प्रतिबंधकत्वात् तस्याः कल्पनादि

श.प्र.
७९

सिद्धेन साध्यतावच्छेदकस्वरूपस्यासत्त्वान् बोधार्थं निरावतरूपकल्पनात् कि विच्॥
विशुद्धस्यासत्ता विशिष्टविशिष्टपुंस्त्वस्य प्रासंगिकस्य कल्पनया आसत्त्वाप्रासत्त
लावत्तावत्प्रासत्त्यानिवृत्ता तया न हि धीधर्मधर्मानुपपत्त्या एवाप्रासत्
सीधर्मे मासमासाश्चित्तकासस्याप्यमूर्धापतत्तिरिति ति पोन्नन्तलुप्यादि
लक्षकीर्षपदं शिवद्गात्यन्तान्तपुंनोन्तुहिनत्यालितिविरूपैकशेष
त्वात् आर्षपदेन आर्षस्यपुंसो दूरत्वेन पुत्रपदे नत्वा पतत्वेन पुत्रदुहि
तरीत्वविनिर्हरानमस्याविभ्रमन्त्वौव विलुत्वादीनां बोधकस्य॥ युगपदत्ति
द्वयवितधानमुपगान् एकदैव ज्ञानस्य विसुत्वादीनां बोधकमित्यपा
स्तं॥ अपमसमासे कुंजकारः हीरप्यापीखुद्धशायामादौ धीलपनाम्नाधीनं
देनान्वयस्याप्युत्पत्तालक्षणयाकुंजादिपदानिकुंजादिपमकहारकर्मक
त्वद्वाधिकरणकादिपराणि व्युत्पत्तिसंकोचेनुशक्त्या कुंजादेर्विषयकत्वादि
संबंधेनान्वयबोध इति॥ कर्मधारये नीलोत्पलमित्यादौ नीलाभिन्नमुत्प
लमित्येदप्रकारकबोधः अनुभवसिद्धः॥ तत्र वैयाकरणमते कर्मधारयेशा
क्तिकल्पनात् समासत्वेनैव साकल्प्यते न तु विशेषतः कर्मधारयत्वेनेति
सर्वत्र समासे शक्तिः अस्मन्मते तु नीलपदस्यैव नीलाभिन्ने लक्षणेतिस ७९

तिविशेषणविशेष्यभावे दोषः॥ एवं च नीलोत्पलमित्यत्राप्यभेदे लक्षणा आव
श्यकत्वात्सव्यासमासयोः समानाकारकजनकत्वनियमात्॥ समानार्थकसमा
सार्थकत्वात्स्येव विग्रहस्यात्॥ न चैवं नीलोत्पलस्य कथमुत्पलेनान्वयं॥
नामार्थयोर्भेदेनान्वयाभावादिति वाच्यं समासातिरिक्तस्थल एव तन्नियमा
दिति चार्वाकाः आहुः अत एवेति॥ यत एव कर्मधारयेण समासेन शक्तिर्न वाल
क्षणा अत एवेत्यर्थः॥ वर्जीयानिति कर्मधारयेपदे समासे न शक्तिः न हित
त्पुरुषेपि शक्तिरिति न तत्पुरुषबहुव्रीयस्त्व्याघातः यदि च कर्मधारये लक्षणा
न हित तत्पुरुषेपि सेति चिन्त्यं यथा बहुव्रीयस्त्व्याघात इति न कर्मधारयेपि वृत्तिः
कल्प्या॥ नन्वपि विशेषणविशेष्यकल्पने दोषकत्वमनेव्यासमासयोः समानार्थ
कतानुरोधेनाभेदे लक्षणा आवश्यकीत्युक्तमिति वाच्यं॥ आरूढवानरो वृक्ष
इत्यत्र अनिवारेण तादृशानियमाभावात् तदिदमुक्तं अभेदस्यान्वयविधये
वन्नानोपपत्तेरिति नतु राजपुरुष इत्यत्रापि संबंधलक्षणानुपपत्तिः॥ व्यास
समासयोः समानार्थकतानुरोधेनैव तत्कल्पनात् नामार्थयोरिति व्युत्पत्ति
ः समासातिरिक्तस्थल एव अन्यथा संबंधलक्षणा तत्कल्पनानुनामार्थयोरि
र्विविधा अनिर्वाहादित्यत आह तत्र हीति तत्पुरुषेहीत्यर्थः पूर्वपदे राजपदेना

हशानियमाभावेपि संकल्पाप्तविवक्षितत्वात् आह तत्र हीध प्रकारकबोधस्या
नुभवसिद्धत्वात् तत्संबंधे लक्षणा कर्मधारयेतु नैवमिति भावात्तु संबंध
प्रकारकबोधस्त्वेद्रूप पदान्तुत्वः नास्ति येदृपन्न पदापि मा लुइत्यन्तु चेविचार
इत्यत आह संबंधि लक्षणे तुक्तमिति व्युत्पत्ति सत्त्वे वे मानाभावात् समास
समासयोः सर्वत्रापि नामार्थयोर्भेदेनान्वयात् राजपदस्य राजसंबंधीनि
लक्षणा नीलस्य वाचेदेनैवीलत्वेन्वयानाशा शब्दस्त्वति विरोध इति न कर्म
धारये लक्षणाकल्पनमिति भावः नन्वतत्पुरुषात् कर्मधारयस्य बहुव्रीयस्त्वमेवा
स्तु यदिति वाच्यं निषादस्थपतिं याजयेदित्यधिकरणविरोधापत्तेः तथाहि ए
तयैव निषादस्थपतिं याजयेदित्यत्र निषादःस्थपतिर्यस्मिन्निषकृत्रा हि स्त्री
कारे प्रथमपदलक्षणाकल्पनागौरवात् तत्पुरुषे उत्तरपदलक्षणाकल्पनेपि
पुरःस्थितेप्यमपदनाक्षणाकल्पनपुरुषस्यैव लघुत्वादिति निषादानां स्थप
तिरिति वा निषादश्चासौ स्थपतिश्चेति वा समासः तत्र च षष्ठीतत्पुरुषस्वीका
रे नामार्थयोर्भेदेनान्वयाभावेन निषादपदस्य निषादसंबंधिविलक्षणा
यत्रपकल्पनागौरवं कर्मधारयेन न तदिति तदपेक्षया लघुत्वात् कर्मधार
य इति सिद्धान्तः तस्माच्च कर्मधारयेपि लक्षणाकल्पने व्याघातः ननु निषा
दस्यांककालोतीयलेनतस्ययागोपयुक्तापूर्वविधा प्रमुक्ति कल्पनागौरवं

एवंचश्रुत्यैनाधायांतःनिरूपणसंकोचकल्पनंचेतितदपिस्पष्टेगुरुत्वएवंसाधुः॥
नचात्रछंदपदस्यनिषादेतरपरतासंकोचेतिवाच्यंस्ववेदेतराध्ययनस्यसंभवः॥
अध्ययनपदस्यभागोपिपुत्राध्ययनेवाध्ययनपरत्वेनमुख्यासरस्यापिपाठो
पयुक्ताध्ययनेप्रसंगइतिवाक्यविशेषतः॥माह्नेनराध्ययनपदत्वात्ध्ययनप
दस्यनेननिषादस्यभागोपयुक्तवेदेतरवेदनिषेधः॥स्वदांतरस्यतुपावदेद
तारीरेषतस्यविशेषतःभाम्नानावाइतिचेनेरेपमुलाघवात्कर्मधारयेप्रवृ
त्तेननुतरयएवविद्यायामुक्तिकल्पनस्यफलमुखत्वेनमाप्यत्वात्तत्रैतो
रवस्यचाप्रतिबंधकत्वात्कर्मधारयेपिजनुणाकल्पनेतुनस्यरूपापेक्षयाज
घुत्वाद्विनापूर्वविद्याप्रयुक्तिकल्पनगौरवस्यत्वेनचतत्रकर्मधारयस्वीका
रअनपेक्षएवस्यादितितत्रजहुणानंगीकारएवसाधुः॥ननुजहुणास्त्रा
भावेपिकर्मधारयएवस्वीक्रियतेननुतनुरुषइसत्रबीजाभावः॥शक्तिज्ञान
जहुणात्यनयोःशाब्दबोधहेतुतायांविशेषाभावान्नचसत्रवतिमुख्यार्थप
रत्वेनस्यार्थपरतायाःअत्यायत्वादितिन्यायएववशारणमितिवाच्यंअसतिमु
ख्यार्थपरत्वेविशेषतोबाधकेकर्मधारयविधयैववेदानांप्रामाण्यात्ननुत
त्पुरुषविधयापीतिमन्यतेपिसुवचत्वादितितस्मात्कर्मधारयेसमासत्वेनशक्ते
नशक्तेर्जहुणायावास्वीकारेपिवजीपस्त्वमुपपादयितुंशक्यतएवेतिचेन्नश्र

क्यसंबंधरूपजहुणातानस्यविनाशक्तितानअसंभवितयाशक्तितानादेवशा
ब्दबोधोपपत्तौजहुणातानकल्पनेगौरवादितिवेदिकश्चाएबोधस्यशक्तितान
मूलकत्वेजाघवस्यैवसिद्धांतवीजत्वादित्यलंपल्लवितेन॥ननुतथापिचित्र
सापामित्यत्रबहुव्रीहिगत्वेतत्पुरुषस्थलेवबहुव्रीहिजहुणोत्तरंतत्पुरुषजहु
णास्वीकाराद्विनिखिलंजहुणास्वीकारापत्तिः॥बहुव्रीहेरुत्तरपदार्थसंबंधिनिअनु
शासनाभावान्परसंबंधेनएकजहुणापाअनिर्वाहात्बहुव्रीहेःशक्तिस्वीका
रस्यावश्यकतयासमासत्वेनसत्यरावत्रसमासेनतल्पनमपितिचेन्नविग्रहपद
स्यबहुव्रीहिजहुणापाअन्यपदार्थपरत्वेनसंबंधिनिपरंपरासंबंधेनतत्पुरु
षजहुणापातजहुणाद्वयादेवयुगपदन्वयबोधोपपत्तेःयुगपद्वृत्तिद्वय
वितेधस्यमणिकृन्मतेऽनंगीकारादिति॥अघटपटइतिनञ्तत्पुरुषेपि
घटभिन्नःपटइत्यन्वयबोधस्यानुभाविकत्वान्नञःसमभिव्याहारमात्र
वाचकत्वेननतःअन्योन्याभावत्वप्रकारकबोधस्यासंभवितयाघटभि
न्नेसमासशक्तिरितिहूपपत्तिननुतत्पुरुषेपीति॥घटसंबंधिपरमितिघ
टसंबंधिनिजहुणाकमित्यर्थः॥संबंधश्चात्रप्रतियोगित्वंअनन्यलभ्य
त्वेवशाक्यार्थत्वान्नतत्रशक्तिरितिभावः॥कथंतर्हिअन्योन्याभावत्वप्रकार
बोधइत्यतआहनञ्पदत्वेति॥ननुसंसर्गाभावोअन्योन्याभावश्चनञर्थे

इति संसर्गाभाववत्त्वमन्योन्याभाववत्त्वं च शक्यतावच्छेदकमिति नञ्पदस्य नाना
र्थत्वकल्पनापेक्षयान्योन्याभावे जहल्लक्षणैवोचिता अनन्यलभ्यस्यैव शाब्द
र्थत्वादित्यपि प्राचेण हस्तसंगतिः। अत्यंताभावमात्रवाचकत्वे घटप्रागभा
ववद्दशायां ध्वंसदशायां च कपाले घटो नास्तीति बुद्धेरनुदयप्रसंगः। ध्वंसप्रा
गभावप्रतियोगिनि त्रिभिः सहात्यंताभावस्यैकाधिकरणे विरोधादत्यंताभा
वविषयकत्वासंभवात्ततः ध्वंसादिविषयकत्वमेवोपेयं तथा च तत्तदाधारा
एवाप्यसंसर्गाभाववति संसर्गाभाववत्त्वं च संसर्गारोपजन्यप्रतीतिविषयीभूताभा
वत्वं प्रागभावध्वंसदशायां कपाले घटो नास्तीति धीः प्रागभावादिविषयि
णी तत्र चोत्तरकालीनत्वविशिष्टसमवायप्रागभावस्य पूर्वकालीनत्वविशि
ष्टसमवायस्य ध्वंसस्य प्रतियोगितावच्छेदकसंबंधः प्रसक्तौ हि नेति विषे
ध्यत इति व्याख्यानान्तरमपि पूर्वोत्तरकालीनत्वविशिष्टसमवायेन कपाले
घटस्याभावानुनत्र तेन संबंधेन कपाले घटोऽस्तीति संसर्गारोपानन्तरघ
टो नास्तीति बुद्धिः एवं ध्वंसदशायां पूर्वकालीनत्वविशिष्टसमवायेन घ
टस्याभाववति तेन संबंधेन कपाले घटोऽस्तीति संसर्गारोपानन्तरं घटो
नास्तीति बुद्धिः॥ अत्यंताभावे तु संयोगमात्रेणैव घटवत्तारोपादत्यंताभा
व धीः॥ न चान्योन्याभावप्रत्यक्षे तादात्म्यारोपस्य हेतुतया तादात्म्यस्यापि सं
सर्गत्वेनान्योन्याभावेतिव्याप्तिरिति वाच्यं॥ संयोगादिसंबंधे एव नञादिप्रयोग

त्संयोगादिपूर्वसंसर्गाभावहारुस्यान्तादात्म्यातिरिक्तत्वेन संसर्गेस्मिन्प्र
वेशाद्यानवत्तद्यापि भूतलाकारकाभावप्रत्यक्षं वारणाय भावजातिकृत्र
मले प्रतियोगितानहेतुतायाः आवश्यकत्वेपि प्रतियोगिसंसर्गारोप
स्य हेतुत्वे मानाभाव इति वाच्यं एकदा नासंबंधावच्छिन्नाभावप्रत्यक्षवार
णाय तत्संबंधावच्छिन्नाभावप्रत्यक्षे तत्संसर्गारोपस्यापि हेतुत्वात्॥
न च ध्वंसप्रागभावयोः प्रतितः योगितावच्छेदकसंबंधे प्रमानाभावेन कथं
तत्प्रत्यक्षे प्रतियोगिसंसर्गारोपः कारणमिति वाच्यं॥ अनुत्तववनेवप्र
तिबध्यप्रतिबंधकभावानुरोधेनात्यंताभावस्येव तयोरपि प्रतियो॥
गितावच्छेदकसंबंधांगीकारात् तथाहि अत्यंताभावस्येव ध्वंसप्रागभावयो
योरपि तादृशायां तत्कालावच्छेदेन प्रतियोगितत्वावच्छेदकपास्नवत्ता
न तद्घटवत्तालां प्रतितद्घटत्वावच्छिन्नप्रतियोगिताकात्यंताभावप्रा
गभावादिप्रत्यक्षतानंतारिनापत्तिबंधकत्वपूर्वेपि स्वसमवायेन तद्
घटत्वावच्छिन्नप्रतियोगिताकाभाववत्तातात्वेनैव प्रतिबंधकतयात्यंता
भावस्येव तयोरपि संबंधावच्छिन्नविशेष्यधर्मावच्छिन्नप्रतियोगिताकत्व
स्वीकारात्तथाच संसर्गाभाववत्त्वमन्यतावच्छेदकं वदन्मीमांसा

वत्त्वमेव तत्पात्वमिति वाच्यं ॥ तादात्म्यपक्षपाते तु तन्मायेन ध्वंसप्रागभा
वादिसाधारणतया संसर्गाभाववत्त्वस्यैव तत्पात्वात् ॥ अघटः पट इत्यादौ स
मानाधिकरणपदानुरोधात् मीमांसाभावेति लक्षणं पाकल्पने पूर्वमन्योन्याभावे
शक्त्यानन्त्यप्रयोगाभावाश्रयत्वे नञ्न प्रवर्तिते रत्नेत्र स्मृतत्वेन घट इत्या
दौ मन्मते नैको मुख्याप्रतीतासत्त्वादित्याशयः ॥ लाघवेनेति ॥ संसर्गाभाव
त्वं संसर्गारोपजन्यप्रतीतिविषयाभावत्वमिति तदपेक्षया तत्र विशिष्टत्वेना
भावत्वस्यैव लघुत्वेनावच्छेदकतेति भावः ॥ ननु संसर्गाभावत्वं न संस
र्गारोपजन्यप्रतीतिविषयाभावत्वं संसर्गारोपस्य हि अनाहार्यस्य हेतुत्वेना
हार्यबाधबुद्धेः प्रतिबंधकतया भावप्रसक्त्यनुपपत्तिः ॥ आहार्यस्य तस्य त
दानीं बाधाभावेनासंभवः ॥ बाधकालीनेच्छाजन्यत्वात् तस्यैवाहार्यत्वात् ॥ यदि च
बाधसामग्रीकालीनस्याप्याहार्यत्वं इति मन्यते तथाप्यभावलौकिकप्रत्य
क्ष एव प्रतियोगिसंसर्गारोपस्य हेतुतया तादृशाभावाव्याप्तिः ॥ नव्यसंसर्गा
वच्छिन्नप्रतियोगिताकाभावत्वं न संयोगपन्योन्याभावेति व्याप्तिः ॥ संयोगेनाद्य
त्मस्य संयोगेण रूपत्वेन तस्यापि संसर्गावच्छिन्नप्रतियोगिताकत्वात् ॥ संसर्गतया
तादात्म्यतयावावच्छेदकतावैलक्षण्यं तु वर्णितं एवं तादात्म्यावच्छिन्नप्रतियोगिताका
भावत्वं संयोगसंबंधावच्छिन्नप्रतियोगिताकसंयोगत्वंताभावेऽव्याप्तेः ॥ संयो

तादात्म्यस्य संयोगरूपतया तादात्म्यावच्छिन्नप्रतियोगिताकत्वात् ॥ तादात्म्य
त्वेन तादात्म्यावच्छिन्नत्वोक्तौ च तादात्म्यत्वस्यातिरिक्तत्वोपगम एव निरुक्तौ
इति संसर्गाभावत्वादेरनुवृत्तत्वं धियति याज्यं मीमांसाभावत्वादिकमखंडमेवेति
किं तदपेक्षया वक्तव्याघटत्वं च सामान्यतादृशावत्सत्त्वधिविषयं सामान्य
धर्मस्यावच्छेदकत्वेनत्यपदार्थसंसर्गावबोधोपपत्तौ लक्षणं विनैवोप
पत्तिरित्यस्यैव वीजत्वात् संसर्गाभावत्वादीनामखंडत्वेन तत्पदार्थतत्संस
र्गाभावत्वप्रकारकबोधस्याभावत्वप्रकारकबोधस्य चानुपपत्तेः तत्त्वेन प्रकृ
तेन तत्संभवादित्यत आह विनिगमनेति ॥ संसर्गाभावत्वस्यातिरिक्तत्वे अभाव
त्वस्यातिरिक्तत्वेन तदपि शक्यतावच्छेदकमित्यर्थः ॥ अन्योन्याभाव एव ॥ संसर्गाभा
वे अन्योन्याभावे वेत्यर्थः तच्च यत्किंचिन्नञ् शक्यतावधारणमित्यपि इति संप्रदा
यानुसारिणी व्याख्या ॥ वस्तुतस्तु ननु अभावत्वस्य नञ्शक्यतावच्छेदकत्वे घटो ना
स्तीत्यत्र संसर्गाभावत्वप्रकारकबोधः घटो नेत्यादौ अन्योन्याभावत्वप्रकारकबो
धः कथं स्यात् परस्वसंसर्गावच्छिन्नप्रतियोगिताकः संसर्गाभाव इति विषयव्युत्प
त्तेः शक्यतावच्छेदकतया परिस्फुरणानुपपत्तिरिति चिंतायामनेनतथापि अभाव इति
प्रतीतेरखण्डोपाधिस्वीकारात्मकत्वात् ध्वंसत्वादिविषयकत्वेनैवोपपत्तावतिरिक्ता
भावत्वमानाभावरतिनाभावत्वं शक्यतावच्छेदकपत आह विनिगमनेति मस

गांभावत्वमित्यास्मीभ्यामावत्वमपि ज्ञाकमतावच्छेदकं विनिगमनाविरहादिति भाव
: न च प्रयोगस्य समंजस्याभाव इवान्योन्याभावेपि सत्वान्नियमतः प्रतापमाने ध्व
र्मित्वस्य स्वीकारेनानाधोच्छेदापत्तेः चैत्रोन पचमीत्यादौ चैत्राकर्त्तृकमते कर्त्त
साम्यं तथास्माकमपि प्रदर्श्यान्ते कर्त्तरि लिंगस्यात्तथा प्रकृतेपि वान्योन्याभावस्य
न्यासमभ्यायनसंचवारितिनव्यानुसारि णोव्याख्येति विचारणीयं ॥ यदि च घ
टो नास्तीत्यत्रात्यंताभावत्वप्रकारक एव बोधः आनुभाविकः ध्वंसप्रागभावयोर
त्यंताभावविरोधित्वेना मानाभावेन इवं स प्रागभावकाले घटो नास्तीति बुद्धेरत्यं
ताभावविषयकत्वेनोपपत्तेरिति विभाव्यते तदात्वत्यंताभावत्वमन्योन्याभा
वत्वं च शक्यतावच्छेदकमिति मंतव्यं ॥ अत्र च घटवति भूतले पत्तिर्वितद्घट
प्रतियोगिताकात्यंताभावसत्वात् तत्र घटो नास्तीति बुध्यापत्तिवारणाय पा
व्यपितावच्छेदकावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबलत्त्वं तत्र घटत्वाव
च्छिन्नप्रतियोगिताकाभावविषयकत्वात्तस्यावच्छिन्नप्रतिकिं चित्परासम
भिव्याहृतघटपदसमभिव्याहृतनञ्पदेत्तानत्वेनकारणतातेन नीला
घटो नास्तीत्यत्र न घटत्वावच्छिन्नाभावधीः किंतु स्वरूपं च नीलादिपदत्वेन वि
शिष्य पारेपं तेन तू तदादिपपसपत्ति आहारेपि न दोषः न च नयपायिनी
लो घटो नास्तीत्यत्रानुपपत्तिः ॥ अभेदेन नीलादिसाकांक्षत्वेराताते तिनद्या
र्थकं बुध्यादिनात्र स्तीत्यादिसंन्न वतिज पौगुरीनदन्यादि तिन्यायेन कंबु

ग्रीवादिमत्वस्य घटत्वापेक्षया गुरुत्वेनानवच्छेदकतया कंबुग्रीवादिमत्वाव
च्छिन्नप्रतियोगिताकाभावबोधो भ्रम एव कल्प्यः ॥ यद्यपि कंबुग्रीवाद्यवच्छि
न्नप्रतियोगिताकत्वस्याप्रसिद्ध्यानेन संबंधेन कंबुग्रीवादिमतीनाभावो
परिभ्रमः तथापि संसर्गांशे विषयतायामपि प्रकारतात्व विशेष्यताली
पगमेन प्रतियोगितायां कंबुग्रीवाद्यवच्छिन्नत्वांशे भ्रम इति बोध्यं केचित्तु
घटो नास्तीत्यादौ प्रतियोगितया घटस्य घटत्वावच्छिन्नप्रतियोगिताकत्वसंबं
धेन च घटत्वस्याभावो परि भानं कंबुग्रीवादिमान्नास्तीत्यत्र तु घटत्वावच्छि
न्नप्रतियोगिताकत्वसंबंधेन कंबुग्रीवादिमत्वस्याभावे परिभ्रमः स्वावच्छि
न्नप्रतियोगिताकत्वस्यैव स्वसंबंधत्वादित्याहुः ॥ आशयमविद्वान्दूषी
करोति नन्विति ॥ अत्र च घटयोरिति प्रतियोगितया घटस्याभावेपरि
बोधोपपत्तिरित्यर्थः घटपदेपीति अपितानञ्पदसमुच्चयः नामार्थयोरि
ति ॥ नीलो घट इत्यत्र नीलघटयोरभेदान्वयादर्शनेनेति ॥ अभेदातिरिक्त
संबंधेनेत्यर्थः न पावत्र यथाभावे प्रतियोगिसंबंधेन घटस्यान्वयो न संभ
वति तु नः पुनर्वत्वेन मो पिनामत्वादिति भावः कल्पतरुपतिनामार्थयोरि
ति व्युत्पत्ति स्वीकारे हीत्यर्थः न घट इति प्रथ------: साधुत्वान्नतियोग

नासंबंधेनापिनञर्थोऽन्वयाभावे घटस्यान्वयइतिभावः॥ संज्ञत्वस्यसाधुत्वेश
ब्दसाधुत्वस्यान्याप्यतयाप्रथमायामेवलक्षणमाहप्रथमायांवेतिषष्ठ्यर्थप्र
तियोगित्वेननुसुब्विभक्तौलक्षणनसंज्ञवतिकर्तृकर्मणोःकृतीतिव्यत्ययानु
शासनवैयर्थ्यापत्तेःकर्तृत्वलक्षणत्वप्रकारकबोधस्यषष्ठ्यात्तद्धर्मविशिष्टे
लक्षणायैवोपपादयितुंशक्यत्वादितिअन्तिमापेणशंकतेनत्वितितद्धियुक्
विभक्तौलक्षणानंगीकारेहिषष्ठीतः॥भारतस्यप्रवर्णव्यासस्यकृतिरितिकृत्कि
मक्कृद्योगेविहितषष्ठीतःकर्मनिकर्तृत्वमपिबोध्यं॥शिघ्रुषष्ठ्यान्वेननसबंध
मात्रशक्तषष्ठीतःसंबंधत्वेनबोधसंभवेपिकर्तृत्वत्वेनबोधेनसंभवतीति
तथाचतादृशानुभवोपपत्तयेलक्षणास्वीकारआवश्यकः॥नचानुशासनस्यश
क्तिनिर्णायकतयाकर्तृकर्मकृद्योगेविहितषष्ठीत्वेनकर्तृत्वादिमांशक्तिरि
त्यलामितिवाच्यं॥अनन्यलभ्यस्यशब्दार्थत्वादितिभावः॥असंदिग्धस्थलमुदा
हरतिकर्वचेतिएकस्याम्व्यक्तौदाराःपुंसिचभूम्नीचेतिबहुवचनांतदारश
ब्दःसाधुरितिभावःयद्यपिप्रकृत्यर्थगतसंख्यावाचकत्वंसुपांनतुतन्मा
त्रवृत्तिसंख्यावाचकत्वमितिनह्नतद्गुणानारोपबहुत्वान्वयःसंभवमेवतथा
प्येकोघटइत्यत्रापिअसाधुत्वतामात्रावद्दशायांघटगतगुणानारोपबहुत्वा
न्वयापत्तिः॥नचनपुंनैयबहुवचनेनलक्षणयाएकत्वंबोध्यतामिति

वाच्यं॥एकइतिपदेनैकत्वबोधसंभवेघटाइतिबहुवचनस्यैकत्वेतात्पर्यग्र
हेणलक्षणयाएकत्वबोधवारणासंभवात्प्रकृतेचसंभवत्वस्यसाधुत्वेश
साधुत्वस्यान्याप्यत्वादितिअनुशासनकीतिदंपंलक्षणावध्याःकर्मत्वेबहुवचने
नस्वंचैकत्वेलक्षणत्वाःइष्टैवेतिकर्तृकर्मणोःकृतातिव्यत्ययानुशासनवै
यर्थ्यमिपातुरविभक्तौनलक्षणेत्यस्यानुशालितविभक्त्यर्थातिरिक्तेनलक्षणे
तिषतरर्थइतिभावतस्यप्रणमितादौविभक्तौलक्षणापपत्ताचपिनघटःप
टइत्यत्रप्रथमायांकर्थलक्षणातथानुशासनाजावारितिभावः॥प्रकृतेपि
नत्रसमस्तिव्याकृतघटपदोत्तरप्रथमायामप्रवृषि॥अनुशासनेकीलक्षणा
संभवतीतितुल्यमित्यर्थः॥अनुशासनमेवाहनाएदमाऊरिति॥निपातेति॥
निपातःप्रतियोगिवाचकपदेनिपातःप्रयोगीयेनातेकेविदृश्ययाःनञारू
पाःप्रतियोगिवाचकपदरापान्विताप्यबोधकाकेविदृश्यमाइतियावत्नइतिहि
नकदाचिदपिप्रयोगः॥किंतुनघटःनपटइत्यादिरूपएवतथाचसत्यर्थप्रतियो
गिवाचकपदार्थान्वितत्वंअन्त्रैरेनविभक्त्यर्थद्वारावातत्रचघटपदस्यघटप्र
तियोगिकेलक्षणायांअन्त्रैरेनप्रथमायाएवप्रतियोगित्वेलक्षणायांतुविभक्त्य
र्थद्वारोन्वयःघटपदलक्षणायांप्रथमायाःशब्दसाधुत्वमात्रकत्वनापित्तयाप्र

पधापाएवप्रतियोगिलिलक्षणोविवेतत्रापिप्रतियोगित्वेलक्षणेअनुशासन
कीत्यत्र॥घघपिप्रतियोगिलुरूपार्थेप्रथमेतिनन्याकरणेनप्रतिपादितंतथा
पिनारत्रानुशासननान्वयंतत्रैवेत्यनुत्रासिनत्वमितिबोध्यं॥शंकनेनघापी
तिनत्रचेतिनघटःपटइत्यत्रघटान्योन्याभावस्यपटेकपमन्वयः॥नामार्थयो
रभेदातिरिक्तसंबंधेनान्वयपूर्वोधासंभवादित्यर्थः॥शंकते॥नत्रपदमिति
नर्थस्याभाववतःघटेअभेदेनैवान्वयइतिनेतद्व्युत्पत्तिविरोधइतिभावः॥घ
टस्येतिनञोभाववतिलक्षणायांघटस्यप्रतियोगितासंबंधनान्वयबोधा
भावःसंघनसंभवतीतिभावः॥तदेवाहतस्येतिअन्वयस्यपःपदार्थैकतिनञो
भाववत्वराधकतयाभावस्यैकदेशलात्तिलघःगौनित्यापत्तुरिभावोसवि
शेषणेहिविधिनिषेधौविशेषणेउपसंक्रामतःसतिविशेष्येबाधेइतिन्या
येनस्वगीयत्वइतिवृत्नित्यत्वस्यगीतेअपत्युतस्यपत्तुतेअन्वयापत्ता
पदार्थःपदार्थेनान्वेतिनतुपदार्थैकदेशेनेतिनियमस्यावश्यकतयानञ
र्थाभाववदेकदेशोभावेघटस्यप्रतियोगितयान्वयासंभवादितिभावः॥
तथापीतिशंकोपरिसमाधत्तेभेवमितिमसंबंधिकेति॥नामार्थयोरितिव्यु
त्पत्यानञोभाववतिलक्षणेवत्र्याभाववृत्तस्याभेदेनैवघटेस्यपदइतिनामार्थयो
रितिव्युत्पत्तिविरोधः॥पदार्थःपदार्थेनान्वेतिनतुपदार्थैकदेशेनेतिव्युत्पत्ति
श्चससंबंधिकपदार्थातिरिक्तस्थलएवास्तुपरमात्॥नञर्थाभाववदेकदेशे ८६

शेप्यभावेघटस्यान्वयेबाधकाभावइतिभावः॥ननुव्युत्पत्तेःसंकोचेमानाभावा
दित्यतआहयपोतिजनकत्वेइतिजनकपुत्त्रंहिपित्रत्वंतत्रैवदेशेजनकत्वेप
पार्थैत्रस्यनिरूपितत्वसंबंधेनान्वयइत्यर्थःतथाचव्युत्पत्तिसंकोचआवश्य
कइतिभेदः॥ननुचैत्रस्यपितेत्यादौजनकपुत्त्वरूपपित्रर्थैकदेशेजनकत्वे
त्रस्यनान्वयः॥किंतुस्वनिरूपितत्वत्वएकत्वसंबंधेनपित्रपदार्थेवेतिनप
दार्थपदार्थैनान्वेतीतिव्युत्पत्तिसंकोचः॥एवंचप्रकृतेपिघटोनास्तीतिघटप
दस्यघटप्रतियोगिकेवलक्षणायांघटप्रतियोगिकस्याभिन्नाभावाश्र
यतासंबंधेनपटेन्वयेबाधकाभावइतियतंद्रष्टव्यमिति॥अस्मेत्विति॥समु
दायएवअभाववत्त्वेवएकत्वकारेणाभावरूपपदार्थैकदेशेस्मुदायःइतरप
दार्थेतिघटपदार्थान्वयःपरंपरासंबंधेनस्वानिरूपिताभावाश्रयत्वसंबंधेन
त्वप्रतियोगिताकाभावाश्रयत्वसंबंधेनवेत्यर्थः॥नन्वनामार्थयोरितिव्यु
त्पत्तिंगशइतिवाच्यं॥नामार्थयोरभेदातिरिक्तसंबंधेनविनाप्रत्ययार्थपरितसंबं
धेनपितयैवाचयइतिबोध्यं॥आकृतिमस्वरसोद्भावनं॥तद्योजंनु॥घटाघ
ःअभाववान्पटइत्यन्वयैकस्याभावइत्याकांक्षायाःअनिवृत्तिः॥अननुग
मश्चननुअभाववतिलक्षणायांकादिपदार्थैकस्मादेवसत्तेसंकोचःनञ

त.प्र.
८७

पत्नीत्वस्याश्रयतासंबंधेन घटेन्वयेनामार्थप्रतियोगित्वस्य संकोच इति लुप्यतेति
मिति। अत्रावदति लक्षणाघटपदस्य घटप्रतियोगिकेन्नत्र यस्मिन्नो वदति लक्ष
णायां लक्षणाद्वयप्रसंगाच्चेत्यत आह युक्तंचेति व्युत्पत्तिसंकोचस्याविशिष्ट
त्वेनेतिशेषः लक्षकत्वमेव नञ्पदस्येति शेषः अन्यथा तत्रो भाववृत्तिल
क्षणया अकल्पने अघट इति विशेषणविशेष्यवाचकपदयोः समानविभ
क्तिकत्वस्य विरुद्धविभक्तिकत्वस्य वा नेदान्वयबोधहेतुत्वेन नञ्वन्वानंभा
वस्यैवाश्रयतयान्वयेनानेदान्वयबोधाभावेन प्रतियोगित्वपोगीवाचकपद
योः समानविभक्तिकत्वमनुपपन्नं स्यादित्यर्थः॥ निपातेति। निपातातिरिक्त
:आदिनात्ययपरिग्रहः॥ अन्वेति। निपातातिरिक्तनामार्थयोरभेदातिरि
क्तसंबंधेनान्वयबोधाजनकत्वमित्यर्थः॥ नामार्थप्रकारकशाब्दबोधे त्वाप्य निपा
तप्रत्ययाघटितनामपदजन्योपस्थितेर्हेतुत्वादित्यर्थः नञ्रूपत्वे न प्रत्ययघटितपदजन्योपस्थि
तेरसत्वेपि निपातजन्योपस्थितेः सत्वेन कार्यकारणभावद्वयस्य विकल्पितत्वेन
न्यते अन्यतमनिवेशे गौरवविरहेण व्याप्यतातिरिक्तत्वनिवेशे गौरवमत आ
ह अत एवेति अव्ययातिरिक्तत्वनिवेशादेवेत्यर्थः जैनेतिइवादिसादृश्यप्रति
प्रतियोगितान्वय इत्यर्थः॥ अत एव चंद्ररूपनामार्थस्य सादृश्यरूपनामार्थे
नेदातिरिक्तप्रतियोगितासंबंधेनान्वयोपपादनाय नाद्दश नियमसंकोचक
ल्पनाया आवश्यकत्वमितिभावः॥ अत एव चंद्र इव मुखमित्यादौ चंद्र इवार्थयो
र्भेदेनान्वयोपपादनाय नियमसंकोचस्यावश्यकत्वादेव॥ घटेति॥ घटतद्भाव ८७

शी: प्रतियोगित्वानुयोगित्वावस्य संसर्गाभिव्यक्तिविवक्षाना लक्षणाकल्पनमनाव्य
मितिभावः मानाभावात्नामार्थयोरित्यादि नियमे अव्ययनिपातातिरिक्त
त्वेनेति संकोचे मानाभावादित्यर्थः न च एवं चंद्र इव मुखमित्यादौ चंद्र इवार्थ
योः कथमन्वय इत्यत आह चंद्र इवेति॥ तत्र सादृश्येति चंद्रसादृश्येत्यर्थः नन्वेवमपि
वपदमनर्थकमत आह इव पदं चेति॥ नान्वयेति केवलचंद्र इति पदात्सादृ
श्यबोध इति चंद्रपदस्य चंद्रसदृशे लक्षणायां इवपदस्य मन्निवाहार्य तत्र मित
र्थः नन्वेवं तत्र लक्षणाकल्पनमपेक्ष्य इवपदस्य निपातप्रतीयमानसादृश्यप्र
क्तिरेवास्तामत आह अत एवेति चंद्रपदस्य चंद्रसदृशे लक्षकत्वादेव॥ अन्यथा
लक्षणाकल्पनेतरनुपपत्तेः चंद्र इवेतितद्वितीयानुपपत्तेः चंद्रपदस्य चंद्रस
दृशे लक्षणायां तस्याभेदेनान्वयाद्भेदेनान्वया विशेषणविशेष्यवाचक
पदयोः समानविभक्तिकतयास्तत्र तथात्वं चंद्रमिति विशेषणवाचकपदात्ता
द्वितीयाया आवश्यकीत्वयन्मते तु इवार्थसादृश्यप्रयतया मुखेन्वयोभेदान्व
याभावात् द्वितीयानुपपत्ते चंद्र इव मुखं पश्यामीत्यतो पिताद्दशबोधोप
पत्तेरितिभावः॥ ननु चंद्रपदस्य चंद्रप्रतियोगिकसादृश्ये लाक्षणिकत्वे इव मुखं प
श्यामीत्यत्र द्वितीयास्यद्वितीयासादृश्याश्रये लक्षणा तस्य चैत्रेन मुखेन्वय इति द्वि
तीयाचंद्रमिव मुखमित्यत्र समानविभक्तिकतापपत्तिः संभवतीत्यत आह घटः पटः

त्तत्रैव अन्यथा तत्रापि घटपदस्य घटाभाववति लक्षणा न स्यात्परं त्वेतावता यथाहुः क
विस्यापि प्रसज्येतेति चिंत्यं ॥ भूतले न घट इत्यत्राप्यावृत्तिविरहलक्षणाविशिष्टबोधस्
रूपत्वान्नञ्समभिव्याहृताभावबोधकत्वं नञो भाववृत्तिलक्षणाभिताकेवलं नृद इत्य
स्य प्रयोगाभावप्रसंगात् एवं पूर्वस्मात् सादृश्यविशेष्यकबोधाभावात् इत्यादिः सादृश्यप्रकार
ईक्षा कल्पना तेषां निरर्थकत्वमेवेत्यापाततः इत्यादीनां सादृश्यप्रकारकत्वमुपगमेऽपि
न व्युत्पत्तिसंकोच इत्यत आह अप्यवेतीषद्रूपप्रतियोगित्वरूपे विनञर्थे
स्य प्रतीतः प्रयमावि नञोऽर्थे घटवदीशत्वानुमविनञोऽनुसंधानं तदा च मनाग
पयोरिति व्युत्पत्तिसंकोच इति भावः ननु सुप्विनञो न लक्षणा मत आह अनु
शासनेति। निपातप्रयोगा हि फेविरुद्धयाद्यनुशासनबलादित्यर्थः अनुशासि
न विनञर्थप्राप्तिरिक्तस्थले सुप्विनञो लक्षणा नास्तीति भावः ॥ नन्वेवं घटो ना
स्तीत्यत्र घटपदीशत्वरप्रमयमा विनञोऽपि प्रतियोगित्वलक्षणेत्यर्थः भूतले न घट
इत्यत्रेवैकत्वंचं दवेति न प्रयोगः ॥ नं इदं यमुख्यमित्यत्रानुमवित्वनञ
संधानेपि बोधात् वंदपदत्वं च इत्सदृशाजलकृत्स्नेवोचितमिति युक्ता पि इवादी
नां ज्ञात्यासादृश्या बोधनानेषां निरर्थकत्वमेवेत्यपरमस्तु वेत्यनेन सूचितः
पृथिव्यां गंधो न जले इत्यत्र पृथिवीवृत्ति गंधो गंधाभावो जलवृत्तिरित्यन्वयबोध
स्वीकारे समानविशेष्यकत्वानुपपत्तेः पृथिवीवृत्ति गंधः जलवृत्त्यभावीयाग
धइत्यन्वयबोधस्वीकारे आवश्यकत्वमिप्रायिणामत आह अन्ये त्विति॥ न
तु पृथिव्यां गंधो न जले इत्यादौ समानविशेष्यकत्वानुरोधेन तथान्वयस्वीका

रेपि भूतले घटो नास्तीत्यत्र भूतलवृत्ति घटाभाव इत्यन्वयबोधे बाधकाभाव इत्य
त आह घटो नास्तीत्यत्रेति एकत्वादीति भावनान्वयितेव संख्यान्वयेन घटो ना
स्तीत्यत्र घटाभावो स्तित्वाश्रय इत्यन्वयस्वीकारे भावनाविशेष्ये घटाभावे द्वित्वा
देरसंभवितया घटौ न स्त इति न स्यात् तत्र एकत्वमात्रेनैकत्वबोधे बाधका
भावात् घटौ नास्तीति स्यात् भावनाविशेष्यवृत्तिसंख्याबोधकत्वादाख्या
तस्येत्यर्थः तर्हि कीदृशोऽन्वयबोध इत्यत आह किंत्विति॥ भूतले घटो नास्तीत्य
त्र सप्तम्या निरूपितत्वार्थकतया अस्धातोर्विद्यमानार्थकतया आख्यात
स्याश्रयत्वार्थकतया भूतलनिरूपितविद्यमानत्वाश्रयो घटाभाव इत्यन्व
यबोधस्वीकारे भावनान्वयिनि संख्यान्वयनियमात् एवं च भूते विद्यमानत्वा
श्रयत्वरूपाख्यातार्थभावनायाः अन्वयपरत्वाद्यन्वयेनाभावस्यैकत्वात् घटौ ना
स्तीति स्यात् अत एव न स्तः स्यात् आश्रयत्वमपि ॥ न चात्र भूतलवृत्त्यभावा
यो घटैः अस्तित्वाश्रय इति बोधे यन भावनायां घटस्यैवान्वितत्वया घटद्व
ये एकत्वबोधासंभवात्र घटौ नास्तीत्यस्यापत्तिरिति भावः केचित्तु भूतलवृत्त्य
भावप्रतियोगी घटः अस्तित्वाश्रयः इत्यन्वयबोधस्वीकारे किं निरूपितास्तित्वा
श्रयो घटः इत्याकांक्षायां अनिवृत्तेः न घटे भावनान्वय इति भावः कथं तर्हीति

भूतलनिरूपिताधिकरणताश्रयो घटाभाव इत्यन्वयबोधस्वीकारे हीत्यर्थः इत्यादावतिप्रा
वनान्वयित्वस्याविशेषितत्वात् घटौ न स्त इति न स्यात् स्याच्च घटौ नास्तीत्यर्थः॥
भावनेति॥ आः भावनापाश्रयप्रतियोगिभावः तत्प्रतियोगिनि सङ्ख्यान्वय इत्यर्थः॥ तथा
च भावनान्वयित्वेन सङ्ख्यान्वय इति अत्र नञ्समभिव्याहारो विनियामकः॥ नञ्स
मभिव्याहारस्थले तु भावनान्वयभावप्रतियोगिनि सङ्ख्यान्वय इति व्युत्पत्त्यन्तरेण
मतेनैव घटौ न स्त इत्यत्र घटत्वावच्छिन्नान्वयाभावे घटौ न स्त इत्यस्यानुपपत्तिः न वा
घटो नास्तीत्यस्यापत्तिरिति भावः क्रमेणेति॥ अन्यत्र भावनान्वयित्वेन सङ्ख्यान्वय
स्य दृष्टत्वात् प्रकृतेऽपि भावनान्वयाभावप्रतियोगिनि सङ्ख्यान्वय इत्यर्थः न चैवेति
अभावप्रतियोगिन्येव सङ्ख्यान्वय इत्यनेनेत्यर्थः तथा च नञ्समभिव्याहृताख्या
तार्थसङ्ख्याप्रकारकबोधं प्रति नञर्थाभावप्रतियोगित्वप्रत्यासत्तिरिति तेन हेतुत्वकल्पनमिति
भावः नञ्समभिव्याहारे पदविशेष्यविशेषणप्रतीपूर्वेण ज्ञानविशेष्यविशेष
णभावः प्रत्याप्यते अन्यथा वृत्तानेक्यनियमानुपपत्तेः॥ इत्थं च भूतले वृत्तित्वा
पुरस्कारेण घटत्वेन वाऽन्वय इति नियमवादिमतमपहरतीति॥ इत्थं भूतले घ
टौ नास्तीत्यत्र नञ्समभिव्याहारे आख्यातार्थस्य निषेधेऽन्वयो न इत्यत आह रूपचतुष्टयेति प्राकृत
भूतलभूतस्याश्रयत्वाभावस्येति बहुवचनत्वाऽऽवर्तितानेक घटद्वयान्वयबोध
धकत्वाभावरूपार्थः॥ नानाप्रतिघटस्य विशेष्यत्वादित्यर्थः॥ द्विवचनेति॥ घटौ न स्त इति
द्विवचनानुपपत्तिरित्यर्थः॥ इदमुपलक्षणम्॥ घटौ नास्तीत्येकवचनापत्तिरपि न
तिरेकः॥ अत्रावस्थाविशेष्यत्वे घटौ न स्त इति द्विवचनादिकं न स्यात् विशेष्यत्व
परस्य विशेष्यपदसमानवचनत्वनियमात् परत्वाख्यातस्यैकत्वात् घटो ना

स्तीत्येकवचनमेव स्यात् घटस्य विशेष्यत्वेन तस्य द्वित्ववत्त्वयोः सत्त्वात् क्रियापद
स्यापि द्विवचनादिकं स्यादिति भावः॥ घटौ नास्तीत्यत्र घटाविति द्विवचनात् द्वित्वा
वच्छिन्नैकत्वान्वयासम्भवाद्योग्यत्वं घटौ न स्त इत्यत्र तु घटद्वयेऽन्वयसम्भवात् योग्य
त्वमिति नानयोरस्मन्मतेऽविशेषः॥ नन्वेवं भूतले घटौ नास्तीत्यत्र सप्तम्यानि
रूपितत्वप्रकारतयाधेयत्वस्य विद्यमानत्वप्रकारतयाऽऽख्यातस्याश्रयत्वप्रकार
तया भूतलनिरूपिताविद्यमानत्वाश्रयत्वाभाववान् घटद्वयमिति बोधस्तथा चाख्याता
र्थाश्रयत्वस्याभाव एव विशेष्यो न तु घट इत्याख्यातस्याभावनाविशेष्यगतसं
ख्याबोधकत्वाभावात् कथं द्विवचनोपपत्तिरिति चेन्न तात्पर्यपरत्वाधारणाभाव
नाविशेष्ये सङ्ख्यान्वयस्वीकारेण प्रकृते परम्परयाभावनाविशेष्यत्वस्य घटे सत्त्वा
दिति एवं परम्परया विशेष्यस्यापि विशेष्यसङ्ख्यान्वयनत्वमवसेयं चैत्रो न पच
तीत्यादौ एकत्वादिति बोध्यम्॥ ननु तथापि द्वित्वावच्छिन्नघटत्वावच्छेदेन भूतलनिरूपि
तविद्यमानत्वाश्रयत्वाभावस्यान्वये एकघटवृत्तिभूतले भूतले घटौ न
स्त इति न स्यात् घटवृत्तिद्वित्वसामानाधिकरण्येन तत्र पञ्चिवे घटद्वयवत्त्वेपि
घटौ न स्त इति स्यात् अधिकरणान्तरीयघटे भूतलावृत्तित्वाभावादिति चेन्न घटवृत्ति
द्वित्वत्वावच्छेदेन घटे सामानाधिकरण्यान्वयात् अधिकरणान्तरीयद्वित्वेनत्र
तत्सामानाधिकरण्यपि एतज्जातीयघटवृत्तिद्वित्वे भूतलावृत्तित्वाभावसमा

नाधिकरणाभावात्र घटद्वयवति घटौ नस्त इत्यस्यापत्तिरिति ध्येयं ॥ नन्वेवमिति
सर्वत्रैवानुयोगिवृत्तित्वाभावस्य प्रतियोग्यन्वयप्रकारे इत्यर्थः ॥ जातौ न सत्तेत्य
स्य जातिवृत्तित्वाभाववत्ता सत्तेत्यर्थः तत्र च संबंधसामान्यावच्छिन्नजातिवृत्तित्वा
भावो समवायसंबंधावच्छिन्नजातिवृत्तित्वाभावो वा बोध्यते तत्राद्ये आह जा
तिवृत्तित्वाभावस्येति एकार्थसमवायेन सत्तायां जातौ सत्वेन तदभावबोधना
संभवादित्यर्थः नन्वेककालीनत्ववदेकार्थसमवायस्यापि वृत्त्यनियामकतयाति
न संबंधेन सत्तायाः सत्वेपि संबंधसामान्यावच्छिन्नवृत्तित्वाभावोस्त्येव जन्यमा
त्रस्य कालोपाधितया मूर्त्तमात्रस्य दिगुपाधितया कालिकदैशिकविशेषणतया
तत्रासंभवितयात्तदादृशापि वृत्तिविरहादिति वाच्यं जातिसत्तेत्यप्रतीतेस्तस्या
पि वृत्तिनियामकत्वात् द्वितीये आह जातिसमवेतत्वस्यैवेति प्रतियोगिप्रसि
द्धानसमवायसंबंधावच्छिन्नजातिवृत्तित्वाभावं प्रत्यनुयोगकत्वादिति भावः
पागतिजातिर्न जातौ न सत्तेत्यत्र जातिवृत्तिसत्ताभाव इत्युपपत्तावपि जा
तिर्न सत्तावपि जातिर्न सत्तावृत्तिरित्यत्र संबंधसामान्यावच्छिन्नसत्तावृत्ति
त्वाभावस्य जातावसंभवात् समवायसंबंधावच्छिन्नसत्तावृत्तित्वस्य चाप्र
सिद्ध्या निषेधासंभवात् तुल्यत्वं तत्रापीत्यर्थः ॥ अयोग्यत्वेवेति निश्चितान्वय
मयायकमिति भावः इदं चायुक्तं जातिर्न सत्तावृत्तिरिति वाक्यं यथाकथंचिदुपो ९०

पन्नतयोपपत्तावपि योग्यत्वमन्याय्यमत आह वृत्तिपदं मात्रादिति जातिर्न सत्ता
वृत्तिरित्यत्र लक्षणया सत्तानिरूपितसाक्षात्संबंधावच्छिन्नवृत्तित्वाभावं प्रति
यंति सत्तानिरूपितसाक्षात्संबंधावच्छिन्नवृत्तित्वं च स्वरूपसंबंधमादाय प्रमे
यत्वादौ प्रसिद्धमिति नोक्तदोष इति भावः तुल्यमिति जातौ न सत्तेत्यपि वाक्यम
यायकमिव योग्यत्वे च जातिनिरूपितसाक्षात्संबंधावच्छिन्नवृत्तित्वाभावः प्र
तीयत इति भावः किंतु सत्तापदं सत्तासमवायपरं समवाये चानुयोगित्वं
तथा च जात्यनुयोगिकत्वाभाववान् सत्तासमवाय इति बोध इत्याहुः सम
वेतेति पदाध्याहारेण तथा बोध इत्यन्वेतुं शक्यते तथापीति निषेधः न तु वृ
त्तित्वनिषेधः कथमिति ॥ नामार्थयोरभेदेनैव व्युत्पत्तेरिति भावः निपातेति
निपातातिरिक्तस्थल एव नामार्थयोरिति व्युत्पत्तिरिति भावः नामार्थमात्रस्य
नामार्थसामान्यस्य प्रतिपन्नत्वेनास्वरसः सूचितः इत्थं च व्युत्पत्तिसंकोचे
गौरवं एवं जातौ न सत्तेत्यत्र जातिवृत्तिः सत्ताभाव इत्यनेनावगतैवोपपत्तौ ल
क्षणादिकल्पनेपि नहि जातिर्न सत्तावृत्तिरित्यत्र लक्षणाकल्पनादन्यत्रापि त
थेत्यत्र प्रमाणमस्ति चावगतान्वयभावन प्रतियोगिवृत्तिसंख्याबोधकत्वेन
वचनैक्यनियमस्याप्युपपत्तिरिति न किंचिदेतत् किं नियामकमिति नञोभा

त.प्र. वपाकत्वावच्छिन्नत्वेन घटो नापंरक्तत्वत्रास्त्यभावः नूतनेन घटे रक्तत्वान्यत्वाभावः
८९ कथंप्रतीयतेत्यर्थः॥ सामग्र्यास्तुल्यत्वादितिचावः शंकते॥ अधिकरणेतिनञ्
जन्यान्यंताभावविषयकशाब्दत्वावच्छिन्नप्रतिअनुयोगिकार्यंप्रतिसमभिव्या
हृतसमभीपरतान्तेनान्योन्याभावविषयकशाब्दबोधेनअनुयोगिवाचक
पदसमानविभक्तिकप्रतियोगीवाचकपदेपत्तिलितेनचकारणत्वात्प्रकू
र्वोक्तदोषापत्तिःसामग्र्याविलक्षणत्वादित्यर्थः नपचतीति॥ पाकानुकूलकृ
त्याभावाश्चैत्रइत्यत्रानुयोगिवाचकपदसमभिव्याहृतनञ्समीपरतान्सा
भावेनतात्स्याःसामग्रीत्यमित्यर्थः॥ ननुवैयाकरणमतेआख्यातस्यकृ
तिरिशक्तनपाकनञ्मित्रश्चैत्रइत्येवबोधात्रिरसत्वंनातावबोधोदाहरणं
घटनरस्तनञाहचैत्रस्तितिचैत्रतुलाभावइत्यमित्यर्थःघच्छाःतुस्यमर्थेन
तुस्कामितंवृत्तनियमकयंवेधस्याभावप्रतियोगीतानवच्छेदकत्वेननिरू
पकतासंबंधावच्छिन्नप्रतियोगीताकत्वाभित्वाभावबोधासंजवाराय
तासंबंधावच्छिन्नप्रतियोगीताकत्वाभित्वाभावबोधत्वीकारेनचैत्रस्यापि
धनेनेदंचैत्रस्येतिप्रसंगात्स्वामित्वस्यचैत्रवृत्तित्वेनधनेआश्रयतासंबं
धेनासत्वात्रपरितात्यत्वनत्वनिपामकसंबंधांतरस्याभावप्रतियोगि ९

तावच्छेदकत्वस्वीकारेस्वामित्वमेवनघ्न यत्तदापिविनिगमनाविरहेणस्व
त्वमप्यर्थोविसेधः अन्योन्याभावबोधेसमानविभक्तिकत्वस्यनियामकत्व
मित्याशयाह अतएवतिक्रियाविशेषणत्वजिकमविभक्तिनपुंसकलिंगत्वं
विशेषणविभक्तिश्वसाधुत्वार्थःनपाचघटध्वनिमपाकानुकूलकृतिरि
त्यबोधेअन्योन्याभावविषयकेविशेषणविशे[illegible]समान
विभक्तिकत्वाचावेनअनिवारइत्यर्थःनञ्वितिनिति[illegible]समभिव्या
हारस्थलेनतेतिपयाघ्नतजंघटइत्युक्तिअजेदान्वयबोधेसमानविभक्ति
कपदत्वेनकारणतयाघ्नतलघटयोरजेदाम्बयबोधेआकांक्षाऽतीन
नञ्समभिव्याहारेघ्नतजंनघटइत्युक्तेघ्नतजघटयोरन्योन्याभावबोधः॥ अ
न्यत्रेतिनञ्असमभिव्याहारेप्रतियो[illegible]दान्वय[illegible]
याकांक्षात्वछेदेरत्यर्थः अन्यत्रेतिअसंतान्याव[illegible]कत्वमित्यर्थः
यापचतीतुक्तिपाकःनूकूजकृतितिचै[illegible]आकांक्षा[illegible]
यत्नपेवेतिनपचतीत्यत्रयाधीन्याभावबोधःकिंतुसंताभा[illegible]
तयाचप्रतियोगिपनुयोगिनोरजेदान्वयबोधेयादृशसमभिव्या[illegible]
तानकारातीनयोरन्योन्याभावबोधेतादृशसमभिव्या[illegible]तावका

न.प्र.
१२

रणं एवमसत्ताभावबोधे नेदान्वये आकांक्षा अन्यप्रतियोग्यनुयोगिको...
चकपदसमभिव्याहृतनञ्पदतानंकारणमित्यर्थः न दृष्टोपपादकता
कांक्षेति॥ नन्वसत्त्वेनञ्पदसमभिव्याहारे घटपदयोरिति विशेषण
विशेष्यवाचकपदयोः समानविभक्तिकत्वस्य विरुद्धविभक्तिराहित्यस्य
चैत्रान्वयबोधे आकांक्षत्वादिति भावः तत्र न घटः पट इत्यत्र नापदेति भू
तले घट इत्यत्र भूतलवृत्तिर्घट इत्यन्वयबोधात् आधारत्वस्य तत्
सप्तम्यर्थानान्वेदान्वयबोधकत्वमिति तत्रास्तताभावत्वमस्य एवेति भाव
अन्नवान्नो भावबोधे विशेषणविशेष्यवाचकपदयोः समानविभ
क्तिकत्वस्य तत्रत्वेदधिनसुंदरमिमन्नपुमविकल्पानुसंधानेनज्ञापबोधे
पपादने पिचैत्रीन पच्नती त्वन्नाख्यात स्वकर्तारिल... पाचैत्रपाककर्तृ
त्वेदान्वयात्र स्तोकपचतीत्यादौ पाकेस्तोकस्यैव ... तिपादनाद्धतत्रस
मानविभक्तिकत्वाभावापत्तितादः विरुद्धविभक्तिराहित्यस्य तत्रत्वेचप्र
तियोगिपदोत्तरसुप्विभक्तिविरुद्धविभक्तिशून्यानुयोगिपदसमभिव्या
हृतनञ्पदत्वेनानुयोगिपदोत्तरसुप्विभक्तिविरुद्धविभक्तिशून्यप्रति
योगिपदसमभिव्याहृतनञ्पदत्वेन वा हेतुत्वेन पचतीत्यादौ प्रतियोगिप
दोत्तरविभक्तेरप्रसिद्धेः वस्तोकं पचतीत्यादावनुयोगिक्रियापदोत्तरसुपवि १२

विभक्तिश्चाप्रसिद्धत्वयानाक्रान्तरूपेण हेतुत्वमनयोरन्यतरहेतुत्वेनान
नुगमः किंतु विशेष्यानुयोगिप्रतियोग्युपस्थापकनामपदयोः समभिव्याहारे
समानविभक्तिकत्वं तत्र घटेन नील इत्यत्र घटपदार्थान्वितनीलपदार्था
भेदान्वयबोधे नीलपदसमानविभक्तिकघटपदसमभिव्याहृतनञ्पद
त्वेन चैत्रेण पचतीत्यादौ धर्मिपराख्यातसमभिव्याहृतनञ्पदत्वेन स्तो
कं पचतीत्यादौ क्रियाविशेषणसमभिव्याहृतद्वितीयान्तस्तोकादिपदसमभिव्या
हृतनञ्पदत्वेन हेतुतेति बोध्यं॥ ननु पुरुषोत्तम इत्यत्र ननावतकर्मधार
यः कर्मधारये विशेषणवाचकपदस्य पूर्वनिपातनियमेनउत्तमपदस्य
पूर्वनिपातापत्तेः न च विशेषणविशेष्ययोर्कामचार इति वाच्यं जातिनि
मित्तके गुणनिमित्तकविशेषणमेवेति नियमात्॥ एतत् एव नीलमनील
मिति न प्रयोगः नापि षष्ठीसमासः न निर्धारणे इत्यनेन निर्धारणेषष्ठीस
मासनिषेधात् तन्नाहृसंप्रति पर इति पुरुषोत्तम इत्यादौ कविशेषणं
परस्यादित्यनेन परनिपातस्याभ्यनुज्ञासन सिद्धत्वात् कर्मधारयस्यैवोप
गमात्॥ अथ तथापि विशेषणं विशेष्येण बहुलमिति सूत्रेऽजयोरुपाद
नवत्कदिशमण विशेष्यनावच्छेदकयोः परस्परव्यभिचारित्व एव कर्मधा

र्यप्रइति प्रा॰॥ एवंचात्र दुःखप्रतियोगिकत्वस्य घटादिसाधारण्येन पुरुषावच्छि
कोत्तमत्वरूपत्वासंभवेन सर्वत्र हिंसात्वरूपोत्तमत्वं स च पुरुषत्वव्यापि
चादित्वानावाक्रूयं क्रमधारयइति चेन्न तडुड्रूपतावच्छेदकविधेयतारूपत
न्नित्यादिलएवकर्मधारयात् अतएवद्वितीयपावृत्तस्येति संगच्छते एतेनो
डुड्रूपतावच्छेदकस्य विधेयत्वित्र वृत्तित्वमेव नं तत्रमिति संप्रदायमतमपा
स्तं प्रमेयवह्निमानित्यादावगतेः॥ न च तथापि गुणवरूपस्येत्यादाव
नितिरिक्त्यान्वतत्रानायत्यानेद्धर्यकषष्ठीसमासोपपत्तिमात्रं॥ अन्यथात्र
वन्यतेप्यगतेः॥ अपवादषष्ठीसमास एवार्पं॥ न च नानिद्धारणेदुत्वनेन
निषेधः॥ समुदायापेक्षयाजतिगुणक्रियादिभिरेकदेशस्य पृथक्करण
णं हि निर्धारणं॥ निर्धारिते विशिष्टसत्तायामन्यधर्मावच्छिन्नापेक्षयाजा
तिगुणक्रियाद्यवच्छेदेनयत्किंचिद्धर्मिणो भेदबोधनमिति यावत्तन
त्रा जातिश्च भेदेपि समासवाक्याद्यन्तत्तद्बुपस्थितेः यथा नराणांक्ष
त्रियः शूरतम इति तत्क्षत्रियः शूरतन इति अपि च निर्धारणरूपार्थेषि
ष्ठीसमास निषेधे विशेषेः शिरइतिवद्भेदार्थकषष्ठीसमासे बाधका
भावः अत्र च निर्धारणषष्ठ्यां भेदेनेदर्थः स्थित्यपिपदार्थे विशेष्यत

पा प्रकृत्यर्थविशेषणतया भेदश्चान्वयः नराक्रमिकः क्षत्रियः क्षत्रियान्य
नरान्यशूरतमभिन्नशूरतमपदावच्छेदेन वृत्तत्रियान्यनरान्यतान्वया
नातः क्षत्रियान्यनरस्यशूरतायांतादृशप्रयोगः जटानां क्षत्रियः शूर इति
विशालीयापेक्षयानिर्धारणप्रत्ययेनेद्धर्यः अभेदसंसर्गकबोधे विरुद्ध
विभक्तिरहितस्यनियामकतयासंसर्गमयाद्यपातज्ञानासंभवात्॥ किंतु
निर्धारणषष्ठ्याः अभेद एवार्थः नराभिन्नक्षत्रियस्य तादात्म्येन शूरतमत्वा
वच्छेदेनान्वयाद्याहेशिरइत्यादिनविशेषः॥ शूरतमत्वं वतरनिष्ठशूरतमत्वा
विशेषः तेन देवनामपिशूरत्वान्नतादृशप्रयोगानुपपत्तिरित्याहुः॥ नन्वक्षत्रि
यमुख्यविशेष्यकानुभावापत्त्यापायत्तेः नराणां प्रमेयः शूरइत्यपिप्रयोगापत्ते
श्च क्षत्रियनरः शूरत्ववान् क्षत्रियभिन्ननरः शूरतमत्वाजावद्वानितिज्ञानमत
मपिप्रथमांतापमुख्यविशेष्यकबोधस्यानुभवापत्त्यापत्तेरनादेयं॥ क्षत्रि
यान्यनरत्वव्यापकभेदप्रतियोगितावच्छेदकत्वाविशिष्टतादात्म्यसंबंधेननरा
भिन्नक्षत्रियेशूरतमस्यान्वयइत्यनेद एव निर्धारणषष्ठ्या अर्थइत्यपरे॥ अन्ये
तु निर्धारणषष्ठ्यातादात्म्यस्य वच्छेदकत्वार्थः॥ अवच्छेदकत्वविरूपितं तानावोन्यो
न्याभाववर्षीसमभिव्याहृतप्रातिपदिकस्यवक्ता र्थेतरतम्यभिन्नजत्वणाव

यथार्थेऽव्यवच्छेदे चाधिकरणत्वं न लाक्षणिकार्थः प्रतियोगित्वेन च विधेयपदार्थो
भासते तत्र क्रियाणां कर्त्ता प्रभुरिंद्र इतीत्यादौ कर्णपदस्य कर्णाः कर्णाभिन्नार्थः तत्क्रि
याभिन्नकर्णः प्रभुरद्य इतिमान तत्र क्रियाभिन्नः कर्णाभिन्न प्रभुरद्यान कृत्यन्वयबा
नित्यत्र पः॥ गवां कृष्णा संपन्नक्षीरेत्यत्र कृष्णापदस्य कृष्णा तद्व्याप्यार्थः॥ गवा
भिन्नाकृष्णा संपन्नक्षीरागवाभिन्नात्कृष्णात्वासंपन्नक्षीरतमाभिन्नेत्यन्वयबोध
इत्याहुः पुरुषेषूत्तम इति सप्तमीसमास एव नन्वनिर्धारणे षष्ठीसमासवत्सप्त
मीसमासोपि निषिद्ध इति वाच्यं स्वरविशेषनिबोधसिद्धवत्त्र प्रयोजनत्वात् षष्ठी
समासेउत्तरपदस्यांतोदात्तत्वं सप्तमीसमासे पूर्वपदप्रकृतस्वर एवतिष्ठतिद्
तिसप्तमीसमासो निर्धारणे निषेधेपीसाधुरिति अपि केचित् तत्कृतं पल्लवि
तेन॥ ननु लाघवेनैव प्रयोगः किं मित्यन्वयकं प्रयुंज्महे इति चापेन तद्वेधो
ष इति विहाय गंगायां घोष इति लक्षणा मुख्यप्रयोगे वाना कांक्षायां शैत्यपाव
नत्वादिप्रतीतिरेव प्रयोजनत्वेनावसीयते साच्च कृतवृत्त्यानोपपादयितुं शक्य
तिव्यंजनाख्यातिरिक्त वृत्तिरूपैपत्तेन्य तआह व्यंजनाचेति न वृत्त्यंतरमिति शा
क्तिलक्षणातिरिक्तान वृत्तिरित्यर्थः तथा वैयाकरणा शक्तिलक्षणे लिकातदा
शक्तिलक्षणातिरिक्ताभावः पदे तत्र शक्तिलक्षणे लिकानतदार्यत्तिरिति

अतिरिक्तवृत्तित्वाभावसत्वमप्याह तं तेनन सिद्ध्यसिद्धिव्याघातः कथं तर्हि
शैत्यपावनत्वादिप्रतीतिरित्यत आह लक्षणयैवेति नद्यैति व्यंग्यार्थप्र
तीत्युपपत्तिरित्यर्थः प्रत्यक्षानुमित्योरिव सामग्रीभेदाभेदे इत्याशंक्य तेनन्वि
तीदं लक्षणयैव तद्यसिद्धिरूपं॥ मुख्यार्थ इति॥ गंगायां घोष इत्यत्र गंगा
पदमुख्यार्थप्रवाहे इतरान्वयानुपपत्तिः घोषाधिकरणत्वानुपपत्तिर्लक्ष
णाबीजमित्यर्थः ननु किमेतावतेत्यत आह नचेति नहीत्यर्थः॥ वायस्तानु
मितोगतासिन पुनस्तत्साधमस्यांतिकपित्यत्र गतानामपि कृती प्रतिनगतासो
ति मुख्यार्थान्वयानुपपत्तिरस्त्येवेति अधमपदे व्यंजनास्यत्रवस्तेवेत्यत आ
ह सर्वत्रेति तदेवाह गच्छ गच्छसीति॥ गच्छ गच्छसि चेत्कांत पंथानः संतु ते शिवा
ममापि जन्म तत्रैव भूयाद्यत्र गतो भवा नित्यत्र तव गमनेन मम मरणं तव गम
नत्वं मागा इति व्यज्यते तत्रत्र मुख्यार्थान्वयानुपपत्ते लक्षणाबीजमिसत्र
वीनत्वाशापथविकल्प दूषयन्निकिमिदमिति॥ तज्ज्ञानकत्वं लक्षणाज्ञानकत्वं गं
गेति शक्यसंबंधो हि लक्षणा सच गंगायां घोष इत्यत्र गंगातीरयोः संयोगस्तत्र
चनानुपपत्तिज्ञानं कारणमित्यर्थः॥ तज्ज्ञापकत्वं॥ लक्षणाज्ञापकत्वं॥ चतुरा
रिनेति यत्र गंगापदस्य गंगातीरत्वेन लक्षणा तत्र तत्संबंधविषयकत्वाद्धात्म

कतानस्यानुपपत्तितान्वतिरेकेणानुदयेपि चिंचुरादिनातद्यौकिक्कन्नत्यत्तेननना
येनदपिलक्षणानुव्यतिरेकव्यभिचारेणन सामान्यतस्तत्तापकत्वसंभवइतिभावः॥
नचलक्षणाविषयकशाब्दबोधजनकत्वमेवतत्त्वमितिवाच्यंयत्रगंगापदस्यता
रेजहत्स्वार्थलक्षणातत्रगंगातीरसंबंधस्यशाब्दबोधजनकत्वमेवतत्त्वम
रेणानतयात्वसंभवइतिएवमग्रेपीतिहृदयं॥नापीतिनतात्पर्यग्राहकत्वेश
क्यसंबंधरूपलक्षणातात्पर्यग्राहकत्वमूःतात्पर्येति।प्रकरणादिनापितद्ग्र
हात्ःतात्पर्यग्रहादित्यर्थः।नचमुख्यार्थान्वयानुपपत्तितात्पर्यस्यव्यभिचारेणन
सामान्यतात्पर्यग्रहहेतुत्वं।एवंचक्वचिदपिलक्षणापिस्वज्ञानापेक्षणीपिस
र्वज्ञानपिस्तितनघाप्रकारांतरेणैवतात्पर्यग्रहसंभवेनलक्षणायांबाधका
भावइतिभावः॥नतुलक्षणाबीजत्वं।यष्टीरिति।यष्टीःप्रवेशयेत्यत्रयष्टिपद
स्ययष्टिधरेलक्षणा।नचतत्रमुख्यार्थेपियष्टौप्रवेशान्वयानुपपत्तिरितिव्यभि
चारादित्यर्थः।ननुमुख्यार्थेइतरानुपपत्तिर्लक्षणाबीजमपितुतात्पर्यविषयता
नुपपत्तिरेवेतिकथंव्यभिचारइतिशंकते।तात्पर्येति।अत्रापियष्टीःप्रवेशयेत्य
त्रापीत्यर्थः।भोजनप्रयोजकप्रवेशनमेवात्रतात्पर्यविषयःतदनुपपत्तिमु
ख्यार्थेपएवतस्येत्यर्थः।सर्वत्रेति।गंगायांघोषइत्यादावपीत्यर्थः॥अस्तुको ५५

दोषइत्यतआह॥साचेहापीति।साच।तात्पर्यानुपपत्तिश्च।इहापि।गच्छगच्छसी
त्यादिव्यंजनास्थलेपि।अत्रेति।अत्रकांतगमनाभावएवतात्पर्यविषयःत
दन्वयानुपपत्त्यागमनबोधकपदस्यगमनाभावेलक्षणायैवोपपत्तौनातिरि
क्तवृत्त्यंतरकल्पनंगौरवादितिभावः।लक्षणाप्रयोजनं।गंगापदस्यतीरेलक्ष
णाप्रयोजनं।शैत्येति।स्यान्मतेशाब्दप्रयोगेकिमित्यवाचकंप्रयुंज्महइत्यापा
त्गंगातटेघोषइतिविहायपत्गंगायांघोषइतिलक्षणायाःप्रयोगस्तत्रशैत्य
पावनत्वादिप्रतीत्यर्थमेवेत्युपायतेलक्षणायाःप्रयोजनवत्वनियमादिति
भावः।ननुप्रतीतिःशैत्यपावनत्वादिप्रतीतिः।लक्षणेति।शैत्यपावनत्वादौल
क्षणासाध्येत्यर्थः।प्रयोजनाभावात्।प्रयोजनस्यप्रयोजनांतराभावादित्यर्थः।प्र
योजनवत्वेपिलक्षणायांकिंदोषइत्यतआह।लक्षणायाश्चेति।यथागंगापद
स्यतीरेलक्षणायांतस्यप्रतिपत्तिरितिशैत्यपावनत्वादिप्रतीतिःप्रयोजनंत
थाशैत्यपावनत्वेलक्षणायांतस्यप्रयोजनांतराभावात्लक्षणायानिर्वाहेण
प्रयोजनप्रतिपत्तयेअनंतलक्षणावृत्तिरादरणीयेतिभावः।शैत्यपावनत्वादौल
क्षणैव।नचतस्याःप्रयोजनाभावः।शैत्यपावनत्वादिप्रतीतेरेवप्रयोजनत्वादि
तिसमाधत्ते।लक्ष्येति।नचापिलक्ष्यप्रतीतिप्रयोजनकत्वेपि।प्रयोजनांतरं।ल

स्य प्रतीत्यतिरिक्तं प्रयोजनान्तरं॥ ततः किं जन्यप्रतीत्यतिरिक्तप्रयोजनाभावे किम
निष्टमित्यपि ननु लक्षणया लक्ष्यप्रतीत्यतिरिक्तप्रयोजनकत्वनियमस्तथापि एवा
निष्टमित्यत आह॥ तदन्यथाहेति॰ ननु गौरवेपि अन्यत्र दृष्टत्वात्तथा कल्पना
यं च घटकाघटकारणेनाथ गौरवाद्दोषत आह॥ अप्रयोजकत्वादिति॰ न हि यत्र
कुत्र चिद्दृष्टमात्रेणैव तादृशनियमावधारणं मानाभावादिति भावः॥ तथा च
लक्षणायैव प्रयोजनप्रतीतिनिर्वाहे सति न वृत्त्यन्तरकल्पनमिति॥ प्रसिद्धतया
लक्षणानूनां व्यंजनानां निरस्यानूनां तो निरस्तुं शंकते सत्यमित्यादिना नानार्थे
ति॰ सैंधवमानयेत्यादौ अर्थविशेषे इत्यश्वादिरूपार्थस्य प्रकरणादिग
मनप्रकरणादीति॰ नियोगपक्षमिति॰ शक्तानावच्छेदकैक्ये सति शक्यतावच्छे
दकनानात्वमेव नानार्थत्वं तत्र सैंधवमानयेत्यादौ भोजनप्रकरणेश्व
स्य विशेषतात्पर्यवशाद्वाच्यार्थप्रतीतिजनकत्वं अभिधाया नानार्थविषय
कशाब्दबोधे जननीये प्रकरणादिकं सहकारि अवश्यं वाच्यमिति भावः॥ प्रकर
णादिभूतेति॰ गमनादिप्रकरणश्यामादिरूपार्थान्तरमित्यर्थः॥ तत्रापीति
प्रत्यये अभिधाशक्तिः सहकारिति प्रकरणादिरूपसहकार्यभावादित्यर्थः लक्ष
णामूलमिमनु यत्र तत्र योगात् लक्षणया अयोगात् मुख्यार्थान्वयानुपप

त्त्यादि लक्षणाकल्पनं प्रकृते च तदसंभवेन न लक्षणेति भावः अतः अर्थान्तरप्र
तिपादनरोधेन न यत्र तत्प्रतीत्यर्थं न्यायरूपवृत्त्यन्तरमावश्यकमिति भावः॥ ना
नार्थस्थले अर्थान्तरप्रतीतिशक्त्यैव न च प्रकरणाभावे व्यञ्जकपर्या इति वाच्य
म् तस्य सहकारित्वासंभवादिति न वृत्त्यन्तरमिति समाधत्ते प्रकरणादीनामि
तिः सहकारित्वेति॰ नानार्थविषयकशाब्दत्वावच्छिन्नं प्रति प्रकरणादीनां
प्रकरणेनाश्वम् नतु गमनस्य निवारादिमर्थः न तत्र प्रकरणमननुगमेपि
तात्पर्यग्राहकत्वेनानुगमात् अव्यभिचारादित्याशंकते नार्थेति॰ जायवादिति॰ ना
नार्थविषयकशाब्दत्वावच्छिन्नं प्रति तात्पर्यग्रहजनकत्वेन कारणतया जायमा
मानात्पर्यग्रहत्वेनैव हेतुतास्थितिः न प्रकरणादीनां सहकारित्वेति भावः॥
ननु तात्पर्यग्रह एव सहकारी तथापि तत्स्वरूपसहकार्यभावादेव कथम
भिधायापरपदार्थप्रतीतिरित्यत आह सचेतितात्पर्यग्रहश्चेत्यर्थः इदं पी
ति॰ प्रकरणादिभूतार्थान्तरलक्षणीयत्यर्थः॥ अस्तीतिः नानार्थस्थले शक्तया एका
र्थप्रत्ययानन्तरम् परं पुनः प्रतीतिः तत्रापि तात्पर्यग्रहे सत्येवेत्यर्थः तात्पर्य
ग्रहोयथार्थविशेषः अस्य विकल्पः परंतु पत्रार्थे प्रकरणे तत्र प्रथमत एकमात्र
र्थग्रहादनन्तरं प्रतीतिरर्थान्तरे तु तात्पर्यग्राहकांतराणां तात्पर्यग्रहे सत्यप

शाव्यानीतिरिति कृतेवृत्त्यंतरस्वीकारेणेति हृदयम्॥ लक्ष्यैकदेशमपलक्ष्य
शिमनतत्त्वदृश्यतातिवाहितेलंव्यंजनयेत्युक्तं तत्र लक्षणातोचेद्दूषयधय
तिस्यादेतदिति। पदवृत्तिः पदनिष्ठा। इयंतु व्यंजनत्वेन गतिमानतःपदत
देकदेशेति। पदेपदैकदेशेवर्णेक विधाक्यरचनाविशेषेक चिद्वर्णसंगा
विशेषेआकारेआकारे। क चिद्रूपितेति। आश्रयभेदात् लक्षणाव्यंजनयो
राश्रयभेदात्भेदः लक्षणाव्यंजनयोर्भेदइत्यर्थः। असिद्धेरिति। व्यंजना
त्वेनाभिमतवृत्तेः पदैकदेशाद्याश्रितत्वासिद्धेरित्यर्थः। कथं पदैकदेशादि
पविशेषप्रतिपत्तिरतआह तदेकेति। पदैकदेशादेरपोह्यार्थः॥ ननुतत्र
तिपादका। ननुतत्त्वदर्शप्रतिपादकाः पिततन्नतित्वतु कल्पयंजनालक्षवृत्ति
स्तत्रसारिणीमेतिभाव॥ लक्षणेति लक्षणानन्त्वनुगपबोधेकारणमित्यर्थः
त्वात्मेतिस्विनरचितेत्यर्थः मत्रस्वपं अन्यतात्पर्येणकाव्यं रचितं श्रोतुश्चा
त्मपदापगृह्यबोधस्तत्र। एवं देवताप्रसादिनारचितकाव्येतस्य पदताभा
भावेनतदर्थतात्पर्याभावेनचतात्पर्यग्रहासंभवादित्यर्थः॥ तत्प्रकारादि
ति। चमत्कारीबोधविषयत्वादित्यर्थः। नधाचतात्पर्यतानरूपसहकारप
भावेनलक्षणापानदर्थबोधस्याप्यपादयितुमशक्यतयाव्यंजनास्वीका

र्येतिभाव॥ अंग्यहतिगंगायांघोषइत्यादौ व्यंजनतया हि नौत्वधात्वन्तर्भवना।
पतेइतिस्पष्टत्वमिमर्तं तत्रयदिनतीत्यर्थग्रहापेक्षात हि लक्षणायाःप्रमीततव
त्वनियमात् केशावाजुकारिभूता तिरेव व्यंजनयास्यादिति तत्रतात्पर्यग्रह
स्यावश्यापेक्षणीकत्वेत्वृत्यंतरेणेतिभावः। शंकतेवासनेति। सहृदयानां
क्विदेवसंस्कारविशेषः प्रतिज्ञाव्यपदेशोपि नशोत्यपावनत्वमेवप्रतीयते
नकेशायालुकादिकमित्यर्थः नियम इति शैत्यपावनगत्वादेरेवभाननियम
ःसएववासनाविशेषपरिपाकएवनियामकः॥ तत्रदर्थविशेषबोधेनिया
मकः नतुतात्पर्यग्रहस्यापिबोधेनियामकत्वेलक्षणायामुख्यार्थान्वयानु
पपत्तुपयोगीनस्यात् तस्यतात्पर्यग्रहकत्वेनैवतस्यारूपयोगादित्यतआ
ह वस्तुनइति। अस्याक्षिपश्च ज्ञापतेअनुमीयते। पत्रनातुमितिसामग्रीत
त्राद्रसंभाव्यतेवेति। उत्कटकोटिकसंशयरूपसंभावनाविषयीक्रियतेवेत्य
र्थः नत्वितिन्यायमागाद्व्याप्तिगमनासाव प्रतीतीछपोक्षु रितत्वरूपतात्प
र्यमात्रमुन्नीयतेसंभाव्यतेवा नतुशाष्णमकस्तन्निणयः येनहृत्यंतरस्वीका
रणापमीतिभाव॥ शानएवेति। शक्तिलक्षणेत्यर्थः नहीतिप्रजयतीत्यत्रप्रक
र्षेण नवीष्वते। तत्रजीधातोर्जयार्थः प्रकर्षमकस्तार्थः आदेरूपसर्गस्यशक्या

नंगीकारात् व्यंजनाख्या वृत्तिः स्वीकारणीयेत्याखंडजार्थः । तस्मात् प्रादेरुपसर्गस्य
द्योतकत्वात् व्यंजनानंगीकारे दिग्यथा अव्याकृता इति । उपसर्गाणां क्वचिद्वृत्ति
शक्यतावेन शक्यसंबंधरूपायाः लक्षणायाश्च संभवादित्यर्थः । तथा च प्रकर्ष
बोधार्थं व्यंजनास्वीकार आवश्यक इति भावः ॥ ननु प्रतिः निधातुनैव लक्षणया प्रक
र्षबोधे प्रशब्दे वैयर्थ्यमित्यत आह । प्रशब्द इति । तात्पर्येति प्रकृष्टजयताल्पर्यग्राह
कत्वमर्थः प्रशब्दसमभिव्याहारे एव हि जिधातोः प्रकृष्टजयप्रतीतेस्तोद्वारेति
इति तात्पर्यग्राहात् अन्यथा जयतीत्यत्रापि प्रकर्षबोधापत्तेः । नन्वेवमुपसर्गा
णां द्योतकत्वप्रवादव्याघात इत्यत आह । तत्त्वे पीति । तात्पर्यग्राहकत्वमेवेत्यर्थः ॥
नटस्थः शंकते । नन्विति । तत्पदः शक्य एव । निधातोः शक्य एव । तथा च शक्यस्यैव तदर्थबो
धसंभवे किमर्थः तद्द्योतकत्वेऽपि लक्षणेति भावः । प्रकर्ष इति । तत्र शक्यत्वाभावादिति भावः
शक्यं । जिधातोः विशिष्टजयपरत्वेऽपि प्रकृष्टजयपर्यवसायित्वे तथापि जिधातोर्न पर्यंश
क्यतावच्छेदकमिति प्रकृष्टजयत्वप्रकारकबोधो विना लक्षणां न संभवतीति तेन
रूपेण लक्षणा । ननु जयपदस्य शक्त्या प्रकर्षस्य लक्षणया बोधे बाधकाभाव इति वाच्यम्
युगपद्वृत्तिद्वयविरोधेन शक्तिलक्षणाभ्यां निरूढबोधासंभवादिति भावः । ननु त
यस्य शक्यत्वात् कथं तत्र लक्षणा इत्यतः प्राचां संप्रदायमाह । तदाहुरिति । शक्यादि

शक्यतावच्छेदकविशिष्टे शक्तिस्वीकारेण शक्यतावच्छेदकस्यापि शक्यत्वात् तत्र शक्या
दित्यस्य शक्यतावच्छेदकादित्यर्थो विवक्षितः । ननु प्रादेरुपसर्गस्य प्रकर्षे शक्तिस्वीका
रेण शक्यतावच्छेदकस्यापि शक्यत्वात् तत्र शक्यादित्यस्य शक्यतावच्छेदकादित्यर्थो वि
षयः । ननु प्रादेरुपसर्गस्य प्रकर्षे शक्तिः निधातुनाप्यजयबोधः स्यादित्युपसर्गे
शक्तिवादी शंकते । नन्विति । अनन्यलभ्यत्वादिति । धातोर्जयरूपादिनाऽन्यलभ्यत्वादित्य
र्थः । अन्यथा गंगापदस्यापि तीरे शक्त्यापत्तेरिति भावः । ननु व्यतिसिद्धस्य त्रासधाती
र्जिपात् कथं व्यत्ययप्रत्ययः धातोस्तत्र जुप्रत्वेन लक्षणासंभवात् तत्पदस्योप
सर्गशक्तिरत आह व्यतीसिद्ध इति । तु प्राधातुपतिः स्पन्दः सन्निति शेषः । धातोरप्रति
संधाने व्यत्ययमबोधाभावे दृष्टापत्तिमाह धातुजोपमिति । न तूपसर्गाएव शक्तिः
धातोरेव तात्पर्यग्राहकत्वमित्येव द्विनस्यादित्यत आह संक्षेप इति । उपसर्गं विना
पि प्रतीत्यत्र धातुप्रयोगात् तत्र शक्तिराववुपकीः क्वचित् स्योपसर्गस्याभावा प्रयोगान्न
तुल्यत्वं ॥ एवं धातोरेव शक्तत्वे प्रजयतीत्यादौ जयेश आख्यातार्थभावनान्वयिनस्या
त् । प्रसपातीप्रकृत्यर्थान्वितस्यापि बोधकत्वमिति युक्तमिति बोध्यम् । न च जि
धातोः नयवत् प्रकर्षेऽपि शक्य एवास्तु किं तत्र लक्षणया एकतिङुपस्थाप्यकृति

वर्त्तमानत्वयोरिवैकपदार्थयोरपि प्रकृतिप्रत्ययोः परस्परमन्वयः धातूनामने
कार्थत्वस्वीकारात्वादिति वाच्यम्॰ धातुनामनेकार्थत्वे हि न तत्र सर्वत्र सार्थकत्वम्
किंतु व्याकरणकोशाद्यनियन्त्रितत्तदर्थकत्वं तत्तु लक्षणयापि प्रकृतिबोधोप
पत्तेर्नशक्तिसाधकमिति॰ अथैवं प्रत्ययमात्रस्यैव निरर्थकत्वप्रसंगः घटमि
त्यादावपि घटपदस्य घटकर्मत्वलक्षणयैवोपपत्तेरिति चेन्न॰ घटमानयेत्या
दौ घटपदस्य घटकर्मत्वलक्षणोपगमेऽपि चैत्रः पचतीत्यत्र पच्धातोरेव पाक
कर्तृलक्षणया तात्पर्येण चैत्रेण तन्वैत्रयोरन्वयापत्तिः नामार्थयोरिव नामार्थ
धात्वर्थयोरपि अभेदातिरिक्तसंबंधेन साक्षादन्वयबोधानुपगमात्॰ अन्य
थापि द्वितीयादेरेकत्वशक्तौ बीजाभावः घटपदस्यैकत्वविशिष्टघटे लक्ष
णयाप्युपपत्तेः अथ कर्मत्वशक्तिः एकत्वविशिष्टघटे लक्षणायां तात्पर्य
ग्राहकत्वाभावः॰ एवं पचतीत्यादौ कार्यत्वेष्टसाधनत्वादेरपि विध्यर्थत्वविलोप
:पच्धातोरेकार्यत्वेष्टसाधनत्वविशिष्टपाके लक्षणयाप्युपपत्तेः॰ विधिः क
लौ शक्तः विशिष्टार्थे तस्य ग्राहकमस्येति वाच्यम्॰ घटपदादेर्वा विशिष्टलक्ष
णाद्वितीयादेर्वैकत्वे इत्यत्र विनिगमनाविरहात् द्वितीयादेरेकत्वबोधक

त्वसिद्धिः कर्मत्वं वा शक्यतावच्छेदकमेकत्वत्वादिकं वेत्यत्र विनिगमनाविर
हात् उभयवाच्यत्वशक्तिः एवं पचतीत्यत्र धातोर्वा विशिष्टलक्षणं विधेर्वा का
र्यत्वेष्टसाधनत्वे इत्यत्र विनिगमनाभावाद्विधेरपि कार्यत्वादिबोधकत्व
सिद्धिः उभयवाच्यत्वशक्तिरिति॰ एवं चोपसर्गाणां मध्ये यस्योपसर्गस्य क्वचनाप्य
र्थे शक्तिर्नप्रामाणिकी तस्याद्योतकत्वमेव यथा प्रादेर्यस्य च शक्तिः प्रामाणि
की न तस्य द्योतस्य द्योतकत्वं यथा निरुपादेः अन्यथा उपकुम्भमित्यव्ययीभा
व समासानुपपत्तेः तस्य निरर्थकत्वेन विराकांक्षत्वात्॰ पूर्ववाक्यं च वैयस्य
सोऽव्ययीभावइत्यतइत्यनुशासनात्॰ नन्वप्रादेरपि निरर्थकत्वेन विराकांक्ष
त्वात्॰ पूर्ववाक्याच्च वैयस्य सोऽव्ययीभावइत्यतइत्यनुशासनात्॰ नन्वप्रादेर
पि निरर्थकत्वेन तेन सह समासानुपपत्तिः नाम्नामेव समासविधानात्स्व
त्वाच्चिन एवनामत्वादिति वाच्यम्॰ स्याद्यंतमिदन्नामेकमित्यनेन स्याद्यं
तत्वेन तस्यापि नामत्वात् वस्तुवाचि निनामानीत्यस्यैकदेशिमतत्वादिति
केचित्तु॰ प्रोत्तरजित्वेन प्रकृष्टजयेऽशक्तिरित्युपसर्गाणां शक्त्यावच्छेदक
त्वमिव द्योतकत्वम्॰ तथा चोपसर्गाणां औपसंहानिकी शक्तिरित्युपस्याकृभु
त्याधजनीत्यत्र भोजने भजनपूर्वकालीनत्वस्य निपमेन प्रतीतिः पूर्वकालसंख्या

प्रत्ययार्थः न च मासादिना व्यवधानेऽपि तथा प्रयोगापत्तिरिति वाच्यं । तथा विव
क्षणाया अभिष्टत्वात् । अन्ये तु अव्यवहितपूर्वकालत्वं क्त्वा वाच्यम् । अव्यवधा
नं तु क्रियांतरानुकूलविलंबाभाववत्त्वमेव । तदनुकूलक्रियायास्तु व्यवधा
यकत्वात् ईदृश्यपि व्यापाराणामित्याहुः अत्र च दृष्टौ विषयांतरसंचारे विभु
क्त्वा व्रजतीति प्रयोगात् क्रियांतरानुकूलविलंबाभावरूपस्याव्यवधानस्य स
त्त्वात् उत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगिकालत्वमेव तदव्यवहितपू
र्वकालत्वं । कालश्चात्र यावता कालेन भोजनानंतरं व्रजनं तावान् स्थूलक्षणा
लोपाधिविशिष्य निवेशनीयः तेन नासंभवः । ननु दिवसादिरूपोपि । तेन
न दिवसादिना विलंबे भुक्त्वा व्रजतीति प्रयोगापत्तिरिति चेत् न तु काल
स्यानंत्याच्छक्तित्वेन निवेशानादननुगतत्वादुक्तेयम् ॥ तस्मात् कर्षकालत्व
मेव क्त्वा वाच्यं । ननु मुखं व्यादाय स्वपितीत्यादौ ओष्ठपुटविभागरूपव्यादा
नस्य स्वापोत्तरकालीनत्वात् व्यादाने स्वापपूर्वकालत्वाभावेन कथं क्त्वानि
र्देश इति चेन्न स्वापपूर्वकालेऽपि व्यादानसंभवेन तथा प्रयोगात् । मुखव्या
दाने इत्यत्रैव निरूढलक्षणया तथा प्रयोगादिति । प्राचां करास्तु । समानकर्तृ
त्वमेव क्त्वा वाच्यम् । नियमतस्तन्निरूपेण बोधात् । समानकर्तृकक्रियाद्वय १००

स्यैकघटसंभवात् भोजनव्रजनयोरेककर्तृकत्वेऽवगते एकस्यापरपूर्वकाल
त्वस्याक्षेपेणैव लाभान्न पूर्वकालत्वे शक्तिः । विभिन्नकर्तृकेऽपि पूर्वकालत्वसं
भवेन तेन समानकर्तृकत्वाक्षेपासंभवात् समानकर्तृकत्वशक्तिरेव । ननु
यज्ञोपवीतं वहन् पंथानमीक्षमाणो धीयानो गच्छतीत्यादौ युगपदनेकक्रि
याकर्तृत्वस्यैकस्मिन्नपि संभवान्नैतेन पूर्वकालत्वाक्षेपो युक्त इति वाच्यम् । न
याप्येककर्तृकप्रधानक्रियाद्वयस्य युगपदसंभवेन तयोः पूर्वोत्तरभावनि
यमात् । न च यत्नानासिधाय स्नात्वा त्वेनन्न विष्यति । मत्प्रसूतिमनाराध्य
जनेतितासत्नापते लत्रमत्प्रसूतिमनाराध्यनेकमानन्न विष्यती चित्रक
र्तृकेऽपि क्त्वा निर्देशात् कथं समानकर्तृकत्वं क्त्वावाच्यमिति वाच्यं ॥ तत्रानाराध्यास्थि
तस्मितिक्रियांतरमध्याहृत्य समाधानस्य सर्वसम्मतत्वादित्याहुः तदसत्
समानकर्तृकत्वस्य क्त्वावाच्यत्वे तस्य प्रधानक्रियापेक्षयोत्तरकालत्वेनाप्यु
पपत्तेर्न भोजनेनियमेन पूर्वत्वाक्षेपसंभवः न च भोजनव्रजनक्रिययोरे
कः कर्तेति नानुभवो पितु भोजिक्रिया व्रजनक्रियैककर्तृकेति । तथा च तु तत्क्रि
यायाः प्राधान्येनाप्रतीतेस्तत्रैव पूर्वत्वान्वय इति वाच्यं । प्राधान्येनोपस्थिते
र्व्याकांक्षाप्रयोजकत्वेन शाब्दबोधे कर्तृत्वे विनिक्रियामकर्तृत्वं स्यात् । इत्याहि

मनुमानं तत्र स्यात् क्विद्धर्मतयौरिकप्रयोजकत्वेन यौ वा यद्व्यभिचारेण सं
भवेपि पूर्वमात्रासैककलिंगाभावेन पूर्वत्वाक्षेपासंभवात्. नच परमते श्रात्त्वानु
पस्थितस्यापि ज्ञाप्तिज्ञानमिति वाच्यम्. ज्ञातुत्तिमायेन तन्मतस्यदुष्टत्वात्. नच
भुक्त्वा व्रजतीत्यत्र ख्यातार्थकालवरुद्धेनन व्रजनस्य कालान्वयनिराकांक्षत
यातद्वृद्धत्वानुनिष्क्रियायामेव पूर्वान्वयः इत्थंच कालांतरसंबंधित्वेनानुप
स्थितिरिव प्राधान्येनोपस्थितिः सत्त्वे व नियामिका निवाच्यम्. पदानुपस्थितस्यापि
द्बोधाविषयतया कालांतरासंबंधित्वेनोपस्थितेरकिंचित्करत्वात्. नच समा
नकर्तृकत्वेन पूर्वत्वाक्षेपः किंतु समानकर्तृकप्रधानक्रियारूपस्यैकदासंभ
वात् प्रधानसमानकर्तृत्वेन पूर्वत्वाक्षेप इति वाच्यम्॥ तत्र प्रधानत्वं नभाव
न्मुख्यत्वं तत्र पदेत्वं. मुख्यत्वंच इदंनवतु मा वा इदं तु सारे वैत्यनात्मा विरहरू
पं. क्रिययोस्तु त्यवद्वैपत्तेपि एकदासंभवेन व्यभिचारात्. तयोद्वैपताया
श्च विनिगंतुमशक्यत्वात्. किंतु समानकर्तृकत्व एव पर्यवसानात् रूपियतेन तु
प्रधानत्वे यीतिकृपं तेन पूर्वत्वाक्षेपः तदंशेपि ज्ञाक्य वगमेतु किंपराइं पूर्वका
लत्वेनेतिन किंचिदेतत्. नच समानकर्तृकत्वस्य नियमेन प्रतीतेत्व त्रापि ज्ञाप्ति
रिति वाच्यं॥ अनित्यत्व न वत्वरूपे समानकर्तृकत्वेनेदांशो ज्ञातत्याचाचे पित्वा १०९

जकारत्वांशोजन्नकर्तारिकं न न कर्तुरेदान्वयबोधसंभवात् तयोः कृतिमा
त्रवाचकत्वेपि कृजन्न पूर्वकालीनभोजनकृतिमान्कृजन्नकृतियानित्यन्वये
भोजनकजनन्कृत्योरैकाधिकरण्यापि भानसंभवात्. नच समानकर्तृकत्व
स्याशाक्यात्वेचैत्रो गच्छति मैत्रो भुंक्ते इति प्रयोगवत् चैत्रो भुक्त्वा मैत्रो गच्छतीति
भिन्नकर्तृकेपि क्त्वाप्रयोगप्रसंग इति वाच्यम्. वस्तुतः समानकर्तृकक्रियापा मे
वक्त्वस्य साधुत्वात्. भोक्तुं व्रजति पचन्व्रजति इत्यत्रेव तत्र तुमुनोरपि समानक
र्तृकत्वज्ञानं केनाप्यनंगीकारात्. मणिकृतस्तु आनंतर्यमेव क्त्वा वाच्यम्. पूर्वका
लत्वस्याशाक्यत्वे व्रजनपूर्वकालीनं भोजनमिति ना व्रजनविशेष्यकानुभवः स्यात्. ता
पं तेतु भोजनानंतरं व्रजनमिति व्रजनमिति व्रजनविशेष्यकोनुभवः॥ तथाचानु
भवस्यात्र विनिगमकत्वेनानंतर्यमेव वाच्यम्. नच पूर्वकालत्वस्याशाक्यत्वेपिन
स्य निरूपकतासंबंधेन व्रजनेन्वयोपगमे व्रजनविशेष्यकोनुभव उपपद्यत एवे
ति वाच्यम्. न भुक्त्वा व्रजति त्यत्र व्रजनेस्वरूपसंबंधेनपूर्वकालत्वस्याभावबोध
नेभुक्त्वाव्रजत्यपि न भुक्त्वा व्रजतीति प्रसंगात्. भोजनमिति पूर्वकालत्वस्य व्रजनेसत्ता
त्रकृतानिरूपकत्वसंबंधस्याभावप्रतियोगितावच्छेदकतया निरूपकत्वस्यान्तरावा
संभवात् ... सम्यपि करासिद्ध्यपने अधीत्य तिष्ठतीत्य प्रयोग

न्या.प्र. [illegible]निरंतराध्ययन[illegible]वत्तन्मयोगाद्यकदाचित्समानाधिकरणविरहेपवि
१०२ शिष्टव्याप्तत्वमपिक्त्वाप्रत्ययार्थः व्याप्तिश्चकालिकी. तथाचाध्ययनसमाना
धिकरणविशिष्टाध्ययनव्याप्यत्वमितिमानित्वप्रतिक्त्वाप्रत्ययार्थः व्याप्तिश्च
न्यपक्षी. निरंतराध्ययनविरहिणी अन्यदीयतथाध्ययनमादायातिप्रसंगका
रणपसमानाधिकरणपनिवेशः नचस्वीयाध्ययनसमानगच्छकरणएवविशि
ष्टपरकीयाध्ययनमाप्यत्वितिमादायतथापतिप्रसंगोदुर्वारइतिवाच्यम् प्र
धानक्रियायांप्रकृत्यर्थीभूतैकव्यक्तिनिरूपितयोरेवसमानाधिकरणव्या
प्यत्वयोः क्त्वाप्रत्ययेनबोधकत्वस्यव्युत्पत्तिविशेषबलेनकल्पनात्. एतेनपूर्व
कालत्वस्यैवक्त्वावाच्यत्वेव्यादानभुक्त्वाजेपिमुखंव्यादायस्वपितीत्यादिप्रयो
गापत्तिरितिनिरस्तं अत्रापिव्याप्यस्यैवक्त्वाबोध्यत्वात् ननुतथापिव्यादाननिरू
पितव्याप्तेरभावादिवत्तथाप्रयोगावत्यसंभवात्. भुंक्तेवाहंन्नोननुपीत्वा
दौभोजनपानयोः तत्पूर्वकालत्वस्यनप्रोतदानंतर्यस्यवाविवक्षितत्वेपित
थाप्रयोगानुपपत्तेरपिक्त्वाप्रत्ययार्थः॥ एवंचभुक्त्वाव्रजतीत्यादौपू
र्वकालत्वमानंतर्यवाउक्तरूपचसमानाधिकरणविशिष्टव्याप्यत्वंजन्यत्वं
वार्थइतिक्त्वाप्रत्ययोनानार्थएवेत्याहुः परेतुक्त्वाप्रत्ययस्यरूढत्वगतत्वात् १०२

समास्वयाख्यात्माश्रयोपस्थितेः कृत्प्रत्ययेनसंभवात् व्यादानाश्रयेसाधारणअव
त्स्यविशिष्टवैशिष्ट्यमितिन्यायेनवबोधः विशिष्टवैशिष्ट्यमितिन्यायेनशा
ब्दबोधेचतद्रूपतावच्छेदकविधेययोःसमानकालीनत्वज्ञानंव्युत्पत्तिसिद्धं
अन्यथातिलकीकृमकुर्वीतेत्यादौतिलकविशिष्टकर्मकारणवैशिष्ट्यतात्प
र्येतिलकेसत्त्वेवकर्मकरणमित्यस्याभावातितकभूत्वाजेपिकृतस्यक
र्मणोनेकव्यानापत्तेः तथिकामकैसमाकस्यानघक्यापातात् तथाचैता
दृशव्युत्पत्त्याकर्मकरणोत्तिलकसमानकालीनत्वस्यज्ञानेतद्रूपसमानेच्यत
मपानकालीनत्वस्याभावकनैकव्योपपत्तिरितिः प्रकृतेपिमुखंव्यादाय
पितीत्यादौव्यादाय स्वपितीत्यादौव्यादानविशिष्टेस्वापाश्रयत्ववैशिष्ट्यज्ञाने
व्यादानसमानकालीनत्वस्यज्ञानान्नव्यादानभुक्त्वाजेनतथाप्रयोगापत्त
संभवः एवमधीत्यनात्रुनीत्यादावपीत्याहुरितिदिक् एवमेवकारस्यान्य
योगव्यवच्छेदः अयोगव्यवच्छेदोत्यंतायोगव्यवच्छेदश्चार्थः तत्रविशेष्यसं
गतेवकारस्तुजेपाथएवधनुर्धरइत्यादौपाथान्यतादात्म्यव्यवच्छेदोबुध्य
तेः पार्थान्यतादात्म्याभाववद्धनुर्धराभिन्नःपार्थइतिबोधः एवपिमात्रेवंग
धइत्यत्रएषपिकामसमवेतत्त्वाभाववान्एषिमात्रसमवेतत्वान्योधरति

धातुः प्रथमेतरविशेषणविभक्तिसमभिव्याहृतत्वमपि निपातानां कं: अ
भ्यन्नावनात्वयबोधानुपयेहयिआपेकाशमित्यपि प्रसज्येतः तपाका
न्ययोगव्यवच्छेदबोधे विशेष्यवाचकप्रथमेतरविशेषणविजत्यसमतर
समभिव्याहृतैवकारो हेतुः विशेषणसंगतैवकारस्थले योगव्यवच्छेद
बोधः चैत्रः पाण्डुरः एवेत्यादौ नांशबत्वावच्छेदेन पाण्डुरत्वायोगव्यव
च्छेदबोधात्। नीलं सरोजं तु भवत्येवेत्यादौ क्रियासंगतैवकारस्थलेत्यंता
योगव्यवच्छेदबोधः अयोगे आत्यंतिकत्वं अन्वयितावच्छेदकव्यापकरू
पस्य व्यवच्छेद इत्यर्थः इदं चान्वयितावच्छेदकसामानाधिकरण्येनायो
गव्यवच्छेदः अत्यंतायोगव्यवच्छेदः अन्वयितावच्छेदकावच्छेदेनायोग
व्यवच्छेदो योगव्यवच्छेद इति परिभाषेति ध्येयं। आख्यातस्येति। आख्यात
त्वं न जातिः निष्ठारिनांसंकरात्। नापि टजादिकारस्याधारणं तत्त्वं तत्तत्
न्यतरसाधारणस्यैकस्य तत्त्वस्याभावात्। किंतु रूढिसंबंधेनाख्यातवद
वत्त्वं ततः परित्न लकारे च धातुस्मिवुक्तानामाख्यातपदरूढिः तथाच प
चतीत्यादिनां दीपस्थलेन्याख्यातापत्तिबोधापत्तिः आनुपूर्वीज्ञान
स्याप्रसदृशत्वादितितेतरिति विज्ञाय तेनैव तत्तिपुत्त्वादिकमेव विशिष्य

वयतावच्छेदकं बोध्यम्। नन्वेवं केवलं तिप्रत्ययादिकृते बोधापत्तिः आनुपू
र्वीज्ञानस्यापि सहकारित्वात्। पाको प्यन्त्रेति निरूढं कांस्तु व्याख्यातः पच
तीत्यत्रैव पाकानुकूलयत्नबोधापत्तिकारणमाख्यातपदजन्यपाकानु
कूलयत्नविषयकज्ञानं बोधं प्रति निबंधि पदनिष्ठप्रकारिधावच्छेदावाहि
तोत्तरत्वरूपानुपूर्वीज्ञानस्य हेतुत्वकल्पनायां आवश्यकत्वात्। यत्राए
वेति। यत्नत्वं शक्यतावच्छेदकमित्यर्थः न च पाकगोचरनिवृत्तिकालेपि
पचतीति प्रयोगापत्तिरिति वाच्यम्। प्रवृत्त्यवच्छिन्नतिरिक्तनिवृत्यारंभप्रत्ये
मानाभावात्। विजातीयनिवृत्तिसंबंधेनाकूलतासंबंधेन वा पाक
स्याकूलायुक्तेनादोषात्। करोतीति। पूर्वोक्तरीत्या वाक्यस्योत्तरवाक्ये नार्थं
कथनं विवरणं। तथा च यत्नविशिष्टशाकृच्धातुना आख्यातस्य विवर
णां ह्याख्यातस्य यत्नवाचकत्वमिति भावः। कृतश्च यत्नाभिधायकत्वसिद्ध
मेव कान्वयात्तस्य व्यापारवाचकत्वे व्यापारजन्यत्वप्रतिसंधाना विशेषे
पि यत्नजन्यत्वप्रतिसंधायुक्तं सिद्धमेव। अनुपपत्तिसम्भवात् नाप्रतिसंधा
नान्यापत्तं करयोः कृताकृतत्वप्रयोगानुपपत्तेः तानेतप्रकेयनुकृतेन्नत्रा

सिद्धत्वाभ्युपबोधाच्च· तथा चाख्यातेतरस्य पचत्यावच्छिन्नशक्तिं पचत्यावच्छि
न्नशक्तं करोतीति धातुप्रतिपादितं यत्कर्तृत्वं तद्धर्मावच्छिन्नशक्तप्रतिपा
दितार्थकत्वं च वर्तते न तु तद्धर्मावच्छिन्नशक्तत्वं च वर्तते पाकत्वविशिष्टशक्तपाक
भावप्रतिपादितात्पर्यपकधातु वहिर्विनिसामान्यतोदृष्टानुमानेन विवर
णस्य शक्तिग्राहकत्वात्· ननु विवरणस्य शक्तिग्राहकत्वे किं मानमत आह
·व्यवहारवदिति· तथा सति तुल्ययुक्त्या व्यवहारस्यापि शक्तिग्राहकत्वानुप
पत्तेरिति भावः· तथा चोक्तं शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्य
वहारतश्च· वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धा इ
ति· न च विवरणस्य शक्तिग्राहकत्वे पचतीत्यत्र कर्तुरपि विविवरणात्त
त्रापि शक्तिः स्यादिति वाच्यम्॥ असति बाधके इत्यनेन विशेषणान्न् ध
र्मिणि अन्यवृत्त्यस्यैव बाधकत्वात्· एवमाख्यातस्य व्यापारवाच्यत्वे
किंकरोतीति प्रश्ने पचतीत्युत्तरत्वानुपपत्तिरपि· तथा हि य
द्धर्मविशिष्टे यद्धर्मावच्छिन्नस्य संबंधः प्रश्नवाक्यात् प्रतीयते तेन
धर्मेण तदुत्तरवाक्यात् द्धर्मविशिष्टे एव तद्धर्मव्याप्यधर्मावच्छिन्न

संबंधश्चेत्प्रतीतो भवति तदैव प्रश्नोत्तरभाव निर्वाहः यथा कस्मात्घ
ट इति प्रश्ने दण्डात् घट इत्युत्तरं न तु द्रव्यात् द्रव्यमिति एवं वक्तृयत्नाश्र
यत्वात् किं करोतीति यत्नत्वविशिष्टे प्रश्ने पचतीत्यनेन व्यापारत्वविशिष्टे
पाकसंबोधे जाते नोत्तरत्वनिर्वाहः स्यात् आख्यातस्यापि यत्नत्वविशिष्टपाक
कत्वमवश्यं वक्तव्यमिति निजवः तथा चेति· आख्यातस्य यत्नवाचकत्वे
न यः नमुत्थेति· नाख्यातस्य शक्त्या प्रयोगकत्वं यः॥ मुख्यायबाधये
वाह· रथो गच्छतीति· नायाति· लक्षणागमनानुकूलव्यापारं लक्षणा
अन्ययेति· विजक्षैकलक्षणांगीकारे इत्यर्थः॥ अन्यथेति· आमलकं ति
भारतस्य श्रवणमित्यादौ कर्तृकर्मयोगे षष्ठीत· कर्तृत्वकर्मत्वबोधो
नुपपत्तिः तथा कर्मणि द्वितीया कर्तृकरणे तृतीयेत्यनेन कर्मत्वकर्तृ
त्वायकत्वेन द्वितीयातृतीये विहिते तोभ्यो षष्ठी त्वनेन च संबंधसामान्येष
ष्ठी विहितेति षष्ठीत· कर्तृकर्मणोर्योगे कर्तृत्वकर्मत्वबोधः कृत्ययत·
कर्तृकर्मणिकृतीति अन्यथानुशासनम्· तेन षष्ठ्या अपि कर्मत्वाद्यव
गत्वमभिहितं परत्वविलक्षणालक्षणांगीकारएव न दातस्यत्वविनेवल

त. प्र.
१०५

लक्षणया कर्मत्वादिबोधस्योपपादयितुंशक्यतया तत्सूत्रानर्थक्यं स्यादित्यर्थः अ
नरति रथोगच्छतीत्यादौगमनानुकूलव्यापारबोधस्यशक्तिलक्षणाभ्यामुपपा
दयितुमशक्यत्वादित्यर्थः अप्रयेति कर्तृकर्मणोः कृतीति अन्यथानुशासन
बलादित्यर्थः विभक्त्यर्थयोस्त्विति· अनुशासितविभक्त्यर्थातिरिक्तयो
र्थयोः नलभ्यत्रापीति· अन्यत्रापि· अनुशासितविभक्त्यर्थातिरिक्ते विभक्त्य
र्थत्वेपि· ननु लक्षणा इति· नत्वित्यर्थः इहवेति· रथोगच्छतीत्यादौ आख्यात
लक्षणेचेत्यर्थः किंतु व्यापारे इति· व्यापारस्य न कस्यापि विभक्तेरर्थत्व
·तथाच विभक्तौ लक्षणास्त्विवच्यपानुशासितविभक्त्यर्थातिरिक्तोऽर्था
र्थः एवं च रथोगच्छतीत्यादौ आख्यातस्यानुकूलव्यापारे लक्षणया बोध
कत्वात्त्रहस्तंतरकल्पनेमिति भावः· अनुशासितविभक्त्यर्थातिरिक्त
विभक्त्यर्थेन लक्षणेत्यत्र अन्यस्मिन्नित्यस्य व्यावृत्तिं प्रदर्शयितुं अनुशा
सनिकलक्षणां लक्षणेर्दूषयति· इष्टतेचेति· कृयोगे· कृत्प्रत्यययोगे कर्म
णेलक्षणेति पूर्वान्वितिमिषष्ठा भारतस्य श्रवणं मा मस्य गतेत्यादौ भारत
कर्मकश्रवणपामकमक्रिगमनयोपः ननुशेषेषष्ठीत्यनेनैनसंबंधमा १०५

मात्रेषष्ठीविधानात्कर्मत्वमपिशक्त्यैवषष्ठ्याबोधतां किं तत्र लक्षणये
त्यशंकतेनचेति· सचःसंबंधस्य· शक्यएव· षष्ठ्याः शक्यएव· नतुलक्षण
·कर्मत्वेन लक्षणा· कर्मत्वात्विति· संबंधस्यैवषष्ठीशक्यतावच्छेदकतया
तत्· कर्मत्वप्रकारकबोधस्यविनालक्षणामुपपादनासंभवादित्यर्थः
तथा· लक्षणया· तत्प्रकारकेति· कर्मत्वप्रकारकेत्यर्थः· किंत्विति· स्वश
क्त्यैवेतिभावः· अनुशासनेति· कर्तृकर्मणोः कृतीत्यनुशासनेनेत्यर्थ
ः षष्ठीत· कर्मत्वबोधार्थं हितत् तच्छेषेषष्ठीत्यनेनैवसंबंधत्वेनकर्म
त्वबोधोपपत्तौ निरर्थकं स्यादितिभावः· शंकते· द्वितीयायाइति· र्द्वितीयाया
इत्यपि बोधः· असाधुत्वं व्याकरणानिष्पन्नत्वं तत्र अनुशासनं भारतस्य
श्रवणमित्यत्रकर्मणिद्वितीयेतिसूत्रेणभारतंश्रवणं इतिप्राप्तिरितितन्नि
षिध्यते कर्तृकर्मणोः कृतीत्यनेन कर्तृकर्मबोधार्थं षष्ठ्येव साधुः ननुद्वि
तीयान्ततायां चेति द्वितीयाया असाधुत्वप्रतिपादकतयैव तत्स्वार्थकत्व
ष्ठीतु शेषे षष्ठीत्यनेनैवेतिभावः· निष्ठासीति· कर्तृकर्मणोः कृतीत्यत्र
परिकर्तृकर्मत्वयोगेकर्मत्वबोधार्थं षष्ठी विहिता स्यात्तदा निष्ठादियो
गेविन स्याः प्रसक्तौ न लोकाव्ययनिष्ठाखलर्थतृनामित्यनेन निष्ठादियो

न·प्र· गे षष्ठ्या निषेधो युक्तः स्यात् तच्च न तत्र वक्ष्यते इति भावः एतत्सूत्रायो हि न
१०९ लोकेति· एतद्योगे षष्ठी न स्यात्· कर्तृकर्मणोः कृतीत्यनेन प्राप्ता षष्ठी
निषिध्यते· लादेशाः· यथा ओदनं पचन्· पचमान इति· उः कटं चिकीर्षुः क
न्यामलंकरिष्णुः उकः कारणं गामुकः· लक्ष्म्याः कामुक इति योगात् कर्मणि षष्ठ्या
वा पायमनिषेधः अव्ययम्· कटं कृत्वा· निष्ठाः क्तवतू निष्ठा· यथा ओदनं भुक्त
वान् देवदत्तेन कृतमिति· खलर्थः ईषत्पानः सुकरन्तितिक्षा हरः तेनतृ
नन् प्रभृतीनां ग्रहणं यथा सोमं पवमान इति· तन्नेति· निष्ठादियोगेऽ
न्यत्र साधुत्वमिति॥ कर्तृकर्मणोः कृतीति द्वितीया न साधुः किंतु षष्ठ्येवेति कर्तृ
कर्मणोः कृतीत्यनेन विहितं तत्र च निष्ठादियोगेपि द्वितीयाया असाधु
त्वप्राप्तौ ओदनं पक्वमित्यादौ अनावश्यकमित्यपि प्रसज्येत न लोकेत्या
दिना निष्ठादिवर्जनं तथा च निष्ठादियोगे द्वितीयैव साधुः· नतु षष्ठीति
न निष्ठादिवर्जनं वैकल्पिकत्वं यः कृद्योग इति· तृन् कृत्वा नाप्युक्त इति
कृत्प्रत्ययाः तद्योगे कर्तृकर्मणोः कृतीत्यनेन नित्यं षष्ठी प्राप्तौ कृत्यानां
कर्तरि वा षष्ठ्यामित्यनेन कर्तरि बाधेन तृतीयापाक्षे भवति षष्ठी वा भव
ति षष्ठी विकल्प्यते· यथा देवदत्तेन कर्तव्यः कटः· देवदत्तस्य कर्तव्यः कटः १०५

इति· इदं तु नद्याः संगच्छते· पदिकर्तृकर्मणोः कृतीति सूत्रं षष्ठीविधायकं
तदा विशेषविधिनिषेधाभ्यनुज्ञाफलकत्वमिति न्यायेन द्वितीयाचेती
पयो निषेधे धर्मुखेनैव नित्यं षष्ठीप्राप्तौ कृत्यानां कर्तरि वेत्यनेन तृती
यापाक्षे भवति षष्ठीवाक्षे भवति षष्ठी निषेधमुखेनैव तृतीयायां विहितायां
षष्ठीप्राप्त्यर्थं विकल्पेन षष्ठीविधानमिति· अत एव कर्तृकर्मणोः कृ
तीति सूत्रं द्वितीयातृतीययोरसाधुत्वतापकं· न लोकाव्ययनिष्ठाखल
र्थतृनामिति तयोः साधुत्वतापकं न हि कृद्योगे तृतीयोपपत्ताद्यं कृत्या
नां कर्तरि वेति सूत्रप्रणयनं स्यात् तेनास्य वानुवृत्तिः· तथा च कृतानां यो
गे षष्ठीनेतरस्य तृतीयासाधुत्वमिति पर्यवसितं तत्र कृत्यानां कर्तरि
ति सूत्रस्य विधायकत्वं नावात् षष्ठ्याः प्रतिषेधमुखेनैव तृतीयोपप
त्या विकल्पेन षष्ठीविधानमनर्थकमापद्येत स्यात् खण्डनार्थः॥ ननु कर्तृ
कर्मणोः कृतीत्यनेन तृतीयाया असाधुत्वबोधनात् पञ्चतीयास्माद् न
तृतीयाविधानयावद्रूपकं तृतीयाविधानेन विशेषविधिनिषेधयोः शेष
निषेधयोः शेषनिषेधाभ्यनुज्ञाफलकत्वमिति न्यायेन षष्ठी निषेधमुखे
नैव तृतीयायाः प्राप्तत्वात् षष्ठीप्राप्त्यर्थं विकल्पेन षष्ठीविधानमावश्यक

पत्तेराह अनिषेधेनैवेति॥ षष्ठ्या अनिषेधे तु द्वितीयैवेत्यर्थः॥ नन्वेवोपपत्ते
:कर्तृकरणयोस्तृतीयेत्यनेनैव तृतीयोपपत्तेः कृत्यानां कर्तरि सूत्रस्य नैस
स्यान्नु हत्यानजो कृत्यादिवत्तृतीयापाः साधुत्वापकृन्तु तृतीयाविधा
पकत्वेन षष्ठीनिषेधकत्वमिति षष्ठ्या अनिषेधपक्षे तु तृतीयापायानु
पपत्तौ वृत्तौ विधानमफलमिति भावः षष्ठ्यामास्यमेव विकल्पविधा
नमित्याशङ्कते॥ पादिकेति॥ कृद्योगे षष्ठ्या अनिषेधपक्षे तु तृती
यो तृपत्ता व भिक्तलयोगे पक्षे षष्ठ्यपि साधुरिति बोधनाय विकल्पवि
धानमित्यर्थः संबंधत्वेति॥ कर्तृत्वबोधार्थं हि तृतीया षष्ठी वा कृद्यो
गे विधीयते तत्र शेषे षष्ठीत्यनेन संबंधत्वेन कर्तृत्वबोधोऽत्र विषयते
नेति विकल्पविधानं वृथा स्यादिति॥ मन्मनेतु कर्तृत्वत्वप्रकारकबोधस्य
शेषषष्ठ्या अनिर्वाहाद्विकल्पविधानसार्थक्यमिति भावः शेषषष्ठ्यपादि
ति॥ ननु शेषषष्ठीत्यत्र उक्तादन्यः शेषः उक्तात् कर्तृकर्मत्वादन्यः शेषस
त्यर्थः तथा च कर्तृत्वादिबोधे षष्ठ्यतिप्रसङ्गः कर्तृत्वकर्मत्वत्वव्यति
रिक्तरूपेण संबंधे षष्ठीत्यस्य तदर्थत्वात् शंकते निष्ठादीति॥ केनचिदिति
॥ विकल्पविधायकानुशासनमित्यर्थः कृत्यानां कर्तरीति सूत्रस्यनेत्यत्र

तृत्यान्तृतीयापाः साधुत्वतापकत्वे॥ षष्ठी तु शेषषष्ठीत्यनेनेति पाक्षिकषष्ठी
उपपत्तेति विकल्पविधानं वृथेत्युक्तमनेनैव तदा न नोकेत्यस्यापि साधुत्वता
पकताकृद्योगे इव निष्ठादियोगेऽपि शेषषष्ठ्या आपत्तिरिति विकल्पविधा
नं तेन शेषषष्ठ्यापत्तिस्तयोगे साधुत्वता॥ ननु निष्ठादिसंयोगेऽपि साधुत्वता
पकत्वयाः विकल्पविधानं सार्थकमिति भावः तयोगेपि॥ निष्ठादियोगेपि॥ ना
दृश्याः संबंधत्वप्रकारकबोधजनिकायाः शेषषष्ठ्याः॥ वकुं इति॥ देवद
त्तस्य कृतमित्यादावित्यर्थः न उक्तेत्यनेन जोकेतिकारकषष्ठ्याः प्रस॥ तिशेषः शेषे
षष्ठी तु स्यादेव ब्राह्मणस्य कुर्वन् समानुरक्तानरकस्य जिष्णवः छात्रस्य
हसितं कृतमित्यादि॥ रक्षाकणाद्दरापेर्षेत्वरदधीहि सिद्धयः॥ अपि वागाधिप
त्ये तु वर्धं वचनं तद्दिरधीत विस्मयमित्यादिः केचित्तु इत्याकूणां लिङ्
घटस्य नव्यः ननु दत्त्वा कृणांडरापेरसमनेनान्वयः एवं वागद्वेपसविस्म
यमित्यन्वये ननु वागधीयेसङुर्वतिमनेनान्वयोति समादधुः तस्मात्
कर्तृकर्मकृयोगे षष्ठीत्व॥ कर्तृत्वत्वकर्मत्वत्वप्रकारकबोधावोपयः एवं च
कर्तृकर्मणोः कृतीत्यनेन कर्मत्वत्वप्रकारकबोधजनिकायाः षष्ठ्याः निष्ठा
दियोगेपि प्रसक्तौ न निष्ठादिविष्मनेन षष्ठीनिषेधः कृत्यानां कर्तरीति

त.प्र. तिन्त्र षष्ठ्या विधानां साधकमिति तत्र त्री षष्ठ्या तु प्रसक्तिरेव न तस्याः कर्मत्व
१०८ त्वादिप्रकारकबोधजनने सामर्थ्यादिति षष्ठ्याः कर्मत्वादिप्रकारकबोधजनक
त्वं कर्त्तृकर्मणोरिति अव्ययकं तद्धनव्युत्पत्ताः अनन्यलभ्यस्येव शक्यत्वादिति क
र्मत्वप्रकारकबोधो लक्षणयैवेति विज्ञकाबालुशासनिकीलक्षणेति बोध्यं
ः कर्मकृद्योगे षष्ठीनः कर्मत्वप्रकारकबोधस्य विवादेपि विज्ञकौ लक्षणाद्र
जां तरमाह किं वेति क्रियाजन्यफलशालित्वरूपे कर्मत्वे शक्तिर्द्वितीयाकर्थं वि
षयतायामित्यन्वयः विषयतायामिति विषयसप्तमी विषयताव्यापारान्
कनीतपान्न विषयता बोधकाकर्षमित्यर्थः तथा च व्युत्पत्त्या विषयतायाः बोधासं
भवात् तत्र द्वितीयायालक्षणा वक्तव्या इति विज्ञकानपि लक्षणस्वीकृत इति भाव
ः विद्यमानघटस्तु ज्ञानेन तान्नीत्यादिन मंगीकृत्य क्रियाजन्यफलशालि
त्वरूपकर्मत्वमपि कदाचित् संभवतीति ज्ञाविनमि तुष्टं तत्र घटस्याप्राप्य
नज्ञानताया जननासंभवात् इति भावः ॥ शक्तेः विषयते वेति द्वितीयार्थ
द्वितीयायाः शक्यार्थः ॥ तथा च व्युत्पत्त्यैव न बोधसंभवात् न लक्षणेति भा
वः अत्र विनिगमकमाह ॥ क्रियेति याम ति ति याम विषयक त्वस्यागमनेउ
भावेन क्रियाजन्यफलशालित्वरूपं कर्मत्वं लक्षणयैव लभ्यते बोधनाय १०८

मिति भावः आप्नुयानेति तथा च विज्ञकौ लक्षणा वक्तव्येति भावः क्रियाजन्यफ
लशालित्वस्य विषयताप्रयोगुरुत्वमिति तत्र दूरितप्रयोगात्तत्रैव शक्तिरवि
मेत्यतउक्तं विभावनीयमिति ननु द्वितीयायाः क्रियाजन्यफलशालित्वरू
पकर्मत्व एव शक्तिः भाविनं घटं जानातीत्यादौ विषयत्वरूपकर्मत्वबोध
स्तु विज्ञकौ लक्षणयोक्त्या शाब्दस्तु तरणैव च विषयतीत्यशुकतेः आस्त्यनन्त्रा
पीति नाविनं घटं जानातीत्यत्रापीत्यर्थः लक्षणयैवेत्यर्थः विज्ञकौ
न लक्षणेति प्रवाहस्तन आह द्वितीयेति भावः वस्तुतस्तु विज्ञकौ लक्षणानास्ती
त्यस्तु द्वि विज्ञकौ लक्षणा नास्तीत्यपार्थितेः विज्ञकौ लक्षणास्वीकारे
वः विघतेयोम विघटनेषदः सन्नातिष्ठनीतिप्रयोगा इति हृदयम् रघो
गच्छतीत्यनुरोधादाख्यातस्य व्यापारमात्रमर्थ इति विज्ञकौ लक्षणानंगी
कारेपि न क्षतिरिति मीमांसकमतमाह मीमांसकास्त्विति व्यापारमात्रं न
तु प्रयत्न एवेति भावः मुख्य इति शक्यार्थप्रयोग इत्यर्थः व्यापारत्वस्यैवाख्यात
शक्यतावच्छेदकत्वेन प्रयत्नत्वाद्येपि व्यापारबोधेनाधकाभावादिति भावः ॥
तस्यैव प्रयत्नत्वस्यैवः नतिति ननु आनुकूल्यव्यापारत्वस्य शक्यतावच्छेदकत्व
मिति विभक्तिविपरिणतेनान्वयः अनुकूलत्वं जनकत्वं तदुक्तौ जनकत्वप्रका

न.प्र.
१०६

रनपायानमपेक्षः श्रुतत्वात् पदत्वापेक्षया गुरुत्वात्· व्यापारत्वस्य निपातोत्तर
वर्त्तित्वे रूपजन्यत्वरूपत्वादित्यर्थः॥ ननु तदनुकूलयत्नत्वस्याख्यातशक्यता
वच्छेदकत्वे नूकूलत्वांशो शक्तेरावश्यकत्वपालत्वांशे विहायानुकूलमात्र
एव शक्तिरस्तु एवं च रथो गच्छतीत्यत्र मुख्यः प्रयोग इत्यत आह अनुकूलतां
शं विहाय लाघवाद्यत्नत्वमेव शक्यतावच्छेदकमित्येवोपपत्तेः तथा च
रूपमनुकूलत्वं प्रतीयते तल्लिङ्गाधेयत्वांशं करते· कथं तर्हीति· यत्नत्वस्ये
वाख्यातशक्यतावच्छेदकत्वे हारस्यर्थः पचतीत्यत्र पाकानुकूलयत्नो भास
ते तत्रानुकूलताबोधः कथं आख्यातशक्यत्वादित्यर्थः॥ संसर्गेति· या
रूपयत्नयोः संसर्गविधयेत्यर्थः॥ अशक्यस्यापि संसर्गस्य ज्ञानोपगमात्
तत्प्रकारकबोधस्तु नानुपपन्न इति भावः कथं तर्हीति· व्यापारमात्रस्या
ख्यातवाच्यत्वे हारस्यार्थः पततेकरोतीति· यत्नोपपत्तेः करणेति धा
तुरेदेन प्रयोगभेदः ननु जानातीत्यादौ ज्ञानानुकूलयत्नवानिति बोधे ना
धकाभावाद्बोधप्रयोजनत्वमात्र आह नहीति· तत्र नाहीति· आदिना इच्छादिपरिग्रहः अन
नुत्पाद्यानुकूलो यत्नोऽस्ति वमनः संयोगस्य ज्ञानासमवायिकारणत्वात्त
स्य मनः क्रियाजन्यत्वात्तस्याश्च प्रयत्नवदात्मसंयोगजन्यत्वात् तत्रा १०६

प्रतीयत इति॥ ज्ञानातीत्यादौ तत्राश्रयत्वमात्रं तावता नतु ज्ञानानुकूल
यत्नवानिति मिन्नार्थः आश्रय इति आ ज्ञानानीत्यत्राख्यातस्याश्रयत्वे ला
क्षणिकत्वादित्यर्थः घटो नश्यतीत्यत्र तु नष्टस्यापि प्रतियोगिता संबंधे
न नाशाश्रयत्वं संभवेपि प्रतियोगिता संबंधावच्छिन्नाश्रयतायां लक्षणा
यां गौरवात् प्रतियोगित्वमेव तत्राख्यातार्थो वसेयः॥ धात्वर्थ एव ज्ञानरूपो
धात्वर्थ एवः साक्षात् विलक्षणर्थमहारीरुतः तथा चाश्रयता संबंधेन ज्ञानं
चैत्रेनेत्याख्यातत्वेनार्थ्या नस्य कोप्यर्थ इति भावः नन्वाख्यातं निरर्थकं
मत आह आख्यातेति· प्रतिपाद्यः लट्त्वेत एकवचनत्वादिनाच प्रतिपाद्यः
कालः वर्तमानत्वादिः संख्याः एकत्वादिरूपा· नन्वेवमप्याख्यातत्वेना
ख्यातमप्रतिपाद्यः अयोग्यत्वादिति· तथा च ज्ञानातीत्यादौ नाश्रयत्व लक्षण
ति भावः नानार्थेति· साक्षात् विलक्षणर्थप्रकारीकृत्य ज्ञेदेति· अभेदान्तरि
संबंधेनान्वयबोधस्यापुनरुक्तत्वादित्यर्थः लोकं पचतीत्यादि क्रियाविशे
षणत्वे तु लोकस्य पाकेऽभेदान्वयात् भेदेति· न च तत्र विशेषणविलक्षणत्वं
होर्थ इति वाच्यम्· विशेषणविलक्षणैः साधुत्वार्थकत्वात्· लोकः पाक इत्या
दावगतेश्च· विलक्षणर्थस्य प्रकारतया संसर्गतया च भानमिति मते घटमानये

न. प्र. त्वत्र घटस्य कर्मतासंबंधेनानयनेऽन्वयापत्तादिति । न च फलं तं जस्य पोरिस

११० त्मकत्वं ज्ञत्वस्य गं वजनदनिष्टाननुबंधीष्टसाधनत्वाभाववदिति बोधात् । न

त्रणि धात्वर्थेन नञर्थस्यान्वयाव्युत्पत्तेरिति वाच्यम् । निपातातिरिक्त

नामार्थधात्वर्थयोरन्वयस्याव्युत्पन्नत्वादित्यर्थात् । नञो भाववति लाक्षणिकत्वा

द्या । अन्यथेति । नामार्थधात्वर्थयोः विभक्त्यर्थमद्वारीकृत्यापि भेदेनातिरिक्तसं

बंधेनान्वयस्वीकारे इत्यर्थः । ओदन इति । ओदनं पचतीत्यत्र विभक्त्यर्थकर्मता

दि । प्रकारतया संसर्गतया वज्ञानोपायाभावात् यथा ओदनपाकयोः कर्मतासंसर्गे

णान्वयः तथा ओदनः पचतीत्यत्रापि कर्मतासंसर्गेणौदनस्य पाकेऽन्वयबोधाप

त्तेरित्यर्थः । ननु निपातातिरिक्तत्वमिव सविषयकवाचकधात्वतिरिक्तत्वमपि दे

यमतआह बहुकृतइति कश्चित् । तन्न । नञ्पदतीत्यादावगतेः आस्तां तत्र प्रतियो

गित्वेन लक्षणेति चेत् किमपराद्धं तर्हि जानातीत्यत्राश्रयत्वे लक्षणया व्युत्पत्तिसंको

चेनापतिविरहितरसंकोचस्यैवन्याय्यत्वात् । वस्तुतस्तु । ननु नामार्थधात्वर्थयोः ।

सत्ताद्वेदेनान्वयबोधो न स्वीक्रियते इति नियमवत् नामार्थनिष्ठाभेदाति

रिक्तसंबंधावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन शाब्दबु

द्धित्वावच्छिन्नं प्रति विभक्तिपदनिरूपितवृत्तिज्ञानजन्योपस्थितिर्हेतुत्वम्

एवं धात्वर्थनिष्ठप्रकारतानिरूपिता विशेष्यतावच्छेदकतासंबंधेन शाब्दबु

द्धित्वमपि नव्यम् । तत्र च चैत्रस्तंडुलं पचति मैत्रेण पच्यते तंडुलः इत्यत्रैव

चैत्रः पचति सैतंडुलः मैत्रः पच्यते तंडुलः इत्यत्रापि तंडुलस्य कर्मतासंबंधे

न पाकेऽन्वयवारणाय नामार्थप्रकारकधात्वर्थविशेष्यकान्वयबोधानुप

क गोपि धात्वर्थप्रकारकनामार्थविशेष्यकान्वयबोधोपगमेक्षतिविरहात् । इति

पक्षायकारणावेमानाभावात् । चैत्रो जानातीत्यादौ आश्रयतासंबंधेन

ज्ञानरूपधात्वर्थस्य चैत्रेऽन्वयेपि बाधकाभावः नव्वन्तथा सति ज्ञानं चैत्रस्त

त्रापि ज्ञानस्याश्रयतासंबंधेनान्वयापत्तिरिति वाच्यं नामार्थयोरभेदा

तिरिक्तसंबंधेनान्वयाभावादिति व्युत्पत्त्यन्तरेणैव तदापादनासंभवा

त् । किंचानुपूर्वी तानस्य शाब्दबोधे हेतुतया ज्ञानप्रकारताश्रयतासंस

र्गकचैत्रविशेष्यकशाब्दबोधं प्रति ज्ञाधातुसमभिव्याहृतआख्यातसमभि

व्याहृतचैत्रपदज्ञानत्वेन हेतुतायां वक्तव्यतद्वारणसंभवात् । नव्यमतेपि आ

श्रयत्वं धत्वेनोपस्थितौ व्युत्पत्तेः प्रकारकशाब्दबोधे नात्र समभिव्याहार

ज्ञानहेतुताया आवश्यकत्वात् अन्यथा ज्ञानं आश्रयत्वं चेत्यत्रोपि त

दापत्तेः । अथैवं पचतीत्यत्रापि स्वानुकूलकृतिमत्त्वसंबंधेन पाकस्यैवै

त्रेन्वयोपपत्तेः कृते रथात्खातादौ च विलोपप्रसंगादिति चेन्न न पचति चैत्र इ
त्यत्र वृत्तिनियामकसंबंधस्याभावप्रतियोगितानवच्छेदकतया अनुकू
लकृतित्वसंबंधावच्छिन्नप्रतियोगिताकपाकाभावस्य बोधासंभवात्
आश्रयतासंबंधावच्छिन्नप्रतियोगिताकपाकाभावबोधोपगमे च पचत्य
पि न पचतीति प्रसंगात् न च पचतीत्यत्र पाककृतिमान्न चैत्र इत्याख्याता
र्थप्रकारकशाब्दबोधे रूपेणाख्यातजन्यकृत्युपस्थितेः कारणत्वकल्पने तत्तद
र्थनिवेश आत्मनिष्ठप्रत्यासत्त्या आख्यातजन्योपस्थितेर्हेतुत्वकल्पने गौ
रवेणालाघवात् धात्वर्थप्रकारकशाब्दबोधे प्रति प्रत्ययजन्योपस्थितेः स
मानविशेष्यकताप्रत्यासत्त्या हेतुत्वकल्पनाद् आख्यातस्य नानातीत्यादावा
प्त्वार्थकृत्यभावरूपमिति वाच्यं सामान्यतः धातुत्वस्य प्रत्ययत्वस्यैकस्या
भावेन सामान्यतस्तथा हेतुत्वासंभवात् विशिष्य हेतुत्वे च नानातीत्यादौ त
त्कल्पनात् परंतु नानातीत्यत्र घटादौ स्वारसिकलक्षणाग्रहकाले तानी
यो घट इति शाब्दे योग्यतातानप्रकारकघटादिविशेष्यकशाब्दबुद्धित्वाव
च्छिन्नं प्रति तत्तद्धातुसमभिव्याहृताख्यातजन्यघटोपस्थितित्वादिना हेतुत्व
कल्पने घटत्वघटत्वादिनिवेशे गौरवात् तानत्वनिष्ठप्रकारतानिरूपितवि

शेष्यतावच्छेदकतासंबंधेन शाब्दबुद्धित्वावच्छिन्नं प्रति आख्यातपरत्वनिरू
पितवृत्तितानजन्योपस्थितेः प्रकारतासंबंधेन हेतुत्वकल्पनाया आवश्यकत्वेन
त्तेन आवश्यकत्वात् अथ आख्यातपरतन्त्रपरायुपस्थितिकाले यितानी
यो घट इति शाब्दबोधस्यात्मनि समवायेनापत्तिः समवायेन तादृशशाब्द
बोधहेतौ तानीयो घट इति योग्यतातानस्य समवायेन सत्त्वादिति वि
षयं निवेश्य परतन्त्रपरायोपस्थितेर्हेतुत्वमावश्यकं न च योग्यताता
नस्यापि विशेष्यतावच्छेदकताप्रत्यासत्त्यैव हेतुत्वमिति वाच्यम् तथा
पि भिन्नविषयकानुमितिसामग्र्यभावरूपकारणवत्तादशायां तथा
विधशाब्दबोधापत्तेर्दुर्वारत्वादिति चेन्न परतन्त्रपरायोपस्थितेः तत्त
द्विषयं निवेश्यात्मनिष्ठप्रत्यासत्त्या हेतुत्वे तत्तद्विषयकत्वैः सह विनिगम
नाविरहेण गौरवात् विशेष्यतावच्छेदकताप्रत्यासत्त्यैव हेतुत्वं घटत्वादि
वृत्तिविषयतासंबंधेन तानत्वावच्छिन्नं प्रति घटत्वादिवृत्तिविषयतासं
बंधेन तानत्वेन हेतुतान्तरकल्पने न च दर्शितापत्तिः कारणसंभवात् ता
धातुसमभिव्याहृताख्यातपदजन्योपस्थितिविशिष्टघटत्वतानस्य वि
रोधिसामग्र्यभावेन तानीयो घट इति शाब्दबोधेजननीयसहकारित्वात्

प्रकारतासंबंधेनसाधिकरणे विषयतासंबंधेन वृत्तिस्वरूपसामानाधि
करणकसंबंधेनचतथोपस्थितिवैशिष्ट्यंवघटत्वतानेवसेयम्॥ इत्थंता
दृशानपरंजन्यपदोपस्थितिकालेभिन्नविषयकानुमितिसामग्र्यभाववरूप
कारणकलात्मनियोघटरतिज्ञाप्रबोधोपपत्तिः आख्यातापदस्हकारि
त्वादापत्तिरितिवाच्यम्॥ एकात्वसमयेतस्यान्यापत्तिकारणायत्तदुदात्मस
मवेतत्वावच्छिन्नप्रतिपाद्यत्वमन्यासत्वात्तदात्मत्वेनापिहेतुत्वप्यानसुह
चीयाख्यातपदजन्योपस्थितिविशिष्टत्वस्तुरूपायघटत्वताना विशिष्ट
ततदात्मविशिष्टविरोधितान्यानमजायस्तत्तदात्मनितान्नीयोप
स्थितिशाब्दबोधतामात्॥ सत्वात् तत्तदात्मनिपरत्वतानवैशिष्ट्यैककाली
नत्वसंबंधेननिरोधीत्तायत्वमावेतत्तदात्मवैशिष्ट्यंचतदात्मविशेषणतोज
घटितत्तामानाधिकरणसंबंधेनिति॥ इत्थंवत्तानतिष्टप्रकारितानिरूपि
तविशेष्यतावच्छेदकतासंबंधेनशाब्दबुद्धिप्रतिताधातुसमभिव्याहृतात्मा
जन्योपस्थितेः प्रकारतासंबंधेनहेतुत्वाच्चैत्रोजानातीत्यादावाख्यातेनवृण
वत्त्वपकृतिः तद्रसत्॥ तदादिपदेनापिजानातीत्यादौ शाब्दबोधमनात्॥ ११२
तत्रतथाविधाख्यातपदजन्योपस्थितेरभावेनव्यभिचाराभावात् तैरेतथोप

स्थितिविशिष्टशाब्दत्वमिवतथोपस्थितेः कार्यतावच्छेदकमुपेयं॥ एवंच
तथोपस्थितिविरहेतथोपस्थितिविशिष्टशाब्दबोधानुपपत्त्यावपि तद
नुत्तरणशाब्दबोधस्यजानातीत्यादावुत्पत्तौ बाधकाभावात्ताधातुसम
भिव्याहृताख्यातसमभिव्याहृतत्वतानरूपकारणवतादाश्रयतासंसर्ग
करोधोपगमात्॥ नचाश्रयतासंबंधेनतत्तानप्रकारकशाब्दबोधेतान
प्रकारकयोग्यतातानस्यकारणत्वकल्पनेनैतन्मतेगौरवमितिवाच्य
म्॥ नवचमतेपितानाश्रयत्वप्रकारकशाब्दबोधेतथाविधयोग्यताज्ञान
हेतुतायाआवश्यकत्वात्॥ आश्रयत्वस्यापिसंबंधनिवेशयोग्यताज्ञा
नहेतुत्वस्यकल्पनेनवचमतेएवगौरवात्॥ मन्मतेचाश्रयत्वस्यैकसंस
र्गत्वात् नतस्यापिसंबंधनिवेशः॥ नचतथाधातुसमभिव्याहृताख्यातस्य
पत्रतानाश्रयत्वेनरूपणतत्रभवतापितानाश्रयत्वप्रकारकयोग्यता
तानस्यहेतुत्वंकल्पनीयमितिवाच्यम् आश्रयतायाः संसर्गत्वादितातत्ता
श्रयत्वप्रकारकबोधस्यानुपगमात्॥ एतेनयत्रताधातुसमभिव्याहृता
ख्यातैस्यतानाश्रयत्वेनरूपणतत्रतानाश्रयत्वप्रकारकशाब्दबो
धेताधातुसमभिव्याहृताख्यातपदनिरूपितवृत्तिताननाश्रयतो

पस्थितिहेतुत्वस्य क्लृप्तत्वात्क्लृप्तेनैवेतीयर्थाहाराश्रयत्वेन लक्षणया चन्नयकीति
परास्तम्. तथासति पचनेचैत्रपदे एवाश्रयतासंबंधेन तानाविशिष्टचै
वे लक्षणात त्रचैत्रपदजन्यतानविशिष्टचैत्रोपस्थितिः क्लृप्तत्वाच्चैत्रोजा
नातीत्यत्र चैत्रपदादेवाश्रयतासंबंधेन तानवांश्चैत्र इति बोधस्याक्लृ
प्तेनैवोपपादयितुमशक्यत्वात्. नचैवं ज्ञानातीत्यस्य वैयर्थ्यमितिवा
च्यम्. आख्यातचैत्रस्यातस्य च तानातीत्यस्य च यस्यैव तात्पर्यग्राहकत
योपगमस्य सुवचत्वात् किंच ज्ञानातीत्यत्र तानाश्रयत्वप्रकारकबोधस्यैवा
नुपगमेन क्लृप्तेनैवोपपत्त्यभावात्. तस्मादाश्रयतासंबंधेन तानस्यचै
त्रेन्वयेबाधकाभावेनाश्रयत्वलक्षणावैयर्थ्यमन्यत्राहुः वस्तुतस्तु न इति. कि
त्वितु. पचतातोतनाश्रयत्वलक्षणतत्रतानस्य धात्वर्थैकदेशतयाचै
त्रेन्वयासंभवेन तानाश्रयत्वप्रकारकएवशाब्दबोधात्पगंतव्यइ
तितत्रतानाश्रयत्वप्रकारकशाब्दबोधेत्वकारकपोपस्थितानहेतु
त्वमुपपत्तिध्नम्. आश्रयतासंसर्गकशाब्दबोधातीकत्वमतेतु आ
श्रयतासंसर्गकपोपस्थितानकारणत्वकल्पनमधिकं. नच तत्छेन
यत्राश्रयतासंबंधेनतानाविशिष्टचैत्रशाब्दबोधस्तत्राश्रयतासंस

र्गकपोपस्थितानहेतुत्वमप्युपपत्तिमितिवाच्यं तत्रशाब्दबोधेपदार्थां
तरभान नियमेनतान विशिष्टचैत्रपात्राविशेष्यकपोपस्थितानस्यतान
विशिष्टचैत्रादिपात्रविशेष्यकशाब्दबोधहेतुतायाः कृप्तक्लृप्तत्वात्
. नचतथापिनिवविषयकप्रत्यक्षादिकं प्रतितानातीत्यानुपूर्वितानप
हितताधानुजन्यतानोपस्थितिप्रतिशाब्दसामग्न्याःप्रतिबंधकतायांआ
ख्यातजन्याश्रयत्वोपस्थितिनिवेशेनगौरवमितितानाश्रयत्वानाववांश्चै
त्र.सुंदरइतिविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षेज्ञानातिचैत्रइत्यानुपूर्वीतानत
धातुजन्योपस्थितिघटितशाब्दसामग्न्याःप्रतिबंधकत्वाधिक्यात्. मन्मतेआ
श्रयत्वप्रकारकोपस्थितिकालेबाधबुद्धिसंभवेनतादृशसामग्न्याः प्रतिपद
संभवेन क्लृप्तेनैवोपपत्तेरित्याहुः तच्चिंत्यम्. एवं सति विशेषणविभक्तेर
पत्रेदोषकत्वापत्तेः. तत्रापिनीलात्वेदाभाववान् घट इति प्रत्यक्षादौ नीलोघ
ट इति शाब्दसामग्न्याः बाधमुद्रयैव प्रतिबंधकतयैवोपपत्तेरितिदिक्
प्रतिबंधकत्वाकल्पनेनलाघवसंभवात् इष्टापत्तौच विशेषणविभक्ते
साधुत्वमितिसिद्धांतव्याकोपस्यस्याविस्तरः. आख्यातार्थेति. आख्याता
र्थत्वेनाख्यातार्थबोधेहृत्पदैः तस्याआख्यातार्थसंख्यायाः आख्यातार्थ

विशेष्य॰ संख्याकालातिरिक्ताख्यातार्थः भावनामात्रविशेष्यं तत्रापि तन्निय
मादित्यर्थः नचाख्यातविशेष्यकर्तृत्वाकांक्षायामाह विभक्त्यर्थविशेषणी
भूत इति नामार्थपदेन विभक्त्यर्थनिरासः नच पचतीत्यत्र कर्तृमानत्व
रूपाख्यातार्थविशेष्यस्यान्नाभिधानादिति वाच्यं उपपादनपुरःसरं विभ
क्त्यर्थाविशेषणीभूत इत्यस्य व्यावृत्तिमाह तेनेति॰ विभक्त्यर्थाविशेषणी
भूतस्यैव नामार्थविशेष्यत्वादेपेत्यर्थः तथाविध॰ विभक्त्यर्थाविशे
षणीभूत॰ प्रथमापा॰ साधुत्वादिति भावः द्वितीयार्थेति॰ द्वितीयार्थकर्मत्व
विशेषणत्वादित्यर्थः कर्माख्यातस्थले त्वाह॰ पच्यते इत्यत्रेति॰ चैत्रेण पच्यते
तंडुल इत्यत्र कर्म॰ तंडुल॰ आख्यातार्थविशेष्य॰ नकर्ता॰ नचैत्र॰ तृतीयार्थेति
तृतीयार्थे कृतिनावरुद्धत्वात्॰ कर्तृत्वे विशेषणत्वादित्यर्थः ननु चंद्र इव
मुखमस्तीत्यादौ चंद्रपदार्थ इवार्थे वा भावनान्वयापत्तिः तस्य विभक्त्यर्था
विशेषणीभूतनामार्थत्वात्॰ नच विभक्त्यर्थाविशेषणीभूत इत्यस्येतरा
विशेषणत्वमर्थ इति वाच्यम्॰ चंद्र इव मुखं चंद्रो राजते इत्यत्र चंद्रे तदा
न्वयानुपपत्तेरिति चेन्न॰ प्रकृतपरतन्त्रशाब्दबोधे विशेष्यत्वाभावव ११४
त्वे सति पदेतरविशेषणत्वं तदभाववत्त्वे सतीत्यस्य तदर्थत्वात्॰ यत्तु

तत्र॰ चंद्र इव मुखमस्तीत्यत्र पौनामार्थधीरिति तु मतेनोक्तव्ययनिपातात्य
तिरिक्तविशेषणाभावात् चंद्रपदं चंद्रसदृशलक्षकं इवपदं च तात्पर्यग्रा
हकमिति पक्षे चंद्र॰ सादृश्यविशिष्टे मुख्यपित्राभावनान्वये विशेषणं नोपस्थि
तदन्वयेन चंद्रपदार्थे तदन्वये इष्टापत्तिः इवपदस्य निरर्थकतया त
दर्थाभावादेवानतिप्रसंगः इवपदस्य सादृश्यार्थकत्वे पि चंद्रपदार्थस्य प्रथमापा
ः प्रतियोगित्वार्थकतया इवपदस्य च सादृश्यार्थकतया चंद्रस्य विभ
क्त्यर्थाविशेषणीभूतत्वात् इवपदार्थसदृशेव विशिष्टे तदन्वये विशेष
णं प्रीत तदन्वये इष्टापादनमपि इति प्रतिभाति॰ ननु चैत्रेण स्थीयते इत्य
त्र संख्यानन्वयापत्तिः तत्र विभक्त्यर्थविशेषणीभूतनामार्थाभावेन
भावनाविशेष्याभावादन्न इष्टापत्त्या परिहरति॰ स्थीयत इत्यत्रेति॰ संख्ये
ति॰ भावनान्वयित्वे वसंख्यान्वयपरिपयान् अत्र भावनायाअनन्वयेन सं
ख्यायाअप्यनन्वय इत्यर्थः एतएव॰ भावाख्यातस्थले संख्यायाअनन्व
यादेव औत्सर्गिकमिति॰ स्वाश्रय स्पर्द्धि बहुत्वे पि संख्याया अनन्वया
त् प्रथमैव पुरि तत्त्वा साधुत्वार्थ एकमेकवचनमेवेत्यर्थः भावाख्या
तस्थले प्रकारांतरेण बोधकस्य विभक्त्यर्थमाह॰ धात्वर्थेति॰ चैत्रेण स्थी

पचत इत्यत्र चैत्रकर्तृका वर्त्तमाना स्थितिरित्यर्थः नन्वेभावना विशेष्यत्वेन सं-
ख्यान्वयात् धात्वर्थस्य च भावना विशेष्यत्वाद्विवचनापत्तिरित्याशंकते न चैवमि-
ति· एवं धात्वर्थविशेष्यकान्वयस्वीकारे· धात्वर्थस्य स्थित्यादेः द्विवचनापत्तिः द्वि-
त्वस्य तत्राबाधादिति भावः· चैत्रः पचतीत्यादौ प्रथमांतार्थ एव भावनाया
अन्वयात्· भावनायां धात्वर्थस्य विशेषणत्वेनैवान्वयस्य क्लृप्तत्वात्· भावना
विशेषणधात्वर्थविशेष्यकान्वयस्वीकरणमेवास्वरसः कश्चिदित्यनेन सू-
चितः· आख्यातार्थकालः वर्त्तमानत्वादि· एकपदेति एकेन पदेनाख्यातेनो-
पात्तत्वात्· भावनायां वर्त्तमानत्वान्वय इत्यर्थः नन्वसंख्यायामिव कुतो न
कालान्वयः समानपदोपात्तत्वाविशेषादिति वाच्यं तर्हि पक्षेपि पचतीत्या-
न संख्यायां वर्त्तमानत्वस्य सत्त्वादिति भावः· धात्वर्थ इति चैत्र· पचतीत्यादौ
वर्त्तमानो यः पाकस्तदनुकूलकृतिमानिति बोधः इदमेव मतमुपपा-
दयति· कथमन्यथेति· वर्त्तमानत्वादेर्धात्वर्थेनान्वयेनानातीतादौ कृते
बाधाद्यप्रसक्तिलक्षणाश्रयत्वेच वर्त्तमानत्वादेरन्वयासंभवात् धात्वर्थ
एवान्वयो वाच्यः एवंच आख्यातार्थवर्त्तमानत्वादि इति एकप्रकारतानिरूपितवि-
शेष्यतावच्छेदकतासंबंधेन शाब्दबोधं प्रति प्रकृत्यर्थतासंबंधेन धातुजन्यो- ११५

पस्थितेः कारणत्वात्तेनैव हि आख्यातार्थकालान्वयस्वीकारे कापरिकार-
णत्वात· तरकृत्यन्वयो रवमेव पूर्वकल्पस्वारस्यः इति दर्शयन्नाह न विष्यत्वेति
स्यतासोज्जुहोत्यनुशासनात् न भविष्यत्त्वं तत्र अर्थः अतीते तु उक्तमनु-
शासनाद्यातीतत्वं तु· अर्थ इत्यर्थः ननु भविष्यत्वं वर्त्तमानध्वंसप्रागभावप्र-
तियोगित्वमतीतत्वं च वर्त्तमानध्वंसप्रतियोगित्वमिति कथं एवं
च घटोत्र भविष्यतीत्यत्र भूतलायमिति भूधातोरुत्पत्तिरेवार्थः आख्यातस्य
चाश्रयत्वमर्थः तत्राख्यातार्थाश्रयत्वे भविष्यत्वादेरन्वयासंभवाद्धात्वर्थो-
त्पत्तावेव वाच्यस्तथाच वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकाश्रयत्ववि-
त्तः घटोत्र इत्यन्वयबोधस्वीकारे त्वत्रेदमुत्तरपक्षे· परिरक्षां
ताभावेपि अनुत्पन्नघटत्वतादृशत्वविष्यत्वं स्यादिति· तथाच वर्त्तमानप्राग-
भावप्रतियोगित्वमेव भविष्यत्त्वं तच्चात्र विष्यतीत्यादौ धात्वर्थोत्पत्तेरुप-
न्नानत्वादौ न तादृशान्वयो नेति भावः पचतीति· समञ्चितं आख्यातार्थका-
लस्य समानपदोपात्तत्व प्रत्यासत्त्या कृतावन्वय इत्युक्तम्· तथाच प-
चतीत्यत्र वर्त्तमानप्रागभावप्रतियोगिनी या पाकानुकूलाकृतिस्त-
द्वांश्चैत्र इति बोधः स्वीकारे परं चैत्रेण पाकः क्रियमाण इत्येकस्मात् कृते

न्तित्वेपि ध्वंसप्रागभावयोः सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वाभावे
नधाविनीयान्याकृतिस्तत्प्रागभावस्य सत्त्वात् पक्ष्यतीतिप्रयोगापत्तिः एवं अ
पाक्षीदित्यत्रानुत्पत्तिलस्य वर्तमानध्वंसप्रतियोगित्वरूपस्य कृतत्वेवा
न्यपि वर्तमानध्वंसप्रतियोगिनीयापाकानुकूलज्ञातिस्तदाश्रैवत्र इत्यन्वयो
वाच्यः एवं चान्त्यकृतेर्नष्टत्वेन पाकदशायामपि अपाक्षीदिति प्रयोगाप
त्तिरित्यर्थः समाधत्ते· नस्यादिति· आप्येति· तथा च पक्ष्यतीत्यत्र प्रागभा
वत्वेन रूपेण घटत्वनिरूपाभावस्यापाक्षीदित्यादौ अन्त्यकृतिध्वंसस्येव
वकृतात्मविषयत्वात्तन्नाविकृतिप्रागभावमादाय पक्ष्यतीतिप्रा
घकृतिध्वंसमादाय पाकदशायां अपाक्षीदिति प्रयोगापत्तिरितिभा
वः· ननु भविष्यत्वं यदि वर्तमानप्रागभावप्रतियोगित्वं तदा नष्टतासा
दौ प्रतियोगित्वस्याख्यातार्थतया तत्र भविष्यत्वस्यान्वयासंभवात् धा
त्वर्थे नाशे तदन्वयो वाच्यः· तथा च घटो भाविनाशप्रतियोगी नष्टो नश्यतीति
स्यात्· न च परम्परासंबन्धेन कालस्य भविष्यत्वं घटकीभूतप्रागभावेन्वयः ए
वं च परम्परासंबन्धेन कालवृत्तिवर्तमानप्रागभावप्रतियोगित्वस्य नाशे भावा
न्न तथा प्रयोगापत्तिरिति वाच्यम्· तथा सति घटो भाविनाशकेप्यौनश्यता

तिनस्यात्· नाशप्रागभावस्य स्वसत्त्वकालवृत्तित्वाभावात्· इदानीं घटो
नविष्यतीत्यादौ इदानीं विशेषणस्य कालविशेषस्य चाधिकरणत्वेनोत्पत्ति
रूपधात्वर्थ एवान्वयस्यापेक्षत्वात्· अन्यथा कपालनाशानन्तरं घटनाशक्षणे
इदं कपाले घटध्वंसो भविष्यतीति प्रत्ययापत्तिः घटरूपप्रतियोग्यात्मक
घटध्वंसप्रागभावस्य कपालसत्त्वात् एवं भावित्वं घटत्वं भविष्यतीति प्र
तीत्यापत्तिः अद्यतनकालवृत्तित्वस्य प्रागभावे सत्त्वात् एवमुत्पत्तिम
ति तदन्वयस्वीकारे च घनेभ्यः समुत्पद्यमानो परम्परायोगभविष्यति मेघे
भ्यो गगने परम्परा भविष्यतीति बुद्धिप्रसङ्गात् उत्पत्तिमतो मेघस्य गगन
वृत्तित्वात् परम्परासंबन्धेन कालवृत्तित्वाच्चेति इदानीं विशेषस्य कालविशे
षस्योत्पत्तिरूपधात्वर्थ एवान्वयो वाच्यः तथा च घटो भाविनाशकेपरम्परा
नश्यतीत्यापत्तिः एवं नष्टपतिनष्ट इत्यत्र वर्तमानत्वं अतीतत्वं च धा
त्वर्थे नाशे एवान्वेष्यतीति नष्टो नष्टपतीति स्यात् नाशस्य वर्तमानत्वा
त् नष्टेच नष्ट इति न स्यात् नाशोतीतत्वाभावादिति चेन्न एवं अत्र वर्तमा
न भावप्रतियोगित्वत्तिकत्वरूपभविष्यत्वस्य वर्तमानध्वंसप्रतियोगि
त्वत्तिकत्वरूपातीतत्वस्य च प्रत्ययार्थत्वात् प्रत्ययार्थयोग्यतावेवन्वयः

न्नविशेषादिकल्पनात्. न विषयत्वं च वर्त्तमानप्रागभावप्रतियोगित्वं ध्वं
सप्रतियोगित्वं अतीतत्वमिति किंतु न विष्यतिपत्त्यनीतिस्तु लालिङ्गाये
ण. तत्र धात्वर्थीत्वत्रे. आख्यातार्थकृतेस्वसंभवितपानुपपत्त्यभावात्
एवं च वर्त्तमानप्रागभावप्रतियोगित्वे ज्ञापकाभावात्. शक्ति. नं त्वतीत्वादौ
वर्त्तमानप्रागभावप्रतियोगित्वस्तिकत्वबोधस्तु लक्षणयेति द्रष्टव्यं॥
अथेति ओदनपदं तंडुलपरं. विक्लित्त्यवच्छिन्नतंडुलस्यैवौदनतया
तस्य पाकसंभवेन पयाक्ता संगते. ओदननिष्ठा यो विक्लित्तिस्तज्जन
कोयो व्यापारविशेषस्तत्कर्तृत्वं तदनुकूलकृतिमत्वं प्रतीयत इत्यर्थः
नन्वेति: कर्तृत्वस्याख्यातजन्यत्वादितिभावः तत्. फलं. द्वितीयाया इति
ओदनमित्यत्र द्वितीयाया इत्यर्थः अनुकूलता चेति. व्यापारानुकूल
कृतिमानित्यत्रानुकूलता चेत्यर्थः संसर्ग इति. व्यापारकृत्यो संसर्ग इ
त्यर्थः ननु कर्मत्वमिति. कर्मणि द्वितीयेति सूत्रेण कर्मत्वस्य द्वितीयार्थ
नबोधनादिति भावः तच्च कर्मत्वं चः ननु फलमात्रं कर्मत्वादित्यर्थः क्रि
याया इति. क्रियाजन्यफलशालित्वरूपे कर्मत्वे इत्यर्थः नन्वत्वेति. क्रिया
जन्यत्वस्यात्र तन्मते फलशालित्वमित्यत्र तच्छालित्वं आश्रयत्वमित्यर्थः ११७

तयोः संसर्गमर्यादया लाभात् फलमात्रएव शक्तिः द्वितीयाशक्तिः. कृत्यादि
त्यर्थः ननु क्रियादीनां धात्वादिना लाभेपि द्वितीयायाअपि तत्र शक्तिरस्तु
मत आह अनन्यथेति. हि यस्मादन्यलभ्या एव शक्या इत्यर्थः॥ धातुलभ्यमेवेति. त
पा च कथं द्वितीयायास्तत्रापि शक्तिः. अनन्यलभ्यत्वादितिभावः वस्तुगत्याफला
वच्छिन्नो यो व्यापारस्तद्बोधकत्वादेव धातूनां सकर्मकत्वव्यवहार नानाती
त्वादि त्वजेतुनाक्त इतिसूचनायैकलानुकूलत्वोपलक्षितत्वमुक्तं ननु फ
लानुकूलत्वमपि धात्वर्थे न नुपपत्ते. गौरवादिति. अनुकूलत्वस्य
संसर्गमर्यादया भावादिति भावः नन्वेवमिति. व्यापारमात्रस्य धात्वर्थे
इत्यर्थः सनिगम्यो. त्यजगमधात्वो इत्यर्थः उत्तरसंयोगावच्छिन्नक्रिया
गमधात्वर्थः पूर्वदेशविभागावच्छिन्नक्रिया त्यजधातोरर्थः तत्र फला
वच्छिन्नत्वं पदे न धात्वर्थस्तदा क्रियामात्रस्यैव धात्वर्थत्वात् क्रियारूपे
कार्थत्वात् प्रतिपादकत्वात् पर्यायत्वापत्तेः ज्ञापकतावच्छेदकैक्यमतिवि
शिष्टशक्ततावच्छेदकत्वस्य पर्यायरूपत्वादिति भावः ज्ञानंकते आस्ताम
ति. त्यजतीति. गमधातुनेव त्यजधातुनापि व्यापारबोधनादिति भाव
नन्वेवमिति पूर्वपत्ते. समाधत्ते. मैवमिति. द्वितीयायाः फलमर्थः तत्र

गमधातुसमभिव्याहारे द्वितीयायाः संयोगरूपं फलं बोध्यते । त्यजधातुसमभि
व्याहारे च विभागरूपं फलं बोध्यत इत्यर्थः । यथोक्तेति । ग्रामं गच्छतीतिवद्
ग्रामं त्यजतीति प्रयोगापत्तिप्रसङ्गनिराकरणादित्यर्थः । तथा च व्यापा
रमात्रस्य धात्वर्थत्वे त्विति ग्रन्थः । यद्यपि इष्टापत्तिः । ग्रामं गच्छतीत्यत्र ग्राम
वृत्तिप्रदेशैः संयोगानुकूलक्रियानुकूलकृतिमानिति बोधस्य गमधातु
समभिव्याहाराभावात् ग्रामं त्यजतीत्यस्यासंभवेन ग्रामं गच्छतीतिवद्
ग्रामं त्यजतीति प्रयोगापत्तेर्वारयितुमशक्यत्वादिति भावः । अवच्छेदक
मेव । धात्वर्थतावच्छेदकमेव । फलावच्छिन्नव्यापारस्य धात्वर्थत्वादिति भा
वः । नन्वेवं द्वितीयायामैरप्यव्याप्तिः फलस्य धातुनैव लाभादित्यत आ
ह । द्वितीयापक्षेपीति । ग्रामं गच्छतीत्यत्र ग्रामवृत्तिसंयोगावच्छिन्नक्रियानु
कूलकृतिमानित्यन्वयबोधः तत्र पूर्वकल्पे फलस्य द्वितीयार्थत्वात् आ
धेयत्वं संसर्गमर्यादया भासते अस्मिन् मते तु फलस्य धात्वर्थत्वात् द्वि
तीयाया एवाश्रयत्वमिति भावः । नचैवमिति । एवं द्वितीयाया आश्रयत्वा
पकत्वे । भूमाविति । भूमौ पततीत्यत्र भूमौ आश्रयत्वस्यान्वयो धातूक्त
मिपदोत्तरं द्वितीयापत्तिः । मन्मते तु तत्र फलस्य बोधान्न तद्बोधकद्विती

यापत्तिः । युज्यते इति भावः । समभिव्याहारेति । समभिव्याहृतो यो धातु
स्तदर्थतावच्छेदकं यत्फलं तदाश्रयताबोधकत्वं द्वितीयाया इत्यभि
न याच यत्र समभिव्याहृतधात्वर्थतावच्छेदकफलाश्रयत्वबोधस्त
त्र द्वितीया । भूमौ पततीत्यादौ तु पतधातोरकर्मकतया धात्वर्थता
वच्छेदकफलाभावेन तदाश्रयताबोधात् आश्रयत्वबोधेऽपि न द्विती
येति भावः । ननु तथापि फलावच्छिन्नव्यापारस्य धात्वर्थत्वे फलस्यैक
देशतया कथं तत्र द्वितीयार्थाश्रयत्वादेरन्वय इति वाच्यम् । आकांक्षा
दिवैचित्र्यादेकदेशेऽप्यन्वयस्वीकारात् । अत एव पदार्थान्विताधेय
त्वबोधकसप्तमीतो द्वितीयायाभेद इति हृदयम् । अत एवेति । फला
वच्छिन्नव्यापारस्य धात्वर्थत्वादेवेत्यर्थः । ध्रुवमिति । अन्यथा व्यापा
रमात्रस्य धात्वर्थत्वे फलस्य धात्वर्थतावच्छेदकतया कर्मत्वं दुर्वचमि
ति भावः । ननु मास्तु धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वं किन्तु क्रि
याजन्यफलशालित्वमत आह नहीति । नहीति । कर्मत्वमित्यर्थः । चै
त्रो ग्रामं गच्छतीत्यत्र उत्तरदेशसंयोगावच्छिन्नक्रिया गमधातोरर्थः न
न्योत्तरदेशसंयोगरूपफलशालित्वात् ग्रामस्य कर्मत्वं न तु संयोगा

स्यदिष्टत्वात् चैत्रस्यादिकर्मत्वापत्त्या चैत्रः स्वात्मानं गच्छतीति प्रयोगापत्ति
रिति वाच्यम्. परसमवेतत्वस्य क्रियाविशेषणत्वात्. न चाव परसमवे
तायाः क्रियाया न तत्त्वः फलशालित्वं कर्मत्व— नवोत्पन्नकर्म गच्छतीम स्तोम
छं गच्छतीति यत्नम— चात्मानं गच्छतीति स्यादिति वाच्यम्. प्रकृतधा
पेक्षया हि परत्वं द्वितीयादीनां बोध्यते. ग्रामं गच्छतीत्यत्र ग्रामभिन्नस
मवेतग्रामवृत्तिसंयोगजनकक्रियानुकूलकृतिमानित्यन्वयबोध
ः स्वात्मानं गच्छतीत्यत्र स्वात्मभिन्नसमवेतस्वात्मवृत्तिसंयोगजनकक्रि
याप्रत्योत्तरवृत्तिक्रियातदनुकूलकृतिमत्तस्य स्वात्मिनः भावेन तादृ
शप्रयोगापत्तिवारणात्. अथ प्रकृतधात्वर्थतावच्छेदकावच्छि
न्नप्रतियोगिताकत्वसंबंधेन परत्वेनान्वये पृथिवीं प्रयाति विहगइ
त्यत्र पृथिवीत्वस्यान्वयितावच्छेदकतया तदवच्छिन्नभिन्नत्वस्य वि
हगे भावाद् नन्वयापत्तिः प्रतियोगितानामैरैवान्वयेप्य द्वितावच्छि
न्ने धेद्रशादाप स्वात्मानं प्रयातीति प्रयोगापत्तिरिति चेन्न. द्वितीयार्थ
फलनिष्ठधर्मेरन्वयस्तद्धर्मावच्छिन्नप्रतियोगिताकसंबंधेन प्रकृ
तधर्मस्य परत्वेनयानत्पृथिवीं प्रयाति विहग इत्यादौ पतत्पृथिवीत्व

क्तिवृत्तिसंयोगजनकं प्रयाणं शाब्दबोधविषयस्तद्धर्मावच्छिन्नभिन्नत्वस्य विहगे बाधा
दिति. केचित्तु. सामान्यधर्मस्य विशेषपरतया पृथिवीपदेन वृक्षत्वं उमेव बुध्य
ते. ननु वृक्षविहगसाधारणपृथिवीत्वजातावच्छिन्नभिन्नत्वस्य ---छेद
कावच्छिन्नप्रतियोगितासंबंधेन प्रकृतधर्मस्य परत्वेनान्वयेपि न दोषः तादृ
वृक्षभूम्योरिति. वृक्षस्य कर्पनस्य विभागाश्रयतया नू मैत्रकर्तृत्वं संयो
गाश्रयतया चेत्ययः पतनरूपक्रियाजन्यफलं पूर्वदेशेन वृक्षेण सह विभाग
ः भूमिस्तयोत्तरदेशसंयोगश्चेति वृक्षभूम्योरुभयोरपि कर्मत्वापत्तिः पत
धातोरेकत्वे हि तयाइष्टापत्तेरयोगादिति भावः. इदनुपपन्नम्. गमन
जन्यविभागरूपफलशालित्वस्य पूर्वदेशे सत्त्वात्. तेः पूर्वस्मिन्देशेक
र्मत्वापत्तिः तजेनान्यस्मिन्देशेः स्यदेश्य पूर्वापरयोः कर्मत्वापत्तिरित्य
पि दृष्टव्यन्तपतनतपंरिति. अधःसंयोगावच्छिन्नक्रियान पतत्यर्थः किं
तु गुरुत्वासमवायिकारणिका विजातीयक्रियामात्रमिति धात्वर्थताव
च्छेदकफलाभावेन कर्मत्वापत्तिरिति भावः. ननु धात्वर्थतावच्छेदकफ
लशालित्वस्य कर्मत्वरूपत्वे चैत्रो ग्रामं गच्छतीत्यत्रोत्तरदेशसंयोगावच्छि
न्नक्रियागमधात्वर्थ इति धात्वर्थतावच्छेदकसंयोगरूपफलशालित्वस्य

आप इव चैत्रेऽपि सत्त्वात् तत्रापि कर्मत्वापत्तिः॰ तथा च चैत्रः स्वात्मानं गच्छतीति
प्रयोगापत्तिरत आह॰ तद्धात्वर्थेति॰ यद्धात्वर्थतावच्छेदकफलशालित्वं त
द्धात्वर्थनिरूपिताधिकरणत्वे सतीत्यर्थः तेन कर्मणो धात्वर्थान्तराधिकरणत्वेऽपि
नासंभवः॰ नन्वेवमपीति॰ गमधात्वर्थतावच्छेदकं यत्फलं ग्रामवृत्तिसंयोगस्त
दाश्रयत्वेऽपि चैत्रस्य न कर्मत्वमित्यर्थः गमनरूपधात्वर्थानधिकरणत्वाभावादि
ति भावः स्वात्मवृत्तित्वेनेत्यस्वरसः सूचितः स च फलावच्छिन्नव्यापारस्य धात्वर्थ
त्वे द्वितीयमप्यस्मिन् पक्षे तदेकदेशे फलेऽन्वयस्वीकारेणैकदेशान्वयापत्ति
रेवं पतनजनकसत्त्वार्थकाकर्मकधातूनां व्यापारमात्रार्थकतया तत्र पयःपिला
पत्तिवारणेऽप्यसम्भवः सकर्मकधातूनामपि पयःपिलवारणे किमिति गुरुफला
वच्छिन्नव्यापारत्वं शक्यतावच्छेदकं नन्वेवं कर्मत्वस्य अव्यवस्थापत्तिरिति वाच्यं
परसमवेतत्वस्य धात्वर्थान्वयिफलविशेष्यत्वशालित्वं तत्तद्धात्वर्थकर्मत्वमि
ति तन्निर्वचनात् संयोगरूपफलविशेषस्य गमधात्वर्थान्वयित्वादुत्तरदे
शे कर्मत्वं विभागरूपस्य फलस्य तु गतधात्वर्थानन्वयेन पूर्वदेशे कर्मत्वा
पत्त्यभावात् पततीत्यत्र फलविशेषाबोधात् धात्वर्थान्वयिकर्तृफलवि
शेषशालित्वरूपस्य कर्मत्वस्य न तत्र प्रसक्तिरिति॰ अत्रेदमवधेयम्॰ क

र्माख्यातस्थले चैत्रः पचतीत्यादौ पाकानुकूलकृतिमांश्चैत्र इति शाब्दबोध
ः कर्माख्यातस्थले तु चैत्रेण पच्यते तण्डुल इत्यादौ तृतीयाया आधेयत्वमर्थः
फलावच्छिन्नव्यापारो धात्वर्थः आख्यातस्याश्रयत्वं तज्जन्यत्वं तथा च चैत्रनिष्ठ
कृतिजन्यपाकजन्यफलशाली तण्डुल इत्यन्वयबोधः आख्यातार्थकृतेर्धा
त्वर्थविशेष्यत्वविशेषणत्वाभ्यां भेदकर्त्राख्यातकर्माख्यातव्यवहार इति
प्राञ्चः न च आख्यातक्रियाजन्यफलशालित्वरूपकर्मत्वबोधस्य कर्माख्यातस्य
फलबोधकत्वं विनानुपपत्तिः तथा हि फलस्य प्रकारतया भानात् संसर्ग
मर्यादया भानासंभवः फलावच्छिन्नव्यापारस्य धात्वर्थत्वेऽपि विशेषणवि
शेष्यभावव्यत्यासस्यासंभवात् क्रियाजन्यफलशालित्वं कथं युज्यते॰ इ
त्थं च फलस्यात्मनेपदार्थत्वे व्यापारमात्रं धात्वर्थः चैत्रेणागतमित्यादौ
तृतीयायाः कर्तृत्वार्थकत्वाद्यत्पकत्वान्तृतीयाया एव कृतिरर्थः॥ आख्या
तार्थकृतेर्धात्वर्थविशेष्यतयैव भानस्य कर्त्राख्यातस्थले जप्रत्यासङ्ग
गापत्तेः सुवर्थकृतेश्च धात्वर्थविशेषणत्वेनैव भानस्य कर्माख्यातस्थले कर्तृत्वक
र्मत्वबोधकत्वादेव च कर्तृकर्माख्यातव्यवहार इति प्राञ्चः वैयाकरणास्तु
आख्यातस्य कर्त्तरि शक्तिः॰ कर्तृकर्माभिधानानभिधानाभ्यां तृतीयादिनि

यानियमस्य कल्प्यमसंसर्गाभिधाननिधानाभ्युपपत्तावपि लाघवादेवत
प्रशक्तिः नयादिचैत्रः पचतीतिशाब्दसामग्रीकाले कृत्यप्रकारकतानाभावप्र
सक्तवारणाय तादृशप्रत्यक्षे शाब्दसामग्र्याः प्रतिबंधकत्वं कल्पनीयम्
वैयाकरणमतेतु विषयासत्त्वे प्रत्यक्षवारणाय न कल्पनः न
चकृतिप्रकारकतानाभावप्रत्यक्षे ममापि न कल्पनमिति वाच्यम् कर्म
प्रकारकतानकाले कृतिप्रकारकतानस्याव ऋपकतया ममापि विषयास
त्त्वेपैवत द्वारणात् कृतिप्रकारकतानाकाले च कर्मप्रकारकतानस्याभावेन
साध्याज्ञावात्. एवं शाब्दसामग्र्याभाविनाद्दशप्रत्यक्षहेतुत्वकल्पने गौरव
मित्याकूतं समत. गुरुशरीरकर्मप्रकारकयोग्यताज्ञानकर्तृत्वेदृतानाभावा
दिघटसंबंधटितत यावेविधशाब्दसामग्र्याभावे घटपदादिप्रत्यक्षकारण
त्वकल्पने गौरवात् लाघवेन कृतित्वनानैर्वाख्यातशक्यतावच्छेदकत्वा
दितिदिक्. नत्स. सहेंस्मिति. इत्तिमच्छ एसील्यर्थः निराकांक्षादाविति. आदि
नाकाक्षिपता सन्निधिपरिग्रहः सहकारीति. तायमानं सहकारीत्यर्थः तत्राकां
क्षाविति. आनिरूपयतिनचेति. यादृशान्वयेति. यद्विशेष्यकयत्प्रकारक
यत्संसर्गकान्वयबोधजनकमित्यर्थः इदमेवोपपादयति. नचतिहीति. ता

तपदमिति. घटमानयेत्यत्रनामपदं घटपदं. उत्तरवृत्तिविभक्तिपदे त. स्वो
त्तरवृत्तिअपरूपविभक्तिपदेनैवसह. अनयेति. घटिवाकर्मतेति. आधे
यतासंसर्गक घटप्रकारककर्मत्वविशेष्यकान्वयबोधजनकमित्यर्थ
ः अतस्तस्येति. घटपदस्य विभक्तिसमभिव्याहारेत्यर्थः तादृशान्वयेइ
ति. घटीयपाकर्मतेत्यन्वयेआकांक्षेत्यर्थः एतएवेति यादृशान्वयेति. प्र
वेशादेवेत्यर्थः घटकर्मत्वमिति. घटकर्मत्वमानयनं कृतिरिति निराकां
क्षवाक्येसमानविभक्तिकनामपदयोः अभेदान्वयसाकांक्षत्वेन घटः
कर्मत्वमित्यादौ अभेदान्वयसाकांक्षत्वेपि आधेयतासंबंधेन साकांक्ष
त्वादावत. यादृशान्वयेति. विवक्षणीयमिति भावः योग्यताभ्रमेणाभेदा
न्वयबोधस्येष्टत्वात् घटमिति वदितुक्तत्वात्. घटीपाकर्मेति तिनान्वयबो
धइत्यर्थः आकांक्षेति. घटपदस्यानुपदसमभिव्याहाररूपाकांक्षाविरह
इत्यर्थः धातुपदं चेति. आरयेत्यत्र धातुपदंनाख्यातपदेनैव सहानुक
ज्जतासंसर्गकानयप्रकारककृतिविशेष्यकान्वयबोधजनकं भवति तत्र
धातुपदे आख्यातपदसमभिव्याहाराकांक्षेत्यर्थः अतएव धातुपदेआ
ख्यातपदसमभिव्याहारस्याकांक्षत्वादेवः आनयनंकृतिरिति. अभेदान्वय

साकांक्षत्वेपिआनयनीयत्वअनुकूलतासंसर्गकानयनप्रकारकेकृतिवि
शेष्यकोनान्वयबोधइत्यर्थः कृतीति· कृतिवाचककृतिपदसत्वेपिकृतिवा
चकाख्यातसमभिव्याहाराभावेनेत्यर्थः निराकांक्षत्वादिति· आनयनानुकूल
कृतिरितिअन्वयबोधेनिराकांक्षत्वादित्यर्थः नन्विति· कर्मत्वबोधेकर्मत्वोप
स्थापकपदत्वेनकारणतया घटः कर्मत्वमित्यत्रापिकर्मत्वोपस्थापकपदस
त्वेनघटमितिवत्कुतोनान्वयबोधः कार्यस्यसामग्र्यधीनत्वात्सामग्र्या
श्चात्रापिसत्वादितिभावः कर्मत्वादीनामिति· घटादिनासहेतिशेषः त्वार्थेति
नानार्थेत्यर्थः नहीति· कर्मत्वोपस्थापकेत्यर्थः तथाचाश्रयाश्रयिभावसं
बंधेननामार्थनिष्ठकर्मत्वविषयकशाब्दबोधत्वावच्छिन्नंप्रतिनामपद
समभिव्याहृतद्वितीयापदत्वेनकारणत्वात् घटकर्मत्वमिति· समभिव्या
हारः कारणमितिकारणत्वग्रहः अन्यदित्यर्थः ननइति· घटकर्मत्वतानामि
त्यादिवाक्यादित्यर्थः कर्मत्वोपस्थापकविभक्तिसमभिव्याहाराभावादितिभावः
तस्मिन्पुरुषे· घटः कर्मत्वं· तानमित्यादिवाक्यादित्यर्थः कर्मत्वोकर्मत्वोपस्था
पकविभक्तिसमभिव्याहाराभावादितिभावः॥ तस्मिन्पुरुषे· घटः कर्मत्वमित्या
दिनिराकांक्षवाक्येविपरीतव्युत्पन्नेरत्यर्थः काकथेति· तथाचतादृशपुरुषस्या

नीकृतयातस्याप्यनीकृत्वेनघटीयाकर्मतेत्यन्वयबोधेकर्मत्वोपस्थापक
विभक्तित्वेनकारणतायान्नव्यभिचारइतिभावः तादृशः स्यात् घटः कर्मत्व
मितिवाक्येविपरीतव्युत्पन्नस्यात् तस्यकिमिति· तस्यान्वयबोधः कथं
नविष्यतीत्यर्थः कर्मत्वोपस्थापकविभक्तिपदसमभिव्याहाराभावादिति
भावः शंकेति· घटीकर्मताकमतेतिशाब्दबोधत्वावइत्यर्थः ननुकथंतन
त्रकार्यजनआह· अनयेति· प्रायशः घटमितिवाक्यएवव्युत्पन्नानांघट
कर्मत्वमितिवाक्यात् घटीयाकर्मतेत्यनुभवाभावेनतादृशान्वयबोधे
घटमितिसमभिव्याहारस्यकारणत्वावच्छेदकतयापुरुषभेदेनकारणत्वक
ल्पनेगौरवात् घटः कर्मत्वमितिवाक्याच्चकस्याप्यन्वयबोधइति· आधे
क यतासंसर्गघटप्रकारककर्मत्वविशेष्यकशाब्दबोधेघटपदसमभिव्याह
तकर्मत्वोपस्थापकान्वयबोधइति· आधेयतासंसर्गकघटप्रकारककर्मत्व
विशेष्यकशाब्दबोधेघटपदसमभिव्याहृतकर्मत्वोपस्थापकस्यान्वयबोधहे
तुपकद्वितीयाविभक्तित्वेनकारणत्वेनव्यभिचारइतिदिक्· तस्याश्चेति· स
मभिव्याहाररूपायाआकांक्षायाअतानंकारणमित्यर्थः ननुमेणेति· समभि
व्याहारधर्मेणेत्यर्थः अन्वयेति· स्वरूपसत्यास्तस्याहेतुत्वेस्वरूपसत्यास्तत्रा

भावेनज्ञानात्तुदयप्रसंगात् तत्तत्तानंकारणं तत्कृष्णमाभ्यस्कं वत्तत्रसंजवत्ते
वेतिभावः पक्ततेति. पदिशेष्यकपप्रकारकपक्षंसर्गकोन्वयबोधस्तत्रप्रमा
नाकारकः तद्विशेष्यकतत्प्रकारकतत्संसर्गकोपः स्वरूपसती अपराकांक्षा
हेतुरित्यर्थः अनन्तेति: अपराकांक्षायाः स्वरूपसत्याहेतुत्वादित्यर्थः एकदेति. घ
टकर्मकानयमिति बोधांतरजनकपतीत्यर्थः तत्रहेतुमाह. स्वजन्येति. वा
क्यजन्यानुत्पत्तिविरहरूपकारणाभावादित्यर्थः घटमानयेत्यत्र घटकर्मकान
यमानुकूलाकृतिरितिशाब्दबोधेनानेपुनस्तादृगन्वयबोधापत्तिकारणाप्य
प्रकृतशाब्दबोधाभावरूपाकांक्षाया अपिहेतुत्वमावश्यकमितिभावः॥ एवं
च. स्वजन्यान्वयबोधरूपाकांक्षाया अवश्यहेतुत्वेचेत्यर्थः गामिति॥ दंडेनगा
मानयेत्यत्रावांतरवाक्यार्थबोधपूर्वकस्यैवमहावाक्यार्थबोधस्यअनुत्पत्त
सिद्धत्वात् गोकर्मकानयनमित्यन्वयबोधेजातेदंडेनेत्यन्वयबोधेदंडकर्म
कगोकर्मकमानयनमितिमहावाक्यार्थबोधेनिराकांक्षतनास्यादित्यर्थः॥
नन्वेति. महोत्यर्थः गामिति. गोकर्मकमानयनमित्यन्वयबोधइत्यर्थः॥ प्र
कृत. दंडेनगामानयेतिवाक्यतात्पर्यविषयः तेनगामानयेत्यन्वयबोधेन
सामानाकारइति. समानविषयकइत्यर्थः तथाच प्रकृतान्वयबोधसमाना १२३

कारत्वं स्वजन्यान्वयानुत्पत्तेविशेषणमितिभावः नन्वेवमन्वयबोधद्वयंजाय
तामितितात्पर्यं घटमानयेतिवाक्यादेकबोधेजाते परान्वयबोधोनस्यादि
त्यतआह दिगिति. एवंतात्पर्यविषयत्वमप्यन्वयबोधे विशेषणमित्य
र्थः. तथाचतात्पर्यविषयीभूतबोधद्वयस्यतत्रानात्तत्वात्नाकांक्षा
तिरिति. योग्यतांलक्षयति. योग्यतात्वेति. एकपदार्थेपरपदार्थस्यपादृशा
संसर्गवत्तंतादृशसंसर्गवत्त्वं योग्यतेत्यर्थः लक्ष्येलक्षणं योजयति. पयसे
ति. नन्वेवंकरकाग्निमापप्रयुक्तेपयसासिंचतीतिवाक्यमपियोग्यंस्यादित्य
तआह यस्मिंश्चेति. करकासमुद्रमध्यच्छिन्नजातावित्यर्थः तस्मिन्. करक
कारिरूपेपयसि. अयोग्यमिति. एकाकारस्याकपसायिविषयवाधावाधा
भ्यां योग्यायोग्यत्वादितिभावः आकांक्षामिति. आकांक्षाज्ञानसमवायसत्ता
नुक्तेजेदान्वयमात्रयादियोग्यतापत्तिरितिप्रकृतेतिविशेषणोपादानं
तथाचएकपदार्थेअपरपदार्थस्यपादृशासंसर्गवत्तंतत्संसर्गमादायपोग्य
ताःप्रकृतेन्वयभेदसंसर्गस्याकांक्षाशाब्दबोधाभावाभेदसंसर्गमादाययोग्यते
ति. अस्याश्चेति. एकपदार्थेःपरपदार्थसंसर्गवत्त्वरूपायायोग्यतायाश्चेत्यर्थ
। तद्रूपेणापि. योग्यताधर्मेणापि. अन्वयेति. करकाग्निभाषप्रयुक्तपयसा

सिंचतीत्यत्रान्वयबोधादित्यर्थः स्वरूपसत्त्वात्तस्याः कारणत्वे करकायां सेकसंस
र्गस्यासत्त्वेन शाब्दबोधानुदयप्रसंगात् ज्ञानं कारणमिति भावः एतन्मते वह्निना
सिंचतीति वाक्यं स्वरूपायोग्यबोधकम्. तदुक्तं न हि आरोपितसामर्थ्यं दहति
पचति वेति. संसर्गस्य. पयसि सेकसंसर्गस्य. अपूर्वत्वात्. शाब्दबोधात् पूर्व
मप्रतीतत्वात्. कथमिति. तथा च कथं योग्यताज्ञानं शाब्दबोधकारणमिति
भावः ज्ञानमात्रमिति. संशयनिश्चयसाधारणं ज्ञानमात्रमित्यर्थः अत्र यः प
यसा सिंचतीत्यत्र संशयरूपं ज्ञानमिति न यावन्निश्चयरूपज्ञानस्य पूर्व
मसत्त्वेपि संशयरूपस्य सत्त्वात् न ज्ञानकारणत्वे बाधकाभाव इति भावः
ननु निश्चयस्य हेतुत्वमस्त्वेन ज्ञानाधारणं ज्ञानं कारणं स्यान्न देव तु कुत
इत्यत आह. क्वचिदिति. तन्निश्चयोपि. योग्यतानिश्चयोपि. संभवतीत्यत्तु
च्यते. विभ्रमपदस्य मा ह. प्रत्यक्षेणेति. इहेह. घटे इहेह. घटोस्तीति. नूतन
घटनिश्चयेनाते नूतने घटोस्तीति वाक्याच्छाब्दबोध इत्यर्थः शाब्दबोधस्ति
देवेतनशाब्दबोधप्रतिबंधकतया प्रत्यक्षनिर्णयेपि शाब्दबोधोदयादिति भा
वः एत एव स्वतन्त्रान्वयबोधविरह आकांक्षेसुक्तं मत्वन्वयबोधविरह इति.
असंसर्गाग्रह इति. तेन संबंधेन तदभावग्रह इत्यर्थः प्रतिबंधकशाब्दबोध १२४

प्रतिबंधकः तदभाव. तेन संबंधेन तदभावग्रहाभावो योग्यतेत्यर्थः सा
. असंसर्गाग्रहरूपा योग्यता स्वरूपसती शाब्दबोधे हेतुः नचैवमिति. अ
संसर्गाग्रहस्यैव योग्यतात्वे इत्यर्थः न तत्र पय इति न जलं वह्न्यभाववानि
ति बाधाभाववदशायां जलं वह्निमानित्यपि वाक्यं योग्यं स्यादित्यर्थ
: इष्टत्वादिति. तथापि योग्यताभ्रमाच्छाब्दबोधाभ्युपगमादिति भाव
. वह्निना सिंचतीति वाक्यं तु स्वरूपायोग्यत्. न हि आरोपितसामर्थ्यं दह
ति पचति वेति. न चेति. लाघवात्. संशयनिश्चयसाधारणसंसर्गज्ञा
नत्वेन प्रकारेण लाघवात्. कारणं. शाब्दबोधकारणं न तु असंसर्गा
ग्रह. ननु संबंधाभावनिश्चयाभावः संसर्गाग्रहापेक्षया संसर्गाग्रहाभावनि
श्चयाभावत्वेन कारणत्वे गौरवादित्यर्थः असंसर्गाग्रहस्येति बाधाभाव
स्येत्यर्थः लौकिकेति. लौकिकसाक्षात्कारातिरिक्तपित्तादिरूपदोषाजन्य
ं च न दिशिष्टज्ञानं तन्मात्र एव कारणत्वावधारणादित्यर्थः तथा च
विशिष्टबुद्धिसामान्य एव बाधाभावस्य कारणत्वात् तेनैव योग्यताकार
णे विशिष्टबोध्ययोग्यतायाः शाब्दबोधे न कारणत्वं. अतिरिक्तकारणत्व
कल्पने गौरवादिति भावः विशिष्टबुद्धिसामान्ये बाधाभावस्य हेतुतांब्य

त.प्र. वस्त्वापमतिरूपमन्यथेति । बाधाभावस्य विशिष्टबुद्धिसामान्ये हेतुत्वेऽन्य
१२५ थेः लौकिकसाक्षात्कारातिरिक्तस्य व्यावृत्तिमाह तदन्यत्वेति । घटाभावानु
मितावपि घटस्य लौकिकसाक्षात्त्वधीरोदयात् लौकिकसाक्षात्कारातिरि
क्तत्वं विशेषणम् । पित्तादिदोषाजन्येनेत्यस्य व्यावृत्तिमाह शंख इति । तदभा
वानुमितावपीत्यनुषज्यते । शंखे पीतत्वाभावानुमितावपि शंखः पीत इ
ति दोषजन्यतानोदयात् दोषजन्यत्वमिति भावः । अजन्यांतमिति । लौकि
कसाक्षात्कारातिरिक्तः पित्तादिदोषजन्यत्वं विशेषणमित्यर्थः । नेदं रजत
मिति ज्ञाने इदं रजतमिति दोषजन्यज्ञानापत्तिवारणाय पित्तादिरूपदो
षविशेषनिवेशः । केचित्तु । दोषजन्यपीतः शंख इति ज्ञानोत्तरं पीतसा
क्षात्करोमीति साक्षात्कारित्वग्रहोदयात् लौकिकविषयतायाश्च साक्षा
त्कारित्वव्यं विशेषजकतयातत्र लौकिकविषयतायावच्छ्रपत्वाकारेण
लौकिकसाक्षात्कारातिरिक्तत्वमनेनैव पीतः शंख इति ज्ञानवारणे पित्ता
दिदोषाजन्यत्वं प्रतिबध्यतावच्छेदककोटौ न देयमेव । न च लौकिकविष
यतायां लौकिकसन्निकर्षस्यैव नियामकतया कथं तत्र तेन विनापि १२५
तत्त्वांशे लौकिकविषयतेति वाच्यम् । लौकिकसन्निकर्षवत् दोषविशेष

स्यापि लौकिकविषयतया नियामकत्वोपगमात् फलानुरोधित्वात् कल्प
नाया इत्याहुः । नन्व इति । घटो निधेयत्वस्य स्वरूपसंबंधसंसर्गकघटवि
शेष्यकानिधेयत्वप्रकारकबुद्धिं प्रति घटविशेष्यकस्वरूपसंबंधघटत्वाव
च्छिन्नप्रतियोगिताकअनिधेयत्वाभावप्रकारकनिश्चयाभावरूपबाधा
भावत्वेन कारणता वाच्या तत्तु न संभवति स्वरूपसंबंधेनानिधेय
त्वाभावस्य कुत्राप्यसिद्धेरित्यर्थः । अनिधेयत्वेति । अनिधेयत्वप्रतियोगि
कस्वरूपसंबंधाभावाप्रसिद्धेरित्यर्थः । तद्ग्रहाप्रसिद्धिः । अनिधेयत्वासंस
र्गग्रहाप्रसिद्धिः समाधत्ते अनिधेयत्वेति । वस्तुगत्या स्वरूपसंबंधेनानि
धेयत्वाभावस्याप्रसिद्धावपि घटानावेऽनिधेयत्वप्रतियोगिकभ्रमः प्र
सिद्ध एवेत्यर्थः । तदभावस्य अनिधेयत्वप्रतियोगिकत्वेनाभावग्रहाभा
वस्याप्रसिद्धिरित्यर्थः । घटविशिष्टबुद्धिं प्रति वस्तुगत्या घटाभावग्रहाभा
वस्य हेतुत्वे यत्र घटप्रतियोगिकत्वेन घटाभावे भ्रमस्तत्र घटविशिष्ट
बुध्यापत्तेर्घटविशिष्टबुद्धिप्रतियोगितासंबंधावच्छिन्नघटत्वावच्छिन्न
निष्ठप्रकारतानिरूपिताभावनिष्ठविशेष्यताशालिनिश्चयाभावत्वेनै
व हेतुतया वाच्यतया प्रकृतेपि स्वरूपसंबंधावच्छिन्नप्रतियोगितासं

बंधेन बाध्यत्वप्रकारकाभावविशेष्यकभ्रमस्य संभवितया तदभावस्य हे
तुतायां व्यभिचारादिति भावः ननु भ्रमस्य दोषाधीनतया घटे न तादृ
शो भ्रमस्तत्र का गतिरित्यत आह यदि चेति। सोऽपि। तत्र घटे निषेधप्र
तियोगि शाब्दबोधे असंसर्गाग्रहे शाब्दबोधकारणं यदि योग्यताकारणं यद्वस्तु
स एव न प्रसिद्धस्तत्रापत्त्यभावेन तस्या अहेतुत्वेऽपि न क्षतिरिति भावः। नचैव
मिति। एवं घटो निषेध्य इति शाब्दबोधे योग्यताया अहेतुत्वे व्यभिचारात्।
अनिषेध्यत्वविषयकशाब्दबोधे व्यभिचारात् व्यतिरेकव्यभिचारः शाब्द
बोधे प्रति शाब्दबोधसामान्यं प्रति। न हि शाब्दबोधत्वावच्छेदेन सकलपु
रुषसाधारणविशिष्टबुद्धिसामान्येन तथा। शाब्दबोधत्वस्य कार्यतावच्छेद
कतया एवमन्निधानात् पर्याप्तत्वासंगतः किं तु विशिष्येवेति। न हि शा
ब्दबोधसामान्ये योग्यता हेतुरित्युच्यते किं तु तत्पुरुषीयतद्विशेष्यकतत्प्र
कारकविशिष्टबुद्धिं प्रति तत्पुरुषीयतद्विशेष्यकतत्संबंधावच्छिन्नप्रति
योगिताकतदभावनिश्चयाभावत्वेन कारणत्वं एवं चानिषेध्यत्वादिकेवला
न्वयित्वे बाधाभावस्याहेतुत्वेऽपि न क्षतिः। कार्यकारणभावस्य विषयभे
देन पुरुषभेदेन च भिन्नत्वादिति भावः। ननु समवायेन विशिष्टबुद्धिं प्रति

समवायसंबंधावच्छिन्नप्रतियोगिताकबाधाभावस्य कारणतायां विषय
भेदभिन्नत्वेऽपि पुरुषभेदेन भेदमानाभावः एकपुरुषीयबाधस्याप्यात्मनि
असत्त्वेन व्यभिचाराभावात् तथा घटो निषेध्य इत्यत्र भ्रान्तेः पुरुषधर्म
तया नादौ संसारे कस्यापि। अनिषेध्यत्वप्रतियोगिकत्वेनाभावभ्रमस्य प्र
सिद्ध्या तदभावस्य भ्रमवत्पुरुषेऽपि सत्त्वेन व्यभिचाराभावात् कथं पुरु
षभेदं निवेश्य व्यभिचारवारणमिति चेन्नैवम्। बाधकाले भ्रमाप्रमाप्रसङ्गात्तां
विशिष्टबुद्ध्युत्पादात् भ्रमाप्रमाप्रसङ्गविषयबाधाभावत्वेन कारणत्वे
कपुरुषस्य भ्रमाप्रमाप्रसङ्गकाले बाधकाले पुरुषान्तरस्य विशिष्टबुद्धिकार
णे यत्तत्पुरुषीयाभ्रमाप्रमाप्रसङ्गविषयबाधाभावत्वेन कारणतावच्छे
दकत्वात्। न च स्वविशिष्ट्यत्वसामानाधिकरण्योभयसंबंधावच्छिन्नप्रति
योगिताकाभ्रमाप्रमाप्रसङ्गाभावविशिष्टबाधाभावत्वेन हेतुत्वे तत्पुरुषी
यत्वनिवेश इति वाच्यम्। प्राचीनमते हि स्वनिष्ठामकसंबंधस्याभावप्र
तियोगितावच्छेदकतयानाकरणत्वासंभवात्। न वा भ्रमाप्रमाप्रसङ्गा
भावविशिष्टबाधाभावत्वेन कारणत्वेऽपि घटो विशिष्यविशेषणभावे विनि
गमनाविरह इति तद्विशिष्टबाधाविशिष्टान्यत्वावच्छिन्नं प्रति बाधाभावः

न.प्र. अप्रामाण्यज्ञानविशिष्टत्वावच्छिन्नं प्रत्यप्रामाण्यज्ञानं हेतुरित्येवोचितम्·
१२७ वैशिष्ट्यंच स्वाव्यवहितोत्तरत्वसामानाधिकरण्योभयसंबंधेन इति वाच्यं त
थासत्येकस्मिन्बाधे प्रामाण्यग्रहकाले प्रामाण्यग्रहानास्कंदितबाधांत
रसत्वेपि विशिष्टबुध्यापत्तेरिति दिक्· अनाहुरित्यस्वरसोऽज्ञावर्णनतदीज
न्तुन हि विशिष्टबुद्धिसामान्ये बाधाज्ञानो हेतु· किंतु बाधकालेति इच्छाका
लेआहार्यप्रत्यक्षोत्पादनादिच्छायाउत्तेजकतावच्छेदकतया प्रत्यक्षस्यैवप्र
तिबध्यतावच्छेदकत्वाउपनीतज्ञानसाधारणबाधप्रतिबध्यतायाः
शाब्दबोधावृत्तित्वात्· नचतथाप्यनुमितिसाधारणबाधप्रतिबध्यता
या· शाब्दसाधारणमिति वाच्यम्· प्रत्यक्षान्यज्ञानत्वस्य बाधप्रतिबध्यता
वच्छेदकत्वेप्रत्यक्षान्यज्ञानत्वयोर्मिथो विशेष्यविशेषणभावे विनिग
मनाविरहेणानुमितित्वस्यैव बाधप्रतिबध्यतावच्छेदकत्वात्· तस्मात्
शाब्दबोधं प्रति स्वातंत्र्येण वा संसर्गाग्रहत्वेन हेतुताया वाच्येति तदपे
क्षया संसर्गरूपयोग्यताज्ञानस्यैव कारणत्वमुचितमिति· नच बाध
निश्चयत्वेन प्रतिबंधकत्वे संशयनिश्चयसाधारणप्रमाण्यज्ञानस्योत्ते १२७
जकत्वं संशयनिश्चयसाधारणयोग्यताज्ञानत्वेन हेतुतायांतु अप्रामाण्य

रेआसत्तिं निरूपयति· आसत्तिरिति· एकपदे परपदाव्यवधानमासत्तिरित्य
र्थः· अत एव पदाव्यवधानस्यासत्तित्वादेव· गिरिरिति· अग्निपदे गिरिपदा
व्यवधानस्यसत्वादासन्नमित्यर्थः· अनासन्नमिति· गिरिरग्निमार्भुक्तमग्नि
मान्देवदत्तेनेत्यत्राग्निमत्पदेनुक्तमित्यनेन व्यवधानात्गिरिपदाव्यव
धानस्याभावादनासन्नमित्यर्थः· नन्वेवमिति· एवं पदाव्यवधानस्यासत्ति
त्वेइष्टस्यथः स्थाल्यामिति· सर्वेषाकारकाणां क्रियायामेवान्वयात्स्थाल्यधि
करणकओदनकर्मकपाकानुकूलकृतिमानित्यन्वयबोधोनापद्यते इतिभा
वः· पाकेन· पाकपदेनेत्यर्थः विवक्षितत्वादिति· अव्यवधानेन विवक्षितत्वा
दित्यर्थः· ओदनपदं चेति· स्थाल्यामोदनं पचतीत्यत्रौदनपदं चेत्यर्थः· अनुकू
लमेवेति· तथाचौदनपदेन व्यवधानेपि तस्यान्वयबोधानुकूलत्वात् अन्व
यबोधानुकूलव्यवधानाभावस्यत्वासन्नत्वापत्तिरिति भावः· यत्र स्था
ल्यां पचतीत्येवान्वयबोधे तात्पर्यं तत्रौदनपदेनव्यवधानेनासन्नत्वेइष्टा
पत्तिरिति भावः· यत्रस्थाल्यांपचतीत्येवान्वयबोधेतात्पर्यं तत्रौदनपदेनव्यव
धानेनासन्नत्वइष्टापत्तिरित्याहः· स्थाल्यामिति· प्रागुक्त इति· यद्यदाकाङ्क्षितं योग्यं
सन्निधानं प्रपद्यते· तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते इति तेषांगाथापि

न.प्र. ·मत्वैवमिति· पदाव्यवधानस्यासत्तित्वे इत्यर्थः श्लोकादेरिति पंचमी· कथमिति·
१२५ पदाव्यवधानाभावादिति भावः· नन्वासत्तिर्न स्वरूपसती हेतुः किंतु तज्ज्ञानं· ए
वंचाव्यवधानभ्रमादेव तज्ज्ञानात् शाब्दबोध इत्यत आह· व्यवहितत्वेनेति· भ्रमेति
तथाच तत्र विशेषदर्शिनो नास्य व्यवहितत्वभ्रमासंभवदासत्तिभ्रमोपि न संभव
तीति भावः· तत्र हि श्लोके हि श्लोकपदात् श्लोकघटकपदात्· नान्वयबोध इति·
तथाच श्लोकस्यानासन्नत्वेपि न क्षतिरिति भावः· कथं तर्हि तत्र शाब्दबोध इत्य
त आह किंत्विति· योजनेति· क्रियाकर्मभावेनान्वयबोधजनकपदसमूहादि
त्यर्थः· तत्र चासन्नत्वमस्त्येवेति भावः· आवृत्तिस्तु स्वरसंभवन्नन्वयमनमा
ह वस्तुतस्त्विति· आकांक्षादिमादिना योग्यतापरिग्रहः· अव्यवहितेपीति· श्लोका
दावपीत्यर्थः· तद्विलंबेन पदाव्यवहितत्वज्ञानविलंबेन अविलंबाच्च· शाब्द
बोधविलंबाभावाच्च· तथाच व्यतिरेकव्यभिचार इति भावः· किंत्विति· अव्यव
हितवदनाकांक्षितानं हेतुरित्यनुमन्यते· तथाच पदनाकांक्षितानमासत्तिरि
ति भावः· तद्वेति· अव्यवहितपदनाकांक्षितानं चेत्यर्थः· अभिसंधात्विति· ए
तद्भिन्नतत्पदेन सह संकल्पान्वयबोधं जनयत्विति अभिसंधायपि तु रिच्छ
त्यर्थः· ननु वक्तुरिच्छावास्तु कृतपभिसंधापपितु रितिनिवेशनेत आह:

निश्चयस्यैवोत्तेजकत्वं गौरवम्· तद्भाववद्विशेष्यकत्वावच्छिन्नतत्प्रकार
कत्वाभावान प्रकारक तद्भाववद्विशेष्यत्वावच्छिन्नतत्प्रकारकत्वप्रकारकता
नाभाववद्विशिष्ट तत्प्रकारकतात्वेन हेतुतापात्र वतात्पावाभ्यत्वात्· यत्त्वै
तु तद्वद्विशेष्यकत्वावच्छिन्नतद्भावप्रकारकत्वाभाववद्विशिष्ट तद्भावा
प्रकारकताभाववत्त्वेनैव तिशाब्दबोधं प्रतित्वात् अन्योन्याभावहेतुत्वक
ल्पनमेवोचितमिति वाच्यम्· तद्रूपावच्छिन्नाभावाभाववति तद्रूपावच्छिन्नाभा
व प्रकारक भिन्नप्रामाण्यग्रहस्य तद्रूपावच्छिन्नवति तद्रूपावच्छिन्नाभावप्रका
रक भिन्नप्रामाण्यग्रहस्य तद्रूपावच्छिन्नवति तद्रूपावच्छिन्नाभावाप्रकारक भि
न्नप्रामाण्यग्रहस्य च तद्भावनिश्चयप्रतिबंधकतायां निवेशनीयत्वापत्तेर्द्वि
विधाप्रामाण्यग्रहाभावनिवेशेन बाधप्रतिबंधकतायां गौरवात्· योग्यता
ज्ञानहेतुतापांच तद्भाववति तत्प्रकारकभिन्नत्वविधस्यैवाप्रामाण्यग्रहस्या
भावो निवेशनीय इति लाघवम्· किंच प्रतियोगितासंबंधावच्छिन्नप्रतियो
गिताकतद्भाववत्त्वाभावे प्रतियोगितासंबंधेन तत्प्रकारकभिन्नप्रामाण्य
ग्रहाभावस्याधिकस्य निवेशात् बाधप्रतिबंधकतायां गौरवम्· एवं शाब्दबो
धे तद्भावतद्वद्योन्याभावतद्भावव्याप्यकत्वानादीनां प्रतिबंधकतावच्छे
दनाप्रेत्तमापोग्यतानहेतुत्वमेवोचितम्· वस्तुतस्तु पयसा सिंचतीति

शाब्दसामग्रीकालेसेकः पपः करणकत्वाभाववान्निति मानसवारणाय नाद्यशाब्दमा
नसेच्छाशाब्दसामग्र्याः प्रतिबंधकत्वकल्पने गौरवम् मन्मते योग्यताज्ञानं स्वावच्छे
कतया विपरीतज्ञानोत्तरप्रत्यक्षनिर्णयं प्रति विशेषदर्शनहेतुतया विशेषद
र्शनाभावदेव मानसापत्तिः विशेषदर्शनसत्वे तु तदभावव्याप्यवत्तानिश्च
रूपप्रतिबंधकत्वेन शाब्दसामग्र्या एवाभावान्मानसेच्छापत्तेः न च निर्णयं प्रमे
व विशेषदर्शनस्य हेतुतया शाब्दसामग्रीकाले मानससंशयवारणाय शाब्दसा
मग्र्याः प्रतिबंधकत्वे कल्पनीये सत्यापत्त्यमनिवेशे वलावच्छिन्नविशेष्यकप
य. करणकत्वाभावप्रकारकमानसत्वमेव तत्प्रतिबध्यतावच्छेदकमिति वाच्य
म् लिकत्वावच्छिन्नविशेष्यकपपः करणकत्वप्रकारकमानसे शाब्दसामग्रीप्र
तिबंधकत्वांतरस्यावश्यकतया तेनैव संशयस्यापि वारणात् संशये प्रतिबं
धकत्वांतराकल्पनात् न च विपरीतज्ञानोत्तरप्रत्यक्षनिर्णये विशेषदर्श
नस्य हेतुत्वे सिद्ध एव योग्यताज्ञानहेतुत्वसिद्धिरिति वाच्यम् गुरुत्वेन शाब्दसा
मग्रीप्रतिबंधकत्वकल्पनापेक्षया तत्कल्पनाया. न्याय्यत्वादिति ध्येयं शा
ब्दप्रतांप्रति योग्यताप्रमायाः गुणत्वपाघदृशेष्यपीरितिन्यायेन योग्यताज्ञा
नस्याशाब्दसामान्ये हेतुत्वावश्यकतेत्यपाऊः शाब्दप्रमायां स्वपरसाधार
णबाधकप्रमाविरहहेतुत्वस्य तेन मुक्तत्वान्नेयं युक्तिः साधीयसीत्यप

अतएवेति. मौनीति. मौनिनो वक्तृत्वाभावेपि आनि संपपपिनत्वादितिभा
वः ननु शुकवाक्यहोधो नस्यात् शुकस्यायत्ताभावेना भिसंधायपपिन्
त्वाभावादित्यत आह शुकवाक्येष्वेति. भगवदिति. यत्र शुकवाक्याच्छाब्दबो
धस्तत्रेश्वरीमृतात्मर्पसत्तासत्तात्पर्यज्ञानस्य कारणतया मानव्यभिचा
र इति भावः सम्यपेति. अपताल्पप्रतिज्ञाने विद्यमाने. एतादृक्शं बेन. पदता
त्पर्यज्ञानविशेषेण शाब्दबोधविशेषात्वादि तिभावः तथा च न पदतात्प
र्यमासत्तिरिति भाव. तस्मादिति. अन्यविधासत्तेऽवच्छेदत्वादित्यर्थः वृ
त्याशक्तिलक्षणान्यतररूपसंबंधेन परजन्यपदार्थोपस्थितिः. सैवा
सत्तिरित्यर्थः साचेति. वृत्या परजन्यपदार्थोपस्थितिरूपासत्तिश्चेत्यर्थ
. ननु स्वरूपसत्यास्तस्या हेतुत्वं पदज्ञानसास्वरूपसतीतज्ञानमबोधोन
स्यादित्यत आह नहीति. नचेति व्यभिचारेनान्वयः घटपदादिति. प
दस्य पदार्थस्मारकत्वमेकसंबंधीतानमपरसंबंधिस्मारकमिति न्याये
न एवं च घटपदस्य ज्ञाएत्वात्समवायेनाकाशस्मारकत्वेन घटपदा
दाकाशशाब्दबोधापत्तेरित्यतिति निवेशनीयम्. तथा च समवायेनाका
शस्मारकत्वेपि शक्तिलक्षणान्यतरसंबंधेनास्मारकत्वान्नदोष इति भाव

नन्विति। घटकमकान यनानुकूलकृतिमानिति ज्ञाप्यबोधे घटकमलानुप
नकृतुपस्थितिनाकारतावावासाच्चनसंभवति। एकत्वेणैतासामसंभ
वात् इत्यर्थः असंभवे हेतुमाह आशुविनाशिनामिति। न्तापत्तएव
त्तिध्वंसप्रतियोगितामित्यर्थः क्रतिकाणां। एकाधिकरणत्वेन ध्वंसाधि
करणत्वेनान्यत्रिकानां। चेतकाशावादिति। एकत्वेन वस्तायित्वानावादित्य
र्थः आशुविनाशिनात पिज्ञानानां सहोत्पन्नानां योगपद्येन क्रमिकाणामि
ति। क्रमिकाणामपि घटपतदीनां मननाद्याशुविनाशिनामितिमिलि
तो पादाननु। क्रमिकेति। क्रतिकानिमानि पदानि तदनुचवजस्यापि
नैकसंस्काराल्लैपुंगपद्यावस्थानां स्मरणछुकामात्रा इत्यदापिनीस्य
तौसत्यां ज्ञाप्यबोधः संभवतीत्यादिभावः तथाच सर्वत्र समूहालंब
नात्मकपदज्ञानपर्यंतोपि स्थितावेवज्ञाप्यबोध इतिभाव। ननु घटगोच
रसंस्कारात्परस्मरणानुदयेन समानविषयकसंस्कारस्य समानविष
यकस्मृतिहेतुतया कथं नानापदगोचरैः प्रत्येकसंस्कारैर्भिन्नविषयकं
नामपदगोचरमेकं स्मरणमत आह संक्षेपइति। भिन्नविषयकतांशे
संस्कारः कारणं नेत्येवं संस्कारैर्ननुनानापदानां स्मरणं भिन्नविषयकमेव १३०

नतापत्तेरिति। यथा घटपटयत्तु। संयोगसत्वे समूहालंबनमेकं प्रत्यक्षमि
ति भावः अतएव कृत्यापदजन्यपदार्थोपस्थितिगासत्तिलादिवित्यर्थः॥ न
नीपांतेति। अव्यवधानेनेत्यस्य वैरर्थ्यादित्यर्थः ननु गिरिर्भुक्तमग्निमा
न् देवदत्तेनेत्यत्र तदारणाय मेव तादृत्वत आह अव्यवहितेति। काष्टे त्वा
त्यामोदनं पचतीत्यादौ व्यवहितक्रमिकपदार्थापानोपस्थितौ। एकस्याउपस्थि
ते क्रमिकपदार्थोपिस्थितेर्न इत्यादित्यर्थः अव्यवधानस्य चेद घटितत्वेऽव्य
वधानेन क्रमिकपदार्थोपस्थितौ नाऽसंसर्वासामेकदासंभवेन समूहालंब
नस्मृतेरेवकारणत्वं वाच्यं इत्थंच नष्ट साधिकरणध्वंसानधिकरणत्वेसति
तदधिकरणत्वेन ध्वंसाधिकरणक्षणोत्पत्तिकालरूपत्वेद घटितायवधा
नीयमा ननिवेशे संभवात्तद्व साधिकरणध्वंसानधिकरणत्वेन ध्वंसाधिकरणक्ष न्यति
सए णिकत्वरूपत्वेदाच्चेद साधारणाव्यवधानमेवनिवेशनीयम्। तथाच तदुपा
दाने पि गिरिर्भुक्तमित्यादौ समूहालंबनात्मकस्मृतिमादायाव्यवधानसंभ
वाद् व्यवधानोज्ञाप्यर्थएव। गिरिर्भुक्तमित्यादौ अन्वयबोधानापत्यर्थाचिंता
सर्पतान विरहेणैवोपपन्न इतिभावः आसत्तिनिरूप्यतात्पर्यं निरूपयति
तात्पर्यंचेति। अर्थतात्पर्यं चेत्यर्थः एकस्मिन्निति। इदं पदमेकस्मिन्धर्मिण्यन्न

परपदार्थस्यान्वयं प्रत्याययतु॰ बोधयत्विति प्रयोक्तुरिच्छेत्यर्थः अभिसंधायापि
नमात्रमिति॰ एकपदार्थवदपरपदार्थज्ञानवन्मात्रमित्यर्थः ननु वक्त्रैव॰ ननु
शुकोच्चारितैव॰ मौनीति॰ तत्र शुकोच्चारणभावेन तात्पर्याभावप्रसंगादित्य
र्थः नन्वेवं शुकवाक्ये शुकस्यापि ज्ञानाभावेनाभिसंधायपितुरभावात्तात्प
र्याभावप्रसंग इत्यत आह॰ शुकवाक्ये चेति॰ भगवदिच्छैव ईश्वरेच्छैवेतीत्य
र्थः न चान्यत्रापीश्वरतात्पर्यसत्त्वान्न दोष इति वाच्यं॰ तस्य चेति॰ तात्पर्यस्येत्य
र्थः अस्तीति तात्पर्यस्य संज्ञाये व्यतिरेके निश्चये चान्वयबोधादित्यर्थः यत्सं
शयव्यतिरेकनिश्चयौ यत्र प्रतिबंधकौ तन्निश्चयस्तत्र हेतुरिति नियमवजादि
त्यर्थः तदुमे चेति॰ तात्पर्यभ्रमे च॰ भ्रमप्रमासाधारणतन्निश्चयो हेतुरित्यर्थः स
न्धेय इति॰ अयमेति पुत्रो राज्ञः पुरुषोपसार्यतामित्यादौ राजपुत्रसंसर्गप्रतीति
च्छया इति॰ राज्ञ इत्यस्य पुरुषपदेन साकांक्षत्ववारणाय यत्पदं यत्पदव्यतिरेकेण
तात्पर्यविषयीभूतार्थान्वयानुभावकं तत्तदन्यपदेन साकांक्षमिति तात्पर्यग
र्भाकांक्षा तान कारणत्वात् तद्घटकतया आकांक्षाघटकतयैव तात्पर्यज्ञानं हेतुर्न
तु स्वातंत्र्येणेत्याह॰ सोपमिति॰ आकांक्षादिसहकृतदृष्टत्यर्थः तत्र तयोः विध्यर्थ
वादयोर्मध्ये॰ विध्यभिधायकेति॰ अभिधायकप्रत्ययत्वं सुवादावति व्याप्तमतः
विधीति॰ विधि॰ विध्यर्थ॰ विधिशब्दस्य विधिप्रत्यये विध्यर्थे च प्रयोगदर्शनात्

अत एव अथ स्वर्गकामो यजेतेत्यादौ इष्टसाधनत्वं कार्यत्वं वा यद्विधिः स च प्र
त्यारूढक्रियान्वयी तद्व्यान्वयीति मणिकृतः॰ कार्यत्वं वा यद्विधिरित्यु
क्तम्॰ तथा च विशेषाभिधायकः प्रत्ययः विधिप्रत्यय इत्यर्थः स च लिङ् लोट्
तव्य पंचमलकाररूपवचनरूप इति॰ ननु यजाघसमभिव्याहृते लिङ्पदे वि
धित्वेनाव्यवहार इत्यत आह॰ तद्घटितमिति॰ तद्घटितं॰ विध्यभिधायकप्र
त्ययघटितं वाक्यमित्यर्थः तच्च स्वर्गकामो यजेतेत्यादि किं ननु कस्तावत् विध्य
र्थः तत्राभिधेव लिङर्थः सैव च प्रवृत्तिहेतुरिति तदाक्षेपाचापसीमाशयः
करणस्य परनिष्ठव्यापारजनकत्वं स्वनिष्ठव्यापारद्वारेति नियमः तथा घ
टं प्रति करणस्य दंडादेः चक्रनिष्ठभ्रमिरूपव्यापारजनकत्वं स्वनिष्ठसंयो
गद्वारा॰ व्यापारेण व्यापारजननीयं स्वनिष्ठव्यापारांतरापेक्षणेन वक्त
पत्त्या व्यभिचारणापकरणस्येति॰ अभिधारूपव्यापारसिद्धये स्वनिष्ठेति॰ अ
न्यथेष्टसाधनताज्ञानादिरूपव्यापारमादाय सिद्धसाधनापत्तेः॰ तथा च विधे
प्रवर्तकतया परनिष्ठप्रवृत्तिरूपस्वर्गादिफलजनकव्यापारजनकत्वं स्वनि
ष्ठव्यापारद्वारेति॰ लिङ्समवेतो लिङ्जन्य अभिधारूपव्यापारः स्वीकरणी
य॰ मद्दमतेशाब्दस्य इष्टसाधनत्वं तस्य समवायिकारणत्वाविरोधात् तन्मते

भावना द्विविधा· शाब्दी आर्थी च· तत्र येयं शब्दत्वात् शाब्दी भावनेत्युच्यते· अन्या
चार्थी अपो भागादिलक्षणविषयिणी प्रवृत्तिरूपा· तदुक्तं अभिधाभावनामाहुरन्या
मेव लिङादयः· अर्थात्मा भावना त्वन्या सर्वाख्यातस्य गोचर इति· आर्थीभाव
नाच कर्मकरणानि इतिकर्त्तव्यतां चापेक्षते इति अंशत्रयवती· तथाच स्वर्ग
कार्मिका यागकरणिका प्रयाजादीतिकर्त्तव्यताका चार्थीभावनेयमपि चा
भावनात्वेन किं केन कथं मित्यंशत्रयवती· किं भावयति केन भावयति कथंभावं
सहकारिणी आसाद्य भावयतीति तदर्थात्· तथाचोक्तम्· लिङोभिधा सैव च से
शब्दभावना भाव्या च तस्याः पुरुषप्रवृत्तिः संबंधबोधः करणं तदीय
प्ररोचना चांगतयोपयुज्यते इति· संबंधबोध· लिङ्पदे शक्तिग्रहः प्ररोच
ना· स्तुत्यर्थवादः अंगतया सहकारितयोपयुज्यते तत्र चाभिधात्वरूपस
तो अभिधात्वेन ज्ञानाद्वा न प्रवृत्तिरिति· प्रवर्त्तनात्वेन तज्ज्ञानं कारणम्
·प्रवर्त्तनात्वं च प्रवृत्तिजनकत्वं· यजादिपदसमभिव्याहारेण च यागवि
षयकप्रवृत्तिजनकत्वं प्रागभावम्· तच्च समानसंवित्संवेद्यतया यागेष्ट
साधनताबोधोपि· इष्टसाधनताज्ञानं विना प्रवृत्तिजनकत्वं दृष्ट
मिति भावनात्वेन तज्ज्ञानं कारणं भावनात्वं च भाव्यजनकत्वभाव्यत्वं चे

ष्टत्वं· एवमभिधात्वेनापि तज्ज्ञानं कारणम्· अन्यथाभिमितावच्छेदकाप
रिचयेन सधर्मितावच्छेदकबोधानुपपत्तेः· तथाच गुरुमते विध्यर्थका
र्य्यविशिष्टको बोधः· भट्टमते तु यागविषयकप्रवृत्तिजनिकाभिधा स्वर्ग
जनिकाभिधात्वतानानुकूला प्रवर्त्तनात्वतानानुकूलाभावनात्वता
नानुकूलाभिधीयतेऽनुकूलावेति शाब्दिकवत् स्पष्टम्· अभिधातानं वैदिक
प्रवृत्तिप्रतिहेतुः लौकिकप्रवृत्तिप्रति तु इष्टसाधनताज्ञानं हेतुरिति
बोध्यम्· वस्तुतस्तु· प्रवृत्तिर्द्विविधा स्वरसवाहिनीः पराधीना च· तत्रप
राधीनप्रवृत्तौ प्रवर्त्तनाज्ञानं हेतु· अतएव राजाज्ञया पितुः शिरश्छेदादौ प्र
वर्त्तते· शास्त्रप्रवर्त्तना वाचा यदि· प्रवर्त्तकत्वम्· आचार्यप्रेरितोहं गामार
यामि न तु स्वेच्छयेत्यनुभवात्· आचार्यादिप्रवसाक्षान्न प्रवर्त्तकत्वं किंतु ज्ञा
नेन प्रभूतेनाज्ञापयति· तादिच्छा तु त्यागेत्यनुभवसिद्धम्· प्रवर्त्तनाच
प्रवृत्तिप्रयोजक· प्रवर्त्तनापि तु व्यापारः स चचेतनस्वेच्छारूपः अहमेवं
प्रवर्त्तयामीत्यनुभवसिद्धिः अचेतनस्य शास्त्रादेस्तु पदार्थान्तरमभि
धाभावनाद्विमपरे रूपः संबंधलिङ्· ध· तथाच विधिः राजेव मां प्रवर्त्त
यति प्रवर्त्तनाज्ञापकोन यागादौ पुरुषं प्रवर्त्तयतीतिज्रहमतनिरुक्तं·त

नरसत्त्वमात्मनः प्रवृत्तिसामान्ये इष्टसाधनताज्ञानहेतुत्वेनोपपन्नौ प्रवर्त्तनाज्ञा
नस्य हेतुत्वे मानाभावात् । रागात्तथा पितुः निरुक्तदोषप्रवृत्तिरपि स्वीकृतं प्रतिसंधा
येव नहि प्रयोजनमनुद्दिश्य मन्दोपि प्रवर्त्तते इति । एवमभिधायामिष्टसाधन
त्वज्ञाने प्रयोग इष्टसाधनत्वज्ञाने प्रवृत्तिः अभिधायामिष्टसाधनत्वं प्रयोग इष्ट
साधनत्वं विनानुपपन्नमिति प्रयोग इष्टसाधनताज्ञानस्यावश्यकत्वे कृत्यभि
धायांज्ञानहेतुतया नच करणस्येत्यादि नियमादभिधासिद्धिः अप्रयोजकत्वा
त् । अनुमितिकरणव्याप्तिज्ञानादौ व्यभिचाराच्चेति नाभिधासिद्धिः यइत्यतः प्रा
भाकरमतं दूषयति । अभिधेयविधिश्चेति । प्रतिपाद्यरूपो विधिः विध्यर्थ
इति यावत् । प्रागभावं प्रतियोगित्वरूपं कार्य्यत्वं न प्रवर्त्तकज्ञानप्रकार इत्यत
आह । तच्चेति । कार्य्यत्वं चेत्यर्थः शंकते । किमत्रेति । अत्र कृतिसाध्यत्वस्य विध्य
र्थत्वे । अतं समर्थपस्य बुद्धि पद्धि च पिण्णी बुद्धिः स्यादिति । प्रवृत्तिजनकज्ञान
कज्ञानप्रकारं इत्यर्थः विधेरभिधेयः विधेः प्रतिपाद्यः तज्ज्ञानमीचेति । कृति
साध्यत्वप्रकारिके ज्ञानजनकत्वे स्यपः ननु नादृशीज्ञानत्वेनैव कारणत्वमा
स्तामित्यत आह कृत्यसाध्यत्वेति । तदनुपपन्ने । कृतिसाध्यत्वप्रकारकज्ञानु
मितिलिप्सः ननु नियतपूर्ववर्त्तित्वेन कृत्रताचकृत्यसाध्यत्वेति । वै॰ उवदनु १३३

ज्ञानाभाव एव हेतुः ननु कृतिसाध्यताज्ञानं तत्र नियमान्यथासिद्धत्वयोर्द्वयोः
कल्पनत्वे गौरवादत आह । नीति । ननु कृत्यसाध्यत्वज्ञानाभावः हेतुरिति शी
घः गौरवादिति । कृत्यसाध्यत्वप्रकारकज्ञानाभावत्वेन कारणत्वे गौरवात् । ला
घवात् कृतिसाध्यत्वप्रकारकज्ञानत्वेनैव नियमान्यथासिद्धत्वयोः कल्प
नादित्यर्थः ननु कृतिसाध्यतानिश्चयत्वेन कारणत्वमपेक्ष्य लाघवेन कृत्य
साध्यत्वप्रकारकज्ञानाभावत्वेनैव हेतुत्वमित्यत्रेत्वाह । निश्चयत्वेन हेतुत्वे तं श
यनिश्चयसाधारणप्रामाण्यज्ञानस्यैवोत्तेजकत्वं कृत्यसाध्यताज्ञानत्वेन
प्रतिबंधकत्वे चाप्रामाण्यनिश्चयस्योत्तेजकत्वमिति गौरवात् । अप्रामाण्य
ज्ञाने प्रामाण्यज्ञानस्यैवोत्तेजकत्वानभ्युपगमात् । एतेनाप्रामाण्यनिश्चय
स्य तत्रोत्तेजकत्वे तत्राप्रामाण्योपाज्ञानसामान्यस्य अप्रामाण्यज्ञानस्योत्तेज
कत्वे च तत्राप्रामाण्यनिश्चयस्योत्तेजकत्वमिति विपरीतगौरवमिति परा
स्तम् । वस्तुतस्तु । कृत्यसाध्यताज्ञानप्रतिबंधकत्वे कृतिसाध्यत्वाभावकृ
तिसाध्यत्वेतरत्वव्याप्यतदवच्छेदकधर्मदर्शनानां प्रतिबंधकतापेक्षया
कृतिसाध्यताज्ञानत्वेनैव हेतुत्वमुचितमिति । ननु तायमानेऽण्वादौ
महत्त्वस्य तिन्नेकारणत्वं नस्यात्तत्रापन्नेदमहत्त्वस्य कारणत्वे लाघवा

तस्य हि त्विनियतपूर्ववर्तित्वेन कृतित्वात्तद्धेतोरिति भावेन कारणत्वप्रकृते
पितुल्यमित्यत आह इति॰ तज्ज्ञत्वात् कृतिसाध्यताज्ञानाभावसत्त्वात्॰ ननु त्र
वन्मते संवादिभेदाग्रहसत्त्वात्संवादविसंवादिप्रवृत्त्यापत्तिः॰ परस्त्वितापमा
ने पुत्रेदाग्रहत्वेन कारणत्वं तदा भ्रमापितामानकृतिसाध्यत्वाभाववत्ताना
भावकारणत्वमपि सुवचमत आह असदिति॰ तन्मते त्वन्यथाख्यात्यनावि
नइष्टाचेदग्रहइष्टाभेदाग्रहयोर्युगपदुपस्थित्यभावेन भेदाग्रह एव विसं
वादिप्रवृत्तिहेतु॰ अत्र तु कृतिसाध्यताज्ञानकृतिसाध्यताज्ञानाभावयोर्युग
पदुपस्थित्याजागरूकृतिसाध्यताज्ञानत्वेनैव प्रवृत्तिहेतुत्वमिति भाव
ः केचित्तु॰ साक्षाद्विरोधिज्ञानस्य प्रतिबंधकत्वं जनकज्ञानविघटकत्वेनैवे
ति नियमान्न कृतिसाध्यताज्ञानस्य साक्षाद्विरोधिनः चिकीर्षाकारणकृति
साध्यताविघटकत्वेनैव प्रतिबंधकत्वमिति साध्यताज्ञानं हेतुरिति॰ ननु बा
धादिकारणाय साक्षाद्विरोधित्वं विज्ञानाणं तद्यथ्याहाज्ञावत थाप्याध
नवगाहित्वं॰ तस्य प्रकृतेप्यसिद्धे चिकीर्षाविषयकृतिसाध्यत्वाभावावगाहि
त्वान्न कृतिसाध्यताज्ञानस्य॰ परदिव्यकारणीभूताभावप्रतियोगित्वरूपं प्रति
बंधकत्वघटकं तदापि कृतिसाध्यताज्ञानस्य साक्षाद्विरोधितोपगमेन सा १३४

क्षाद्विरोधित्वासिद्धेरिति कथमिति न तत्सूक्ष्मन्ते साक्षाद्विरोधिनं प्रतियन्प्रतिबंधकं भ
वतिन्तज्जनकज्ञानविघटकं सदेव प्रतिबंधकं भवतीति नियमः साक्षाद्विरोधित्वं
वत द्विषद्विरोध्यवगाहित्वानभिन्नत्वं तेन न सत्प्रतिपक्षादौ व्यभिचारः चिकीर्षा
न भिन्नत्वादेव साक्षाद्विरोधित्वानीति तज्जनकज्ञानविघटकत्वेनैव तानस्य प्रति
बंधकत्वमिति॰ गुरुमते सिद्धेरनुमितिप्रतिबंधकत्वाभावान्न तत्र व्यभिचारः सिद्ध
त्वतानस्येच्छाप्रतिबंधकत्वेपि तद्घातस्य प्रतिबंधकता निर्बंधानीयाः असिद्धत्व
तपमेव वारितु॰ असाधुत्वतानस्य शाब्दबोधप्रतिबंधकत्वमानाभावः नचावि
संवादिप्रवृत्तौ तन्मते इष्टाभेदाग्रहहेतुत्वेन तत्र व्यभिचार इति वाच्यं॰ संवादित्व
विशेषणेन न कारणान्तर॰ संवादिप्रवृत्तौ तु तन्मते पि विशिष्टज्ञानं हेतुरिति न व्या
पिव्यभिचार इत्याहुः तत्र साक्षाद्विरोधिनो ज्ञानस्य प्रतिबंधकत्वं जनकज्ञानवि
घटत्वेनैवेत्येव नियमस्य तेनाभ्युपेयत्वात्॰ साक्षाद्विरोधिनं प्रतियन्प्रतिबंध
कं भवति तज्जनकज्ञानविघटकत्वेनैवेति नियमाद्रस साक्षाद्विरोधित्वश
रीरे च ज्ञानभिन्नत्वमज्ञानेतिनिवेशपकृतिसाध्यताज्ञानहेतुतासाधनस्य च
पपनिर्णयितापत्तिरिति ध्येयम्॰ ननु कृतिसाध्यताज्ञानं चिकीर्षाद्धेतुरि
ति सिद्धम्॰ एवं बलवज्जीवनयोनियत्नसाध्ये प्राणपंचकसंचारे प्रवृत्त्यापत्तिः अ

पादृष्टवदात्मसंयोगेनैव प्राणपंचकसंचारोपपत्तेर्जीवनयोनियत्ने मानाभावा
न्नच जन्त्वा वायुपूरणे दृष्टं तेन वायुपूरणत्वेन यत्नजन्यत्वानुमानात्तत्सि
त्सिद्धिरिति वाच्यम्। वायवा पूरणे व्यभिचारात्। नच तस्यापीश्वरयत्नजन्य
त्वान्न व्यभिचार इति वाच्यम्। प्रकृतेपि तेनैवार्थान्तरात्। जन्यत्वविशेषणेपि वायु
वायुपूरणेऽव्यभिचारात्। परन्तु तामाधिष्ठानां श्वाससाधारणेश्वासक्रियानुकूलः
सर्वसिद्धः जीवनादृष्टस्य च तदापि सत्त्वेन तदनुत्पत्तौ जीवनयोनियत्नव्यतिरेका
दिति। तन्न। तदानीं जीवनयोनियत्नानुत्पत्तिः यत्र युक्ता तत एव श्वासक्रियावि
रहोपपत्तेरिति चैवम्। धावतः प्रयत्नोत्कर्षेण श्वासक्रियोत्कर्षदर्शनात् श्वा
सक्रियात्वावच्छिन्ने एव प्रयत्नजन्यत्वनिश्चयात्। यदि चेत्थोयोः कायविकारेण भा
वोस्ति बाधके तन्नमानमपीति न्यायात् जीवनयोनियत्नसिद्धेः। नच वि
षमन्नहरणव्यावृत्तविषयत्वविशेषेण वृत्तप्रतिसंधानजन्यकृत्यजनितानस्यावह
तुत्वानदृष्टवादिवत् प्राणपंचकसंचारे प्रवृत्तिरिति वाच्यं अहं कृतिसाध्यप्रा
णपंचकसंचारी जीवत्वात्। प्राणपंचकसंचारिमत्कृतिसाध्यः मत्कृतिं विनास्य
त्वे सति मदिष्टसाधनत्वादिति चेत्तच्चन्नवारितिः उच्यते। चिकीर्षाधानकृति
साध्यतातानत्वेन प्रवृत्तिकारणत्वात्। ननु तथापि भोजनादौ चिकीर्षाधानकृति १३५

साध्यत्वेनानन्तरीयकश्रमे प्रवृत्तिप्रसंगः। अत्र कश्चित्। चिकीर्षाधानकृति
त्वेन तत्र श्रमजनककण्टकद्वेषयोनिप्रकारविषयो मौनत्वेन तेरित्याह। तन्न। शत्रुवधप्र
वृत्तौ प्रतियोगिनि शत्रौ द्वेषाकरणमितीति दृष्टवन्तम्। तस्यजिन्नविषयकत
या शत्रुवधप्रवृत्तावहेतुत्वात्। किंतु शत्रुवधस्येष्टसाधनत्वेन तदिच्छाया
एव तत्र हेतुत्वात्। नचैवं शत्रुनिवृत्तौ शत्रुद्वेषस्य समानविषयकत्वेन हेतु
त्वप्रसंग इति वाच्यम्। इष्टत्वात्। द्वेषयोनिनिवृत्तिस्तु नश्रमोत्पत्तिसंभाव
नापि। व्याघ्रादिसमीपवर्तिदेशादेव निवृत्तेः तत्र तद्देशावर्जनरूपेण साध
नतातानात्पलायनप्रवृत्त्यैव श्रमसंभवात्। नच प्रवृत्त्यभाव एव निवृत्ति
रिति वाच्यम्। निवृत्त्यभाव एव प्रवृत्तिरित्यस्यापि सुवचत्वात्। नच प्रवृत्त्य
भावकाले कदाचिन्निवृत्तत्वव्यवहारात् प्रवृत्त्यभाव एव निवृत्तिरिति वाच्यम्
निवृत्तेर्द्वेषसमानविषयत्वस्यानुभवसिद्धत्वात्। अपनिवृत्ताख्यमत्र
स्वीकारे विषयजेदेन प्रवृत्तियौगपद्यापत्तिरिति चेन्न। इष्टानिष्टसाधन
समूहालंबनसंजिनीपरामर्शद्वेषयोरेकदासंभवेन तदसंभवात्। नच
यत्रापेक्षानुत्पत्त्यमकतत्क्षणअनंतरं फलेच्छापूजादेषो न मतः यापेक्षा
ऽस्तु कामादौ तथात्रानन्तरमस्तीति वाच्यम्। उपायेच्छाकाल एवापेक्षानुदयाच्च

मद्रुपारात्प्रमत्वस्य साक्षात्प्रवृत्तिहेतुतया तत्स्वाभाव्यात्। तानि च द्विधा एणांपौरा
पर्यानाशात्। एवं प्रपञ्चयोगपद्यत्वेऽपि चेत् इयत्तु तीरत्वाशाखा। विज्ञातं
तुल्यवच्छेदेन विजातीयप्रदेशानुरोधेन विजातीयविज्ञानिप्रपञ्चानां युगपदु
त्पादनात्। अन्यथा समवायेन विजातीयेतरदेशप्रत्यवच्छेदकतासंबंधेन कृ
तेर्हेतुतया एवांगुल्यामिव परत्रापि तस्या एव कृतेरवच्छेदकतया सत्वात् वि
जातीयेच्छेणया एवांगुल्यंतरव्यापत्तेः। नानाकृतिस्वीकारे तु एतत्कृतेरवच्छे
दकतया गुल्यंतरे सत्वादेव तत्र विजातीयैतच्छेणापत्तिः। न तु समवायेन वि
जातीयैतच्छेणां प्रतीत्वीय विजातीयैतच्छेणावृत्तिसाध्यत्वाख्यविषयतानि
रूपितसिद्धत्वाख्यविषयतासंबंधेन कृतिर्हेतुरिति एककृतिस्वीकारेनानु
पपत्तिः एकस्या एव कृते विजातीयैतच्छेणावृत्तिसाध्यत्वाख्यविषयतानिरूपि
तसिद्धत्वाख्यविषयतया अंगुल्यंतरेत्वाभावात्। अथ यद्यपुरुषांतरस्यतत
दंगुल्यां विजातीयचेष्टासाध्यकाकृतिरुत्पन्ना तदा एतत्पुरुषकर्पं तस्यांगु
ल्यवच्छेदेन विजातीयचेष्टोत्पद्यते इत्यतत्पुरुषीयत्वं निवेश्यकार्यकारण
भावकल्पने गौरवं। नानाकृतिस्वीकारे तु अवच्छेदकतया पुरुषांतरीयकृते
रेव तत्पुरुषीयांगुल्यामसत्वादेव न तदापत्तिरिति चेन्न। अवच्छेदकतानां ह १३६

शविषयतोभयसंबंधेन कृतेर्हेतुतयाश्रयापि तत्पुरुषीयत्वानिवेशात्। न
चकार्यतेतु अनंतवैजात्यकार्यतेऽनतदवच्छिन्नविषयकल्पनेच गौरवमिति
नानाकृतिस्वीकारो निरर्थक इति। मैवं। अवच्छेदकतादृशविषयतोभयसंबंधे
नकृतिहेतुत्वे उभयत्वस्यापेक्षाबुद्धिविशेषविषयत्वरूपस्य दुर्वचतया ए
कविशिष्टापरत्वरूपस्य विनिगमनाविरहग्रस्ततया गौरवेण तादृशविष
यतासंबंधेनैव कारणताबाध्या। तथा च तत्पुरुषीयत्वनिवेशो गौरवादव
च्छेदकतासंबंधेनैव कृतेर्हेतुतेति एककृतिस्वीकारे विजातीयचेष्टाया अ
नुपपत्या नानाकृतिस्वीकार आवश्यक इति दिक्। अन्ये तु। स्वचिकीर्षाधीनकृतिसा
ध्यतातान्त्वेन कृतिकारणत्वात् अस्मेस्वचिकीर्षाधीनकृतिसाध्यतातानाभावादेवा
प्रवृत्तिः अत एवान्येच्छाधीनेच्छाविषयत्वादेर्भ्रमोनांतरीयकत्वमुच्यते। ननु प्रा
णपंचकसंचारेऽप्येवं प्रवृत्तिवारणाय स्वचिकीर्षाधीनकृतिसाध्यतात्वेन
कारणत्वेनुक्तं। तदयुक्तं। प्राणपंचकसंचारादेः प्रवृत्तिस्वरूपायोग्यतयैव त
त्र प्रवृत्तिवारणात् किं स्वचिकीर्षाधीनत्वविशेषणेन। अन्यथा वस्तुगत्या चि
कीर्षाधीनयाकृतिसाध्यतामात्प्राणसंचारे प्रवृत्तेर्वक्तव्यत्वात्।
तथा च प्रवृत्तिस्वरूपयोग्यत्वतावच्छेदककारणतया प्रवृत्तिस्वरूपायोग्यत्वा

वृत्त विशेष्यतासम्बन्धेन कृतिसाध्यताज्ञानत्वेन कारणतयैवोपपत्तौ न तद्वि
शेषणमिति । अत्रेदं बोध्यम् । स्वेच्छाधीनत्वं न ज्ञानं तन्त्रमपि तु वस्तुगत्या स्वेच्छा
धीनापादककृतिसाध्यताज्ञानं कारणमिति प्राणपञ्चकसंचारे वस्तुगत्या स्वेच्छा
धीनत्वेऽप्रसिद्धतया कथं भ्रममारणापातिप्रसंगः कारणप्रवृत्तिस्वरूपयो
ग्यत्वज्ञानस्य प्रवृत्तिस्वरूपायोग्यव्यावृत्तविशेष्यताप्रत्यासत्त्या कृतिसाध्यताज्ञा
नस्य कारणतावच्छेदकतया तद्विशेषणानुपादानमिति । न च तथापि सुखेष्ट
मादाय सुखे प्रवृत्तिप्रसंग इति तथाज्ञानकारणत्वमावश्यकमिति वाच्यम् । फ
लेच्छाया अप्रवर्त्तकत्वात् । तथापि स्वचिकीर्षाधीनत्वस्य विवक्षणान्नु सुखचिकीर्षा
त्वेन तु न प्रवर्त्तकत्वमिति । वस्तुतस्तु । प्रवृत्तिस्वरूपायोग्यव्यावृत्तविशेष्यताप्र
त्यासत्त्या कृतिसाध्यताज्ञानत्वमात्रेण कारणत्वे घटादौ जीवनयोनियत्नसाध्य
ताभ्रमकाले प्रवृत्त्यापत्तिः कारणस्य चिकीर्षाधीनकृतिसाध्यताज्ञानत्वेन हे
तुतायाश्च आवश्यकतया चिकीर्षाधीनत्वविशेषणमावश्यकमेवेति । एतेन
प्रवृत्तिस्वरूपयोग्यताज्ञानं कारणमिति प्रवृत्तिस्वरूपायोग्यव्यावृत्तविशेष्य
तासत्त्या कृतिसाध्यताज्ञानं कारणमिति वा न ब्रूमः किंतु कृप्तेनैव प्राणपञ्चक
संचारेन प्रवृत्तिरिति । तथाहि । घटो घट इति तद्व्यक्तित्वावच्छेदकतद्विधेयक

शिष्यशाघः तेन रज्जुत्वकावगमादापदोष । लिंगोपहितलैंगिकभानोपगमे
तु यथापाकृतेपि न दोष इति । सामान्येचेति । प्रवृत्तिसामान्ये चेत्यर्थः । पक्षे षष्ठी
:का यथाकारणत्वावेसति बाधकेनसामान्यपरत्वे नित्यायादिति भावः । नाकस्वि
ति । मंडलीकरणे प्रवृत्त्यतिप्रसंगरूपो दोषो नेत्यर्थः । प्रवृत्तित्वावच्छिन्नं प्रतिका
र्यताज्ञानत्वेनैव हेतुता । काम्यगोचरप्रवृत्तिं प्रति इष्टसाधनताज्ञानकृति
साध्यताज्ञानत्वेन । दिग्गोचरप्रवृत्तिं प्रति च शोका दिग्न्यापतिसंधानजन
कार्यताज्ञानत्वे हेतुतया विशेषणसामग्रीसहकृतायाएव सामान्यसाध्य
त्वा: फलोन्मादकतया विशेषणसामग्रीविरहादेव मंडलीकरणादौ न प्रवृत्त्या
पत्तिरिति भावः । पाको मत्कृतिः साध्यः मत्कृतिं विना विनाशत्वे सति मदि
ष्टसाधनत्वादिति वाक्यानुमानं । तच्चेत्रेष्यमेव प्रवृत्तिवारणाय स्वेच्छाधीन
कृतिसाध्यताज्ञानस्यैव वर्त्तकत्वपास्वेच्छाधीनमत्कृतिसाध्यत्वमेव साध्यं
। हेतुरपि इच्छाधीनमत्कृतिं विनाऽसत्त्वे सति मदिष्टसाधनत्वादिति । तेन प्रा
णपञ्चकसंचारं न प्रवृत्तिवारः । मदिष्टसाधनत्वमात्रस्य हेतौ वप्रौ व्यभि
चार इति सत्यंतः । मदिष्टसाधने परकृतसाधके व्यभिचारवारणाय मत्कृति विने
त्यत्र मत्पदं । श्रमे व्यभिचारवारणाय विशेष्यदले निविष्टश्रमस्यापि मदा

यत्राग्नी रिष्टसाधनत्वाद्यनित्वप्रसङ्गात्. न हि दृष्टिस्तत्र मत्पदम्. अथ यमदि
ष्टसाधनेनांतरा पश्चिमजसंयोगेऽप्यतिचारः अमवत्तस्यापि तेनैवानतिप्र
संगात् न हि दृष्टस्य वैमत्यमिति चेन्न. कार्यत्वजातावनपायेपर्याभावात्
तस्य हेतुत्वं तरत्वादिति. अथात्र सिद्धपाकस्य बलामान्यजन्यत्वाननुगमकारा
न्नानासंभवइति चेन्न. पक्षधर्मतातानस्य समानप्रकारकत्वेनैवानुमि
तिहेतुतया पक्षतावच्छेदकपाकत्वप्रकारकसिद्धपाकविशेष्यकज्ञाना
दसिद्धपाकविषयकानुमितेः संभवात्. तदुक्तं मणिकृता. पाकेकृति
साध्यत्वं सिध्यत् सिद्धे बाधात् अनागतं पाकमादाय सिध्यति पक्षताव
च्छेदकसामानाधिकरण्येन साध्यज्ञानस्य सिध्यत्यनुमानेकृमत्वादिति.
ननु आवियौ वरात्मेप्रवृत्तिकारणं ये दानीं तन मरुत्कृतिसाध्यताज्ञानस्यैव
प्रवर्तकतया इदानींतनमत्कृतिसाध्यत्वमेव साध्यं हेतुरपि चेदानींत्वघटि
तः सतु सिद्धपाके संभवीः असिद्धस्य चानागतानां पक्षधर्मताज्ञानं तु नियमिति
चेन्न. स्वसमानाधिकरणपाकत्वरूपपरंपरासंबंधेन सिद्धपाकेऽपि हेतु
मत्ताज्ञानसंभवात्. न च द्रव्यत्वेन पर्वतेव क्रिव्याप्यवत्ताज्ञानानां द्रव्यत्वे
न ह्रूरपस्यानुमित्यापत्तिः अन्यथाख्यातापत्त्या इष्टापत्तेर्योगादिति वाच्य

ग्राह्यबोधकारणाप्रनिवर्तकत्वमाननिति तद्भाववधर्मितावच्छेदकत्वनम्रमावृत्ति
प्रकारताकानुमितिं कारणपक्षतद्भिन्नवृत्तिविषयतासंबंधेन तानप्र
तितद्भेदत्वेन हेतुता वाच्या. तत्र च कार्यतावच्छेदके तानत्वमनिवेश्य तद्भि
न्नवृत्तिविषयतासंबंधेन गुणत्वावच्छिन्नं प्रत्येकहेतुत्वमुपेयते. एवं च प्र
वृत्तिजनकगुणः प्राणपंचकसंचारभिन्नएवनापतेरेवेति प्राणपंचक
संचारभिन्नवृत्तिविषयतासंबंधेन प्रवृत्तौ प्राणपंचकसंचारभेदएव हेतु
रिति नातिरिक्तकारणताकल्पनमिति चिकीर्षाधीनत्वविशेषणमफलं
मिति निरस्तं. तावतापि घटादौ जीवनयोनिकृतिसाध्यताज्ञानमादाय प्रव
त्तिवारणमचिकीर्षाधीनत्वविशेषणाव्यवच्छेदकत्वादिति किं न त्वेवमिति. ए
वं कृतिसाध्यत्वमात्रस्य विधिप्रत्ययार्थत्वे. ज्ञानं तदिति बाधे रिक्तमपि मंडजा
करणंकलंभांतास्त्रियपतेतस्य च यावच्चेष्टां न कुर्वीत न विप्रः सर्वणि कोव
वेदित्वा दिनावेदनिषेधाद्विनिष्टकंजनकत्वेन तत्र बलवदनिष्टजनकता
नकानेकालिकानामपि प्रवृत्तिप्रसंगः प्रवर्तकस्य. कृतिसाध्यताज्ञान
स्य सत्त्वादिति यथाप्रेति. तथा च बलवदनिष्टाननुबंधित्वे सति कृतिसा
ध्यताज्ञानं विध्यर्थ इति भावः इष्टमपि तिबलवदनिष्टाननुबंधीत्वे सति

स्वतिसाध्यानीतानस्य प्रवर्त्तकत्वं तथा च जयदेवनिरूपितजनकतावच्छेदकतानकाले प्रवृत्तिवा
रणीपीलर्थः नन्वमंडजीकरणी॰ प्रवृत्तिजनकेति॰ वचनविज्ञानानुबंधिकृति
साध्यताज्ञानात्सत्वादित्यर्थः॰ आचार्यमतेइष्टसाधनत्वमपि विध्यर्थइव
सिद्धं॰ अतएवतैः निमापूर्वीनिषेधापूर्वकत्वं पर्वंतत्र पूर्वमपि संध्यामुपासीतन
वसंतेजनवपित्तिर्त्यादिनित्य निषेधपी॰ वल्यते॰ नसस्त्वनएवपुरुषार्थत्वान्निष्ठ
त्वविधिइतिसर्वशास्त्राकराणामेषनेदं मनामितिसूत्रनाय अत्रप्रभाकरम
तंतनवीनरत्नकं तथाचनरपिएकदेशिमतमितिज्ञावः निलइतिसंध्यावंदना
दौविस्मर्थः शौचादिसादिनानकालजीवित्वपरिग्रहः संध्यानुपासीतस्मादित्व
लोकाहंननकालानकृतिसाध्यसंध्यावंदनकः स्ववितकालाजीवित्वात्पूर्व
संध्यापासनहमित्याकारककार्यताज्ञानं प्रवर्त्तकमित्यर्थः॰ अन्यत्रचेतिः का
मीयेत्यर्थः॰ प्रवृत्तिः॰ पाकीमत्कृतिसाध्यः प्रकृतिविनासत्वेसतियदिष्टसाधन
त्वादित्यनुमानिकंकार्यताज्ञानंकाम्यगोचरप्रवृत्तौहेतुरित्यर्थः॰ ननुस्तनपा
नकार्यतास्मरणाद्वृत्तिनस्यात्त्वाद्यस्मरणेनानुमानिकस्येष्टसाधन
ताज्ञानजन्यकार्यताज्ञानस्याभावादित्यतआह॰ इष्टसाधनताज्ञानकालीनं
वेति॰ कालश्चात्रभावताकाजैनव्याप्त्यादिज्ञानात्कार्यत्वानुमितिस्थानेनवदि

इष्टत्वप्रकारकतत्तद्व्यक्तिपक्षकानुमितित्वं कार्यतावच्छेदकं इष्टत्वप्रकार
कपरामर्शत्वेनचकारणता॰ कारणतावच्छेदके परं नतद्व्यक्तित्वनिवेश॰
समानविषयकत्वेनकारणत्वेपितत्तद्व्यक्तित्वेदेनकारणतस्याबद्धपक
त्वात्कारणतावच्छेदकत्वेपितत्तद्व्यक्तिनिवेशस्यलन्यतेपरमाधिक्यात्॰
॰इत्थंचइदव्यक्तिमनंतत्वाद्वैवकारणत्वात्रदोषः ननुव्याप्यतावच्छेदकसं
बंधेनहेतुमत्ताज्ञानस्यैवानुमितिहेतुत्वपाज्ञानस्यैवासंभवः स्वरूप
कंव्यभिचारेणस्वसमानाधिकरणपाकत्वरूपपरंपरासंबंधस्यहेतुता
वच्छेदकत्वात्॰ नचसाध्यमपितेनैवप्रतिसंबंधेनेतिवाच्यम्॰ प्रवृत्ति
नकचिकीर्षायांस्वरूपसंबंधेनकृतिसाध्यत्वस्यप्रकारत्वपानतत्व
कत्वानेपितेनैवसंबंधेनतस्यप्रकारत्वात्॰ स्वरूपसंबंधेयैवसाध्यता
वच्छेदकत्वादितिचेन्न॰ गुरुमतेयेनकेनचित्संबंधेनैवहेतुमत्ताज्ञानाद
प्यनुमितिस्वीकारात्॰ कालिकसंबंधेनपर्वतेधूमवत्ताज्ञानेपिअनुमि
तेरिष्टत्वात्॰ नचैवंपर्वतेधूमवत्ताज्ञानात्धूमावयवरूपादौकस्मादनुमि
त्यापत्तिरितिवाच्यम्॰ पक्षतावच्छेदकभेदेनअनुमितिपरामर्शयोःकार्य
कारणभावात्रूपत्वावच्छिन्नपक्षकानुमितेरनीकतयातदंतर्भावेनका

पकारणताबाकल्पनात्. न च समानविशेष्यतावच्छेदकतानामसमासत्या कारणत्वे
न लाघवात् इच्छत्वेन रूढपक्षतानुमितिरिति वाच्यम्. अन्यथा व्याप्यपत्तित्वे
न गुरुत्वेपि पक्षतावच्छेदकत्वेन कारणत्वकल्पनात्. अग्रामा एव तानाभावनि
वेशानुरोधेनापि पक्षतावच्छेदकनिवेशस्यावश्यकत्वाच्चेति दिक्. अपरे तु स
न्निकृष्टपर्वते पर्वतत्वेन धूमवत्ताग्रहे येन केन वह्नित्वं धूमवत्तापरा
मर्शादिसन्निकृष्टपर्वते वह्न्यनुमित्यापत्तिः इष्टापत्तौ वह्न्यर्थिप्रवृत्त्यापत्ते
रेतच्छिन्नमिमाकृत्तद्रसत्. उपादानप्रत्यक्षाभावादेव तत्र प्रवृत्तिवारणसं
भवादिति. नचैवमिति. एवं इष्टसाधनताज्ञानजन्यकार्यताज्ञानत्वेन हेतु
त्वे लाघवादिति. इष्टसाधनताज्ञानजन्यत्वापेक्षया इष्टसाधनताज्ञानकाली
नत्वापेक्षयाल्पे इष्टसाधनताविषयत्वस्य निवेशात् लाघवादित्यर्थः प्रवृत्तिसा
मान्ये इति. तथा च प्रवृत्तिसामान्यसामग्रीविरहादेव न मंडलीकरणे प्रवृ
त्तिरितिभावः निमेइति. संध्यावंदनादावित्यर्थः. तदभावात्. तस्येष्टसाधन
ताज्ञानाभावेनेष्टसाधनताविषयककृतिसाध्यताज्ञानाभावादित्यर्थः ननु तत्रा
पिप्रत्यवायानुत्पादरूपेष्टसाधनत्वमस्त्येव पत्रफलं न कल्प्यते तत्रापि १५०
नत्वम्यते इत्यत आह. साध्यत्व इति. ननु तन्निरूपितसाध्यत्वं तन्निरूपिता

धनत्वं च विरुद्धमिति कृतिनिरूपितसाध्यत्वेष्टसाधनत्वयोर्न विबाधकाभा
वः सामान्यतस्तु साध्यत्वसाधनत्वयोर्न विरोध इत्यभिप्रायेणाशंकते. कृष्यमिति
·अनयोः साध्यत्वसाधनत्वयोः अनयोः कृतिसाध्यत्वेष्टसाधनत्वयोरित्य
र्थः इतिकश्चित्. साधनत्वं हीति. सिद्धधर्मः पूर्वकालवृत्तिधर्मः अन्यथासि
द्धनियतपूर्ववृत्तित्वरूपकारणतायाः सिद्धधर्मत्वादित्यर्थः. सिद्धधर्मत्वमे
वाह. असिद्धेति. भाविनः कार्यनिष्ठपादित्यर्थः साध्यत्वं चेति. अनंतरभ
विष्यत्स्वरूपं साध्यत्वं च असिद्धधर्मः भाविकालवृत्तिधर्म इत्यर्थः अनन्यथा
सिद्धनियतपश्चाद्भावित्वरूपकार्यतायाः अनागतवृत्तित्वादिति भावः
तदेवाह सिद्धतादशायामिति. तदभावात्. साध्यत्वाभावात्. न चेति. एकका
लावच्छेदेन सिद्धत्वासिद्धत्वयोरसंभवेन तद्वत्त्वयोः साध्यत्वसाधनत्व
योरपि सामान्यत एव निषेधेनान्यनिरूपितयोरपि तयोर्विरोध इति भावः॥
येन एककालावच्छेदेन सिद्धत्वासिद्धत्वयोः संभवेन. एकदा कृतीति. नच इ
दानीमिष्टसाधनं अग्रे च कृतिसाध्यमिति ज्ञानादेव प्रवृत्तिरस्त्विति वाच्यं
इदानीं अग्रे तन्कालयोरननुगमेन तथाव्याप्तिग्रहासंभवादिति भावः नवी
ननैयायिकमते इष्टसाधनताज्ञानस्य कृतिसाध्यताज्ञानस्य चद्वयपनेकाइ

न.प्र॰ लाद्राहनरादिति॰ लाघवादिति॰ कारणतावच्छेदकलाघवादित्यर्थः॰ प्रवर्त्तकमि
१४१ ति॰ प्रवृत्तिसामान्ये कारणमित्यर्थः॰ तानादीति॰ आदिनेष्टसाधनताज्ञानकाजी
नकार्यताज्ञानपरिग्रहः॰ गौरवादिति॰ तत्तत्त्वादिप्रवेशेन कारणतावच्छेदक
गौरवादित्यर्थः॰ नित्येपीति॰ संध्यावंदनादावित्यर्थः॰ फलश्रुतेरिति॰ संध्यामु
पासते ये तु सततं शंसितव्रताः॰ विधूतपापास्ते यांति ब्रह्मलोकं सनातनं इत्यादि
नात्रापि फलबोधनादित्यर्थः॰ सर्वत्र नित्ये फलश्रवणाभागदाहः॰ बहुत्रा हूति
॰अत एवाह पत्रन्वेति॰ नित्येष्टेति॰ विश्वजिदिति॰ विश्वजिता यजेतेत्यत्र इष्टसा
धनत्वस्य विध्यर्थत्वेन विशेषतः फलानुपस्थितौ विधेः प्रवर्त्तकतानुपपत्त्या
विशेषतः तत्फलं कल्प्यतां नार्थः॰ तत्र स्वर्गोपि वर्गधीरेव सुखपुरुषार्थत्वेनाप
वस्मात्ताबरूपतया गौरवेन लघुत्वात्स्वर्ग एव फलं कल्प्यते॥ तथाश्रुतफले
नीत्येपीत्यर्थः॰ ननु परकरणे प्रत्यवायस्तन्नित्यमिति तत्र प्रत्यवायपरिहा
रस्याश्रावच्छफलत्वात्स एव फलं न तु स्वर्गः॰ गौरवात्॥ नच निरूपधीच्छावि
षयत्वरूपमुख्यपुरुषार्थत्वात्तत्र चहतिवाच्यम्॰ वलवदद्वेषविषयत्वात्वा
वेनदुःखाभाववद्दुःखजनकाभावेपि तत्त्वापिरोधादित्यत आह॰ प्र
त्यवायेति॰ नवनतत्परिहारस्तत्प्रागभावः तस्य च कथं फलत्वं प्रागभावस्या १४१

जन्यत्वादिति वाच्यम्॰ पक्षत्वेपक्षत्वं परत्वाविपरत्वावदित्येवं रूपयोगक्षेमसाधा
रणजन्यत्वस्य तत्रापि संभवादिति भावः॰ नचैवमिति॰ नित्येपीष्टसाधनताज्ञा
नवत्तादेवप्रवृत्तिस्वीकारे इत्यर्थः॰ काम्यत्वमिति॰ कामनाधीनकर्त्तव्यस्यैव काम्य
त्वरूपत्वादित्यर्थः॰ नत्विति॰ कामनानधीनकर्त्तव्यस्यैव नित्यत्वस्वरूपत्वादिति
भावः॰ कापत्रिविधं नित्यं काम्यं नित्यकाम्यं च तत्र केवलं नित्यं संध्यावंदनादि के
वलं काम्यं यागादि नित्यकाम्यं एकादशीव्रतादि अकरणे प्रत्यवायश्रवणान्नित्य
त्वं पुत्रादिकामनाश्रवणात्काम्यत्वमपि॰ अत एव काम्यकरणे नित्यत्वपि तंत्रे
णैव सिध्यतीति न तत्र कर्मद्वयं न च वक्तते न च स्यैव नित्यस्य काम्यत्वे केवलं नित्य
कर्मविनस्यत्॰ तथाच नित्यत्वमित्यत्व मित्यस्य केवलनित्यत्वमित्यर्थः॰ अन्य
था नित्यकाम्ये कामनाधीनकर्त्तव्यत्वेन काम्यत्वेपि नित्यत्वस्वीकारादसंगमाप
त्तेरिति ध्येयम्॰ नहीति॰ कामनाधीनकर्त्तव्यभिन्नत्वस्य नित्यत्वरूपत्वे नित्यका
म्यासंगतेस्तत्कामनानधीनकर्त्तव्यत्वमित्युक्तम्॰ यदिति॰ विहिततत्कालीना
करणेइत्यर्थः॰ तेनान्यदासंध्यावंदनाकरणेपि नक्षतिः॰ कामनोपाधीति॰ ननु नि
त्यनंतरं नित्यत्वमित्यनुषंगः तन्वेति॰ प्रत्यवायप्रयोजकीभूताकरणप्रतियो

गित्वरूपं नित्यत्वं चेत्यर्थः कामनोपाधीति । कामनारूपो य उपाधिः प्रयोजकस्त
त्कर्तव्यत्वेपीत्यर्थः प्रयोजकत्वं चान्यूनानतिरिक्तवृत्तित्वं न चाव कामनां वि
ना कर्तव्यत्वे कामनानधीनकर्तव्यत्वस्य विरुद्धत्वेपि प्रत्यवायप्रयोजकाकृ
ताकरणप्रतियोगित्वं न विरुद्धमिति भावः । नन्वेवमिति । एवं कामनोपाधिकक
र्तव्यत्वे फले इति । अथ मतः फलं तावत् ततः फलेच्छा । ततः इष्टसाधनत्वोपाये
ततः उपायेच्छा ततः प्रवृत्तिरिति क्रमः तथा चाहरहः संध्यामुपासीतेत्यादौ
यदा न फलप्रतिसंधानं तत्र फलेच्छाभावेन इष्टसाधनताज्ञानाभावात् प्र
वृत्तिर्न स्यादित्यर्थः इष्टत्वादिति । गुरुणा अहरहः संध्या कर्तव्येति शिष्टे इति । यत्र
किंचिदितस्य फलत्वमस्तीति प्रतिसंधायैव बालानामपि प्रत्यहं प्रवृत्तिरिति
भावः । तथा च केवलं नित्यत्वं मास्त्वेवेति हृदयम् । नन्वेवमपि । एवं नित्यस्या
पि काम्यत्वे । कामनेति । अधिकारिविशेषणं हि अधिकारः तथा च नित्येष्वपि
तत्कालजीवित्वमधिकारः काम्ये तु कामनावानधिकारीति कामना अधिका
रिविशेषणं स्यादित्यर्थः तस्यादिनीति । अथाकृताकरणे प्रत्यवायः यथा स
विनासंध्याकरणेपि न प्रत्यवायः । अधिकारात् तथा कामनाशून्येनाकरणे

पि प्रत्यवायो न स्यात् अधिकाराभावात् इत्यर्थः यदीति । तत्र कामना विरहप्रयु
क्तनित्याकरणस्थले वस्तुतस्तु तत्र नियमेन कामनास्त्येव अकरणं तु आल
स्यादिप्रयुक्तमित्यधिकारित्वमेव कामनेति निमित्तत्वाभ्युपगमे कामना अधिकारिवि
शेषणं नित्यकाम्ये तु शुचित्वजीवित्वमेवाधिकार इति कामनाप्यन्यो विप्र
त्वमेवेति भावः इष्टसाधनत्वमिष्यत इति एवं शाब्दः प्रामाणिकत्वात्
प्रमाणसिद्धत्वादित्यर्थः ननु फलहेतोरेवाधिकारित्वमपि कामनाप्यधिका
रिविशेषणत्वादधिकारः कथमन्यथा काम्यसाधनताज्ञानस्य प्रवृत्तिसामा
न्यहेतुत्वमपि न आदकल्पता वेति । कामनेनतरेति । तथा च कामनाया अधि
कारत्वेपि कामनेतरशुचित्वजीवित्वरूपयादधिकारवतां विलाकर
णे प्रत्यवाय । इति कामनाविरहकालेपि नित्याकरणे प्रत्यवाय एवेति भावः न
क्त्वविदिति । काम्यगोचरप्रवृत्तिं प्रति इष्टसाधनताज्ञानत्वेन साधनताज्ञान
त्वेन प्रवृत्तिसामान्ये तु कार्यताज्ञानत्वेन हेतुत्वमिति गुरुमतानुसरणम्
वैयर्थ्यं नित्येपि फलस्योपपादितत्वादिति । ननु साध्यत्वसाधनत्वयोर्विरो
धादिष्टसाधनताविषयकत्वं कृतिसाध्यताज्ञानत्वेन प्रवृत्तिहेतुत्वासंभव इ
त्यारोपेनाह नन्वेतित्तद्वारयति । एकस्मिन्निति एकनिरूपितयोरेव साध्यत्वसा

धर्मत्वयोर्विरोधेनान्यनिरूपितयोर्विरोधितया ओदननिरूपितसाधनत्व
स्य कृतिनिरूपितसाध्यत्वस्य च पाके विरोधादिति भावः अथेत्यादि । साध्य
त्वसाधनत्वयोः सामान्यतः विरोधे न वेति दिष्वन्नरूपेण प्रवृत्तिवारणाय इ
ष्टसाधनत्वलिंगकं कृतिसाध्यतानुमानं प्रवर्त्तकं वाच्यं तच्च साध्यत्वसाधनत्व
योर्विरोधेन संभवतीति तयोर्न सामान्यतो विरोध इति लाघवात् सामान्य
तो इष्टसाधनताविषयककृतिसाध्यताज्ञानमेव प्रवर्त्तकमिति भावः न
नु मधुविषसंपृक्तान्नभोजने मरणरूपबलवदनिष्टजनकत्वज्ञानका
लेपि प्रवृत्त्यापत्तिः कृतिसाध्यत्वस्य तन्निरूपेष्टसाधनत्वस्य च ज्ञानात्
यन्नेतु बलवदनिष्टाननुबंधीष्टसाधनतालिंगककृतिसाध्यताज्ञान
मेव प्रवर्त्तकमिति भावः ननु मधुविषपृक्तपाकेलज्ञानेन तथात्वाभावादि
त्यत आह । बलवदिति । न निरूपमसुखेइत्यर्थः बलवदनिष्टाननुबंधित्वभ्रम
काले प्रवृत्त्यापत्तिरतस्तत्रेष्टापत्तिमाह । यदा चेति । एवं च । बलवदनिष्टान
नुबंधित्वज्ञानस्यान्वयव्यतिरेकानुविधायित्वेन । विध्यर्थोपीति । प्रव
र्त्तकज्ञानविषयस्यैव विध्यर्थता बलवदनिष्टाननुबंधीष्टसाधनत्ववि
शिष्टं कृतिसाध्यत्वमेव विध्यर्थः प्रत्येकं शक्तिकल्पने नानार्थतापत्त्या विशि १५३

ष्टएवैव शक्तिरिति भावः कालएवेति विशिष्टस्य विध्यर्थत्वादेवेत्यर्थः विशे
षणानामप्रयुक्तौ बलवदनिष्टाननुबंधीष्टसाधनत्वविशिष्टसाधनत्वकृ
प्रकृतिसाध्यत्वाभावरूपो विशिष्टाभावो सत्यर्थः उपपद्यत इति । प्रत्येकश
क्तौ वक्तव्यं च लक्षणा विधेधात्वनिषिद्धान्तरणेन्वा निषेधस्य विध्यर्थत्ववद्
निष्टाननुबंधित्वांशबाधात् विशिष्टरूपविध्यर्थनिषेधः विशिष्टे न शक्ति
स्वीकारेण्यावश्यकमर्थमिति भावः कथं तर्हीति । बलवदनिष्टाननुबंधित्वस्य
विध्यर्थत्वे हिंसात्वर्थः श्येनेनेति । अभिचरन्वैरिवधफलककामता । वा श्येने
न यजेतेत्यर्थः विधिप्रवृत्तिः विधेः श्याष्टबोधजनकत्वं हिंसात्वेनेति । न हिं
स्यात्सर्वाभूतानीत्यनेन हिंसामात्रस्यैव नरकसाधनत्वबोधनादिति भावः॥
मानाभावादिति नरकसाधनताबोधकप्रमाणाभावादित्यर्थः न च हिंसात्व
मेव मानमिति वाच्यं तस्य निरस्तत्वादिति भावः ननु तर्हि नरकसाधनतया
आस्तिकानामपि कथं न तत्र प्रवृत्तिरित्यत आह श्येनादाविति । आस्तिकानां
नरकभीरूणां तथा च श्येनस्य साक्षान्नरकासाधनत्वेपि नरकप्रयोजक
त्वप्रतिसंधानादेव नास्तिकानां प्रवृत्तिरिति भावः कथं मानाभाव इत्याशंकते
न त्विति । सा चेति । हिंसा चेत्यर्थः नरकेति न हिंस्यात्सर्वाभूतानि इत्यनेन नरकज
नकत्वबोधनादिति भावः विनष्टेति । गावि विरुद्धे सतीत्यर्थः तत्कर्तुः रूपकर्तुर्गो

वधेति: कूपकर्त्तुर्हिंसकत्वापत्त्या तस्यापि गोवधप्रायश्चित्तापत्तेस्तर्हि चावतया
न कस्यापि कूपकरणे प्रवृत्तिः स्यादिति भावः। न हीति न तु मरणानुकूलव्यापार
मात्रं हिंसा इत्यनुपपन्नं यत्र मरणोद्देशेन खड्गघातः तेन च मरणं न जनि
तं तत्रापि हिंसकत्वापत्तिरतो मरणानुकूलव्यापारत्वमिति। नरवधेऽपि मरणो
पधायकव्यापारत्वं तथा च कूपस्य मरणोद्देशेनाननुष्ठीयमानत्वान्नात्र कर्त्तु
र्गोवधकर्तृत्वमिति भावः। न त्वापत्तेः हिंसात्वपक्षे। तथा च तस्यापि आत्मवध
कर्तृत्वापत्तिरिति भावः। अदृष्टेति तथा च मरणोद्देशेनानुष्ठीयमानत्वे स
ति अदृष्टाद्वारा मरणानुकूलव्यापारत्वं हिंसात्वं निषेधस्तत्र पापं तस्यादृष्ट
द्वारा मरणानुकूलत्वेन न हिंसात्वमिति भावः। न हीति। अदृष्टद्वारा मरणा
नुकूलत्वस्य विवक्षितत्वे हालाहलभक्षणमिति श्येनेन हिंसाहस्य मरणं जन्य
ते किन्तु कालान्तरे न यागेनात्रादृष्टस्वीकारस्यावश्यकत्वात् अदृष्टद्वाराम
रणानुकूलत्वरूपं न हिंसात्वमिति न तत्र बलवदनिष्टाननुबन्धित्वस्या
हतत्वापत्त्या श्येनेनाभिचरन् यजेतेति विधेरप्रामाण्यमिति दिक्। प्राचीन
मते त्वरसंभवकारणतया नवीनमतमाह तत्त्व्याप्तीति विनिगमनाविरह
इति तथा च बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वविशिष्टकृति
साध्यतात्वेन हेतुत्वे तेषां मिथो विशेषणविशेष्यभावे विनिगमना १५५

विरहः स्यात् किं तु कत्र्य घपमिति न्यायेन सर्वेषां विशेषणानां तान एव वि
शेषणत्वं अवच्छेदकतापर्याप्तेर्व्यासज्यवृत्तित्वाग्गौरवादिति वाच्यम्। नाना
सम्बन्धावच्छिन्नावच्छेदकतया एकस्या असम्भवात् महानसीय वह्न्या
व प्रतियोगिनावच्छेदकतया एकस्याः महानसीयत्ववह्नित्ववत्त्वोका
रे महानसीयत्वसमवायसम्बन्धावच्छिन्नावच्छेदकत्वप्रतीत्या पर्याप्ते
न तस्या व्यासज्यवृत्तित्वस्य वक्तुमशक्यत्वादिति दिक्। ग्रंथकृते अत्येति
·तेन तेनापीति। बलवदनिष्टाननुबन्धीष्टसाधनत्वविशिष्टकृतिसाध्य
तातात्वेन कृतिसाध्यत्वविशिष्टबलवदनिष्टाननुबन्धीष्टसाधनता
तात्वेन बलवदनिष्टाननुबन्धीत्वविशिष्टकृतिसाध्यत्वविशिष्टेष्टसा
धनतातात्वेन इष्टसाधनत्वविशिष्टकृतिसाध्यत्वविशिष्टबलवद
निष्टाननुबन्धित्वतात्वेनापि रूपेण हेतुत्वमित्यर्थः। न हीति कृतिसा
ध्यतातात्वादिना कृतिसाध्यतातात्वेन इष्टसाधनतातात्वेन बल
वदनिष्टाननुबन्धित्वेनैव हेतुत्वमस्त्वित्यर्थः लाघवादिति। बलवदनि
ष्टाननुबन्धित्वेष्टसाधनत्वकृतिसाध्यत्वेन प्रत्येकरूपेण हेतुत्वे गौर
वात् विशिष्ट एव वाच्यः। किं विशिष्ट एव वाच्यः। किं विशिष्टरूपेणैव हेतुत्वमिति

ककार्यकारणतान्नाद्येनैव निर्वाह इति न व्याप्तिभापः सत्वावच्छेदकतापन्ना
स्यप्रवृत्तित्वानंगीकारात् मिथो विशेषण विशेष्यभावे विनिगमनाविर
हेण कार्यकारणभावद्वयावश्यकतया· वच्छेदकगौरवाच्चासंभवाविति· अ
वच्छेदकलाघवात् जातित्वेनरूपेणैव हेतुत्वमुचितमिति भावः चिकीर्षा
या तानस्यप्रवृत्तिहेतुतानन्त्र चिकीर्षात्वावच्छिन्नप्रति न विशिष्टरूपेण
हेतुत्वं किंतु साध्यताताज्ञानत्वेनैवेत्याह वस्तुतस्त्विति चिकीर्षावच्छिन्नंप्रती
त्यपि इच्छायाः स्वसमानप्रकारकधीसाध्यत्वनियमात् कृतिसाध्यत्वप्र
कारकेच्छाप्रतिकृतिसाध्यत्वप्रकारकज्ञानत्वेनैव हेतुत्वं ननु प्रत्येकं त्रित
यरूपेण विशिष्टरूपेण वा तेन रूपेण हेतुत्वे गौरवात् मानाभावाच्चेति भा
वः नन्वेवमिति· एवं कृतिसाध्यताताज्ञानत्वेनैव चिकीर्षात्वावच्छिन्नं प्रति
हेतुत्वे दृष्टान्तानुपपत्तिरिति· कृतिसाध्यताताज्ञानस्य तत्रापि सत्वादिति भावः॥
स्यादेवेति· कृतिसाध्ये सुखादौ चिकीर्षा त्वस्येवेत्यर्थः तथा चेष्टापत्तिरि
ति भावः· शंकते· इष्टेति मंडलीकरणे इष्टसाधनत्वभ्रमकाले चिकीर्षाज
नत्वेनेष्टजनकत्वेन ज्ञानं इति मंडलीकरणे फलजनकतया चिकीर्षा ना
यादपितु न्याकं तेसुखादिचिकीर्षा प्रतिसुखादिज्ञानत्वेन हेतुत्वादिति

पापतयाज्ञापारनीपासातु न संभवति विशेषसामग्र्याफलेन ननीये
सामान्यसामग्र्याः सहकारित्वादित्याह· उपापेच्छेति उपापेच्छायाः सा
मान्यसामग्रीतस्याज्ञानादित्यर्थः शंकते केनमिति· इष्टेति कृत्यसाध्य
इस्यादाविच्छानुरोधेन उपापेच्छात्वावच्छिन्नं प्रति इष्टसाधनताज्ञानत्वेन
बलवदिष्टाननुबंधित्वज्ञानत्वेन हेतुत्वं सुखादौ चिकीर्षानुरोधेन च चि
कीर्षात्वावच्छिन्नं प्रति कृतिसाध्यताज्ञानत्वेन हेतुत्वं मंडलीकरणे चिकीर्षा
जायमानात उपायतयैव स्यात् सा न संभवति उपापेच्छासामान्यसामग्र्य
भावादित्यर्थः· बलवदनिष्टानुबंधित्वज्ञानत्वं वा प्रतिबंधकमिति· बल
वदनिष्टानुबंधित्वज्ञानस्य प्रतिकत्वे प्राप्ते एवं निषेधपतनोत्तेजकतया
तदभाववद्व्याप्यतदभाववावच्छेदकधर्मादृष्ट्यादीनां प्रतिबंधकत्वे गौर
वमत्राह स्वरसिद्धाकारेण दूषितिः विद्यमानेति· विद्यमानापाइच्छातद्विष
योपस्तस्याधनत्वमित्यर्थः स्वरूपसदिति· वस्तुगत्या यदिष्टविषयत्वस्सा
धनताताज्ञानं कारणमित्यर्थः तस्यपि इच्छाविषयस्यापि एवं चेति वस्तुग
त्या मदिष्टं तत्साधनताताज्ञानं कारणमिति मुरवाद्विद्यावृत्त्यकाले न
पाकादाविच्छोदयइति· ननु बलवदनिष्टाननुबंधीष्टसाधनताज्ञानां

न.प्र. प्रत्येकरूपेण हेतुत्वेपि विधेर्जघन्यादिविशिष्टएव शक्तिरस्तामित्यत आह
१४६ विध्यर्थोपीति। प्रवर्त्तकतान्न विषयस्येव विध्यर्थतया येन रूपेण तान
स्य प्रवर्त्तकता तेनैव रूपेण शक्तिरिति भावः ननु येन रूपेण प्रवर्त्तकता
तेनैव रूपेण शक्तिरित्यत्र मानाभावात् लाघवाद्विशिष्टएव शक्तिरस्त्वित्य
त आह नन्विति। विशिष्टं बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वं वि
शिष्टकृतिसाध्यत्वं विशेषणेति बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधन
त्वं बलवदनिष्टाननुबन्धित्वविशिष्टकृतिसाध्यत्वविशिष्टेष्टसाधनत्वे
ष्टसाधनत्वविशिष्टबलवदनिष्टाननुबन्धित्वविशिष्टकृतिसाध्यत्ववि
शिष्टेष्टसाधनत्वेष्टसाधनत्वविशिष्टबलवदनिष्टाननुबन्धित्ववि
शिष्टकृतिसाध्यत्वेवेति निगमनाविरहात् अवच्छेदकगौरवाच्च प्रत्येकरूपेण
व शक्तिरिति भावः ननु नञर्थं नञ्पदे इत्यत्र नञर्थत्वेन विध्यर्थस्या
भावो बोधनीयः विध्यर्थश्च प्रत्येकं नेवेति। इष्टसाधनत्वस्य कृतिसाध्य
त्वस्य च नञर्थान्वये बाधापत्तिः विशिष्टरूपेण शक्तौ तु बलवदनिष्टान
नुबन्धित्वरूपविशेषणाभावात् विशिष्टाभावसंभवात् तत्रैव शक्तिरस्त्वि १४६
त्यत आह नञर्थमिति। तस्य नञर्थत्वेनस्यकार्यत्वात् कृतिसाध्यता

त्विष्टेति। तथा चायोग्यत्वान्न तयोर्नञर्थान्वय इति भावः न हि कुर्यं विध्यर्था
भावबोधनपरत आह किंत्विति नहि पापविध्यर्थाभावो नञा बोध्यते न
वनञो निषेधापत्तिः विशेषणाभावात्तत्र विशिष्टाभावसंभवात्। तथा च यत्कि
ञ्चिद्विध्यर्थाभावबोधेनैव सामञ्जस्यमिति भावः विशिष्टरूपेण शक्तौ त्वि
नो वधसाधनं ननु नरकसाधनमिति तत्र विध्यर्थाबाधकयमादिनः पि
नाद्यधो वधाच्च नरकमिति प्रतिसंधानाच्छास्तिकानां न तत्र प्रवृत्तिरस्तु
क्तं तत्र तत्तु न सम्यक् बलवदनिष्टाननुबन्धकत्वस्य विध्यर्थत्वे विध्यर्थबाध
संभवेपि नास्तिकानां कथं न तत्र प्रवृत्तिः प्रवर्त्तकस्य बलवदनिष्टाजन
कत्वज्ञानस्य तत्र सत्वात् बलवदनिष्टाप्रयोजकत्वज्ञानस्य प्रवर्त्तकत्वे
बलवदनिष्टाप्रयोजकत्वस्यैव विध्यर्थत्वे न कथं न तत्र विध्यर्थबाधस्त
स्मिन्नित्यप्रत्येकरूपेण शक्तौ विध्यर्थाबाधमुपपादयति श्येनेनेति। बा
कृ धादिति। बलवदनिष्टाप्रयोजकत्वसंशयस्य तस्य बाधादित्यर्थः अबाधादिति
बाधाभावरूपयोग्यतासत्वात् इत्यर्थः ननु बलवत्त्वमनिष्टे निरूपम
त आह संक्षेप इति। नांतरीयकत्वमव्याहृत्तं बलवत्त्वमानुत्तविकमिदं
त्वादि रागिणां तु नरके वलवत्वमहा ततश्च प्रवृत्तस्यनुपपत्तिरिति निरूद्यं ८

त॰प्र॰ विधिं निरूप्य तद्विभावमाह सोपमिति क्रमेण लक्षणान्याह तत्रुक्तमिति॰ अ
१४७ त्यंतं अप्राप्ते विधिः अपूर्वविधिरित्यर्थः यथा व्रीहीन्प्रोक्षगस्याकाह्यक
प्राप्तत्वात् अपूर्वविधिः पाक्षिके ति॰ पक्षे प्राप्तौ सत्यां नियमविधिरित्यर्थः
यथा व्रीहीनवहन्तीत्यत्र नखविदलनेनापि संभवात् पक्षे
अवघातस्य प्राप्तस्य अवहन्तेनैव तुषापवापः कर्त्तव्यो न तु नखविदलना
दिनेति विधस्यत इति व्रीहीनवहन्तीति नियमविधिरित्यर्थः तत्र चान्यत्र
प्राप्तौ यत्र नियम्यते सा परिसंख्या यथा पंचनखानां सर्वेषां लक्षणया
प्तौ पंचैव पंचनखा भक्ष्या इति नियम्यते परिसंख्याविधिरित्यर्थ
शशकः शल्लकी गोधा खड्गी कूर्मस्तु पंचमः इति पंच पंचनखा वै भक्ष्याः न
नु याजनाध्यापनेति पंच पंचनखाच्यस्याः इति न प्रतिग्रहैः कृषिर्गोधन
मर्जयेदिति नियमविधिस्तु जीवनार्थं धनार्जनं विधीयते तस्य रागप्रा
प्तत्वात् नाप्यर्जने याजनाद्यन्यतमस्यापि रागप्राप्त-
त्वात् किंत्वप्राप्ततरोपायनिषेध एवात्र विधेयः एवं परिसंख्यायां पंचपं
चनखभक्षणस्य रागप्राप्तत्वात् तद्भिन्नपंचनखभक्षणे निषेध एव वि
धेय इति इतरव्यवच्छेदकत्वाविशेषान् नियमपरिसंख्ययोः को विशेष इ १४७

ति॰ अत्राह॰ यत्र क्रियायां विकल्पेन बारकान्वयः स नियमः यथा धनार्ज
ने याजनप्रतिग्रहाध्यापनेकस्यापि तस्य संभवात् एकस्य धनार्जन क्रियायां
याजनादीनां युगपदन्वयासंभवतया विकल्पेनैवान्वयः शशकादि
मांसनिमित्तस्यैकस्य पिंडस्य संभवात् लक्षण क्रियायां युगपदन्वय
संभव इति परिसंख्येति भेदः तेऽधुना नियमः पाक्षिके सतीति॰ केचित्तु इतर
व्यवच्छेदकस्यार्थत्वशालित्वान्नियमपरिसंख्ययोर्भेदः तथाहि अजीव
उपायत्रयसंबंधस्य शास्त्रात् प्रतीतौ कृष्यादीनामन्ययोपालिप्सतियेधा
मिकत्वयेपरानन्वयसक्तिया समुच्चयासंभवात्रेतरोपायमुदासेनाख्यता
त्स्य पकल्पनं परंतु धूमोत्तीति वाक्ये वह्नेरिव तस्याप्यर्थं परिसंख्यायां तुल
क्षण क्रियायां पंचानामप्यन्वयसौत्रमैवारितर पंचनखसमुदायोस्य यन्त
त्र पंचानामपि समुच्चयसंभवात् किंतु शास्त्रे एव एवं चक्रस्य पंचनखस्य
यो विरोधि लक्षणया यचेतरपंचनखानज्यस्या इति वाक्यार्थः तथान्तउप
स्थितपदार्थपरित्यागात् अनुपस्थितपदार्थकल्पनाद्भावविधित्वाज्ञानि
यमापेक्षया दोषत्रयवती परिसंख्येत्याहुः तद्भिन्नमतः याजनादिनाजनि
इतरव्यवच्छेदस्यार्थसिद्धिरूपा विशिष्टविधिरिति स आप्ता नियमे पीतर

अवच्छेदस्यशक्यत्वात्तद्रूपकत्वादितरथाकृष्यादिविषयेऽपि तत्स्यादनेनतत्संबंध
मुदासीनावादीति· नेष्टसाधनतायां विधेशक्तिः· किंतुकार्यएवएवेतिप्राभाकर
मतमाह· अत्रगुरवइतितस्यइष्टसाधनत्वस्यबोधनाशक्यत्वमेवाह· तथाहीति
स्वर्गकामस्येति· स्वर्गकामस्ययदिष्टंतत्साधनंयागइति· अनेन· विधिना· बोध्यं
बोधनीयंननुविधिनासामान्यतइष्टसाधनत्वबुद्धेपिकुतःस्वर्गरूपेष्टसाध
नत्वबोधइत्यतआह· इष्टंवात्रेति· स्वर्गएवेति· स्वर्गकामपदसमभिव्याहाराद्
स्वर्गरूपमिष्टंसिध्यतिः प्रतीतिस्तिष्टत्वेनपदार्थैकदेशयोरप्यत्रैवान्वयस्वी
कमेतुस्वर्गत्वेन· नयावत्स्वर्गाभिन्नेष्टसाधनंयागइतिबोध्यमितिभावः॥
नचेदमिति· स्वर्गसाधनंयागइतिबोधयितुंनसक्यमित्यर्थः साक्षात्साधन
त्वस्यःसाक्षात्स्वर्गसाधनत्वस्यअधुनाविनष्टेनेनतावत्क्षणवृत्तिध्वंसप्रति
योगित्वेनःअसंभवादिति· यागस्यचिराविनष्टत्वात्कृतयागात्तीयक्षणेनष्टत
याकालांतरभाविस्वर्गाव्यवहितपूर्ववर्तित्वासंभवादित्यर्थःनचेति· साध
नत्वंहिद्विविधंसाक्षात्पारंपर्याच्चेतिसाक्षात्स्वर्गसाधनत्वाबोधेपिप
रंपरास्वर्गसाधनताबोधेबाधकाभावइतिभावःपरंपरेतिपरंपरयास्वर्गसा
धनत्वहिस्वर्गसाधनापूर्वसाधनत्वंतच्च स्वर्गकामोयजेतेतिवाक्यप्रवृत्तेः।

पूर्वमपूर्वानुपस्थित्याऽदृष्टमितिभावः कृतिसाध्यत्वमपिनविध्यर्थइत्याह
नापीतिकार्यस्यकृतिसाध्यत्वंनविध्यर्थइत्यर्थः स्वर्गकामेति इष्टसाधनत्वस्य
विध्यर्थत्वेस्वर्गकामस्येष्टसाधनंयागइतिबोधंकृतिसाध्यत्वस्यविध्यर्थत्वेतु
स्वर्गकामीयकृतिसाध्योयागइतिबोधनायंतच्चनसंभवतीतिभावः तदेवोप
पादयतितथाहीति· शाब्दे शाब्दबोधे· बाधाभावस्ययोग्यतात्वेप्रकृतानुपयो
गइत्यतआह योग्यताचेति अतएवान्वयप्रयोजकरूपवत्त्वस्ययोग्यत्वादेव
·नयोग्यमिति· पयसासिंचतीतिवाक्यंयोग्यमित्यर्थः नास्तीतिसेकान्वयप्र
योजकंद्रवद्रव्यंनास्तीतितद्योग्यंवह्निनासिंचतीतिवाक्यमयोग्यमित्यर्थः॥
नन्वस्तुशाब्दबोधेयोग्यतातांनंकारणं आकांक्षान्वयप्रयोजकरूपवत्त्वमेव
योग्यतानतः किमतआह· प्रचनेन्वेति· स्वर्गकामोयजेतेत्यत्रचकामीति
कृतिसाध्यत्वस्यअन्वयप्रयोजकंरूपंइष्टसाधनत्वमेवतद्ग्रहएवचकामि
कार्यत्वस्यशाब्दबोधोनचेत्तच्चतत्इष्टसाधनत्वंग्रहीतुंशक्यमित्युक्त
मिति· आशुविनाशित्वात्साक्षात्साधनत्वस्यपरंपराघटकापूर्वानुपस्थित्या
चपरंपरासाधनत्वस्यग्रहीतुमशक्यत्वादित्युक्तमित्यर्थः स्वमतमाहतस्मा
दिति· इष्टसाधनत्वस्यकृतिसाध्यत्वस्यबोधयितुमशक्यत्वाद्विध्यर्थत्वासं

त.प्र.
१४९

नत्वादिस्वर्गः कार्यमिति कार्यमेव विधेयार्थः तच्च प्रकृते पूर्वमेव पर्यवसानात्
र्थः अन्वयप्रकारमेवाह · तस्मिन्निति · कार्यरूपे विधेये विषयवत्तयेति यागवि
षयकं कार्यमिति बोध इतिभावः अनुपपत्तित्वादिति पूर्वमुपस्थितेत्यापू
र्वत्वस्याघातम् अपूर्वत्वं हि पूर्वाप्रतीतत्वमितिभावः नञः कार्ये अपूर्वे शक्ति
ग्रहः विधिशक्तिग्रहः अथेतिन लिङः कापि पूर्वत्व वा शक्तिः किंतु कार्यत्वेन
रूपेण घटपटादिरूपकार्यसामान्य एव तत्रैव शक्तिग्रहः ननु विधिजन्य
बोधे कार्यत्वेन घटादेरेव भानापत्त्या कथमपूर्वग्रह इति तत्राह योग्यतेति
नहीति अन्वयादिति · घटादिरूपकार्यस्य यागविषयत्वाभावादितिभावः स्वर्गा
नादेरपीति स्वं पुरुषाः तदीयत्वात्तस्य यागविषयकत्वात् न चान्वयकथम
पूर्वत्वात्र इतिभावः कार्येति · कार्यत्वरूपेण घटपटादावेव शक्तिग्रहः त
तो यागविषयकं कार्यमिति बोधे स्वर्गकामस्यापि नियोज्य नियोजकत्वावसं
बंधेन कार्यस्यापादपूर्वत्वात्तः ननु किं नियोज्यं किं नियोजकत्वमत आह नि
योज्यकत्वं चेति · तत्कार्यतिस्वर्गकामकृतिसाध्यत्वेन प्रतीयमानत्वं कृतिसा
ध्यत्वं चापूर्वे यागद्वारा ननु कामिकार्यतया प्रतीयमानत्वं तानादावपि सं
भवतीत्यत आह · न हीति सुखादेरपि कार्यत्वेन प्रसज्य पाठकं कान्यादन्वादि १४९

ति अवैसीति तन्मते अन्वयप्रयोजकरूपवत्त्वस्यैव योग्यतात्वेन योग्यता
धे यास्त्वज्ञानात् साध्यत्व साधनत्वयोर्विरोधे पि कामिकार्यत्वान्वये इ
ष्टसाधनतातान विरोध्यस्यैवान्वयप्रयोजकतया काम्यसाधनताज्ञान
स्य वक्तव्यतया स्वर्तानादेः स्वर्गसाधनतयाज्ञानात्तत्र कामिकार्यताः प्रतीतिन
नुतानादेरपीष्टसाधनत्वभ्रमसंभवात्कामिकार्यतयाप्रतीतिसंभवत्वेवेत्य
त आह · नवेति काम्यसाधनंतानादिकाम्यसाधनत्वेनतापतेरसंभवः ननुप्रमा
विरहेपि भ्रमः स्यादेवेत्यत आह अन्वयेति · ननु तथापि तानस्यापि स्वर्गसाध
नतया तज्ज्ञानसंभवेन कामिकार्यतया प्रतीतिसंभवात् कथं न तत्र योग्य
तेत्यत आह नचेति नहीत्यर्थः यागेति स्वर्गकामनियोज्यक यागविषयकार्य
मित्यन्वयबोध इतिभावः प्रथमांतार्थविशेष्यक बोधजनि प्रामाण्याह · स्वर्गका
म इति कार्यवत्वं च नियोज्यनियोजकत्वावलक्षणसंबंधेन योग्यत्वेति स्व
र्गकामनियोजकस्य यागविषयककार्यस्यान्यस्यासंभवेन नीपूर्वलाभ
इत्यर्थः ननु कामिकार्यत्वान्वये इष्टसाधनत्वस्य अन्वयप्रयोजकतया पूर्वा
नुपस्थितिसाम्ते वेष्टसाधनताज्ञानासंभवात् कथं स्वर्गकामनियोज्यकं यागवि
षयकं कार्यमिति प्राथमिको बोध इति चेत् न हि बोधनायेयोग्यताज्ञानकार

न.प्र. णं किंतु तत्त्वदर्शिनावच्छेदकावच्छिन्नेपि न कुत्रचदनुतत्त्वानं स्वज्ञपते तच्च पचेति
१५० त्वादौ कामिकाद्येऽपि इष्टसाधनत्वावगमाद् ज्ञातमिति ज्ञानं तु पदार्थस्य पदार्थ
योग्यतापाद्यार्थ बोधे नानमुपपत्तत् तत्रेष्टसाधनत्वस्य स्वर्गकामनियो
जत्वं प्रति योग्यतात्वेन कथमिष्टसाधनत्वमविषयीकृत्य तदाप्यपि तिवे
सत्वं स्वर्गसाधनीभूत तत्र कर्त्तव्यसाधनत्वमेव हि यागे स्वर्गसाधनत्वमित्यपूर्वं
स्वर्गसाधनत्वज्ञानस्यावश्यकत्वात् यागाद्यानुपपत्तिं तस्यापि अध्याहारवादि
नन्मते ज्ञानोपगमात् न हि प्रथमंतैरपि याग विषयककार्ये स्वर्गसाधन
त्वबोधीनानुपपद इति किंतु अस्थिरत्वात् क्रियायां कृतिसाध्यत्वविधायाज्ञागी
ष्टसाधनत्वबोधोनज्ञ वतीति तन्मतनिगमति अथ स्वर्गसाधनं स्वर्गकामनि
योज्यकं याग विषयकं कार्यमिति प्राथमिकोबोध इति तन्मतं सिद्धं तच्च नसंत्र
वति अन्वयप्रयोजकत्वरूपयोग्यताज्ञानस्यन्नाष्टबोधहेतुत्वात् कथं युगपदे
वेदृशाबोधः स्वर्गसाधनत्वबोधानंतरं कृतिसाध्यत्वस्य बोध इति तन्मतनिग
वदितिचेत् तन्मते हि असंसर्गाग्रहस्य हि तोयस्थितेरपि विशिष्टबुद्धिकार्य्य
कारित्वोपगमात् स्वर्गसाधनत्वस्वर्गकामनियोज्यत्वादीनां पूर्वमुपस्थितानां
मसंसर्गाग्रहवलादेवन्नाष्टबोधेज्ञानसंभवात् न योग्यता विषयकतत्वदा १५०

यविषयकन्नाष्टबोधस्य तन्मते जाकत्वादिति ननु तथापि साध्यत्वसाधनत्व
योर्विरोधात् कथं स्वर्गसाधनत्वकृतिसाध्यत्वयोः पूर्वं एकत्र न विषयत्वमन
नुयागे इति चेत् वैदिकस्थले एकविशिष्टपराम्पय इति हि उद्भगीउ हेतुपताव
छेदकसमानकालीनत्वं विधेयेनाऽसते इत्यपि नियम इति इष्टसाधनत्वमुद्दे
श्यतावच्छेदकाकृत्यकृतिसाध्यत्वस्य विधेयत्वयाच्चानं न संभवति सिद्धवस्तु
धर्मः साधनत्वं असिद्धवस्तुधर्मः साध्यत्वमिति प्रकृते तु एकविशिष्टपरवै॥
शिष्ट्यमिति न्यायेनेष्टसाधनत्वकृतिसाध्यत्वयोर्नासंभवेपि एकत्र द्वयमि
ति न्यायेन याग विषयकं कार्यमिष्टसाधनं इत्यन्वयबोधे बाधकाभावाच्चा
ख्यातार्थमुद्देश्यतावच्छेदकाकृत्यबोधानुपगमात् अन्यथापवनगच्छतीतिवत्
पचतिगच्छतीत्यत्रापिन्नाष्टबोधापत्तेः नचैवं यागेपि इष्टसाधनत्वकृतिसाध्यत्व
योरेकत्रद्वयमिति न्यायेनान्वसंभवे न कथं यागमारापतयोर्विरोध इति वाच्यं
चं तत्र यागस्यप्रकृतस्य तयाप्रत्ययानां प्रकृत्यर्थान्वितस्यार्थबोधकत्वनियमे
न एकविशिष्टपरवैशिष्ट्यमिति न्यायेनैवान्वयबोधस्यानुत्पत्तिसिद्धत्वात् तत्र
द्वयमिति न्यायेनापि अन्तएव तिलकाकर्मकुर्वीतेत्यादौ तिलविशिष्टकर्मकरणवै
शिष्ट्यमिति न्यायेनैव बोधोद्यानूकर्मकरणे नियमेन तिलकसमानकालीनत्व

त॰ प्र॰
१५१

स्नानान्तरितजकस्मृत्यकालीनकर्मकरणस्य नैष्फल्यं यदि चैकत्र द्वयमिति न्याये
नापि ज्ञाप्यबोध इत्यनेन तदानस्य नैष्फल्यानीयत्तिरिति आख्याताथौदित्वप्रताव
छेदकक ज्ञाप्यबोधोनुपपत्त्याच विधिप्रत्ययस्थले एकत्र द्वयमिति न्यायेन
बोधे बाधकाभाव एव नन्ववं पत्नि पत्नि इंस्तोत्र म पुत्रः पुत्रवान् भवेदित्यादौ
पुत्राभावसमानकालीनत्वं पुत्रे बाधितमिति कथं विशिष्टवैशिष्ट्यमिति न्या
येन बोधे इष्टगं इति चेन्न तत्र नञो विशेषितजन्मणा पुत्रविरोधिनी पुत्रे
च्छार्थः स्वविषयसिद्धत्वस्मिन्छाविरोधित्वात् तथा च पुत्रेच्छासमानकालीनत्वपु
त्रेच्छासत्तेदानं न काप्यनुपपत्तिरिति दिक्॥ अत्र स्वर्गकामो यजेतेत्यादौ प्रथम
तः यागविषयकंकार्यसिद्धिः प्रतियोग्यकमिति न द्वितीयो बोधः स्वर्गसाधनं स्व
र्गकाम नियोज्यकं कीर्यं यागविषयं कार्यं कृतिसः ध्यमिति तृतीयो बोधः तत्
मिति प्रथमो बोधः यागविषयकं कार्यं स्वर्गसाधनमिति द्वितीयो बोधः स्व
र्गसाधनं यागविषयकं कार्यं स्वर्गकामनियोज्यकमिति तृतीयो बोधः स्वर्गसाध
नं स्वर्गकामनियोज्यकं यागविषयकं कार्यं स्वर्गकामकृतिसाध्यमिति तुर्यो
बोधः तत्र यागपूर्वं कृतिसाध्यत्वं यागकृतिसाध्यत्वं विनानुपपन्नमिति तदनु १५
पपत्तिज्ञानसहकारेण स्वर्गसाधनं स्वर्गकामनियोज्यको यागः स्वर्गकामकृ

साध्यस्वर्ग इत्योपादानिको यागविशेष्यकः पंचमो बोधः स एव च प्रवर्तकः उपादान
मनुपपत्तिज्ञानं तत्सहकृतज्ञानेन जनितो बोध औपादानिक इत्युच्यते इति वे
दाः काम्यसाधनताधीजन्यमनये इदं काम्यमिति ज्ञानं द्वितीयो बोधः अपरे च
नियोज्यत्वेन पुंसो पूर्वेन्वयः अपूर्वं जनिकाम्यमिकृतिसाधनताम्बवतिया व
यागविषयान्वयवतिकृत्यन्तरानुपपत्तेः कामीकृतिश्च यागविषयानताव
वति यावच्छागः काम्यसाधनत्वेन न तावत्तेकाम्यसाधनत्वेन तावन्मानएवका
मिकाप्यत्वनियमादित्येतादृशाविषयनितरं काम्यमानस्वर्गसाधनं स्वर्गसाध
नताज्ञानजन्यकार्यताज्ञानवत् स्वर्गकामकार्यो याग इति तृतीयो बोधः अत्रया
धिकारित्वेन पुरुषान्वयः काम्यस्वर्गनिष्ठस्वर्गेच्छि याकार्यत्वावगमात् तद्धोपा
गकृतिः कर्तारं विना अनुपपत्तेस्तदुपपत्तिज्ञानवशात् स्वर्गकामो यागकर्त्रे
ति तुर्यो बोधः स्वर्गकामस्येदं कार्यमहमपि स्वर्गकामस्तेनापीदं कार्यमिति
क्रियरः स्वरयागे प्रवृत्तः प्रतिसंधानं पञ्चमो बोधः विधेः प्रवृत्तिनिर्वाहकतया
बलप्यंति मायकाज्ञा पो अपरिपूर्णः पञ्चैव बोधा ज्ञानीति बहवः पदर्शो पूरागिण
बोध इह मानुमानिकं बोधकं पञ्च बोधा इति न व्याः पदंशास्य शाष्ट प्रवेशो
पि प्रथमं यागविषयकंकाप्यमितेव बोधीनतु स्वर्गकामस्य तत्र देश क्रमो
प्र

त. प्र.
१५२

व्याप्यापत्तेः ततउक्तबोधपंचकमिति जडेव बोधा इत्यपि प्राञ्चः स्वर्गकामनि-
योज्यकं यागविषयकं कार्यं तच्चापि स्वर्गसाधनत्वेन ज्ञायमानमिति प्रथमो
बोधः ननु स्वर्गसाधनमिति स्वर्गकामनियोज्यकत्वस्य स्वर्गकामस्येदं कार्य
मिति बोधरूपत्वात् ज्ञायमानस्येष्टसाधनत्वस्याप्रयोजकत्वात् अवा
न्तरइष्टसाधनत्वज्ञानाविकृतिसाध्यत्वबोधानुदयाच्चेति इदं च तावन्न पूर्वकृति
ल घ्घषयकं ननु यागविषयकं तस्मात्क्रियते न तत्रेष्टसाधनत्वस्योपहितत्वात्
ततो मन्नियोज्यकं इदं कार्यं तच्चापि स्वर्गसाधनत्वेन ज्ञायमानमिति पुनरपूर्व
विषयकं मदंशो परागेण ज्ञानद्वितीयं ननु मन्नियोज्यकं कार्यमित्यकारकं
ननु सर्वत्रैव कार्यबोधे नियोज्यत्वस्थापि तस्य स्वर्गसाधनतातायोग्यतावच्छेद
कानां ज्ञानस्यावश्यकत्वात् अपूर्वे कृतिसाध्यत्वं वयायोगे कृतिसाध्यत्वं विना
नुपपन्नं यागविषया कृतिश्चेष्टसाधनताज्ञानं विनानुपपन्ना न हि कार्यत्वा
न्यारन्त काम्यसाधनतया ज्ञायमानं कार्यं नयावैती ति यागे इष्टसाधन
त्वमुपादानेनावन्नैगत्य काम्यमानस्वर्गसाधनत्वेन ज्ञायमानो धिकारी च न
स्वर्गकामस्य नियोज्यस्य कार्यं इत्स्वंच तियं ज्ञानं यागविषयकं क्रममेव चा
धिकारित्वे नान्वयः न तस्मावेत्रः पचती साहा विव स्वर्गकामः यागानुकूलकृति १५२

नानिति स्वर्गकामविशेष्यकश्चतुर्थो बोधः ततः स्वर्गकामस्येदं कार्यमहमपि च
स्वर्गकामः तस्मान्ममेदं स्वर्गकामस्य नियोज्यस्येदं कार्यं स्वर्गसाधनत्वेन ज्ञाय
मानमिति बोधः पंचमः कार्यमहमपि च स्वर्गकामः तस्मान्ममेदं स्वर्गकाम
स्य नियोज्यस्येदं कार्यं स्वर्गसाधनत्वेन ज्ञायमानामिति बोधपंचकमित्याहुः
: केचित्तु इदानीन्तनास्तु विनकृतिसाध्यताज्ञानस्य विधितः साक्षाद्संभवि
तया परंपरयैव विधिजन्यतानस्य प्रपञ्चितत्वेन यागे कृतिसाध्यताज्ञानम
पि नञ्ज्ञाप्य वि लोपादानिकमनुमित्यात्मकमेवेत्याहुः न चैवम् यागे कृतिसा
ध्यताज्ञाने विधिनाजनयितुं न शक्यते तत्रेष्टसाधनत्वस्यानयप्रयोजकत
यापरंपराघटकापूर्वेपि कृतिसाध्यताज्ञानासंभवादपूर्वे शक्तिरिति तत्त्व
तम्. तत्र यदि यागे कृतिसाध्यता बोधो न ज्ञाप्यः का क्षतिः हि कृपयन्न ज्ञाधार्यो यो
ग्यताज्ञानसंपत्त्यर्थमिष्टसाधनताज्ञानसंपादनाया पूर्वे शक्तिरिति न जानी
महे इति दिक् परे तु नियोज्यस्वर्गकामीयस्वर्गसाधनत्वेन ज्ञायमानं स्वीयया
गविषयकं कार्यमिति प्राथमिको बोधः । नियोज्यत्वयोग्यत्वेन स्वर्गकामप्र
कारतया स्वर्गकामस्यान्तर्ज्ञानयायासते ततः अपूर्वे कृतिसाध्यत्वं यागे कृ-
तिसाध्यत्वं विनानुपपन्नमिति तदनुपपत्तिज्ञानात्प्रतीतापूर्वघटितकाम्य

त.प्र.
१५३

साधनताज्ञानसहितात् स्वर्गकामं साधनतीनतायमानः यागकाम्य इति
हितिपो बोधः ततः कृतिराश्रयं विनानुपपन्नेत्यनुपपत्तिज्ञानात् स्वर्गका
मः स्वनियोज्यकस्वर्गसाधनत्वेनज्ञायमानकार्ययागानुकूलकृतिमान् स्व
र्गकामः स्वनियोज्यकस्वर्गसाधनत्वेनज्ञायमानकार्ययागानुकूलव्यापा
रवान् भवतीत्यन्वयबोधः ननु क्रियानुकूलव्यापारवत्त्वस्य कर्तृत्वरूपत
या यागे स्वर्गकामकृतिसाध्यत्वप्रतीतेतत्कर्तृत्वस्यापि प्रतीतिर्जातेति न ति
पबोधवैयर्थ्यमिति चेन्न व्यापारमात्रशक्तस्याख्यातस्य व्यापारबोधकतया
व्यापारस्य कर्तृसाकाङ्क्षत्वात् प्रथमान्तपदविशेष्यकबोधस्य व्युत्पत्तिसिद्धत्वा
त् अत एव तत्रैवाख्यातार्थसंख्यान्वय इति । ततश्चानानधिकृतः कृतिमा
पिन न गतं तत्स्वर्गकामस्य कर्तृत्वं यागजन्यफलभोक्तृरूपाधिकारित्वं विना
नुपपन्नमित्यनुपपत्तिज्ञानात् स्वर्गकामो यागजन्यफलभोक्तेत्यन्वयबोधः
स्वर्गकामो यागस्य कर्ता भोक्ता चाहृत्य पिच स्वर्गकाम इति प्रतिसंधाय यागोम
त्कृतिसाध्य अहं च यागकर्ता अधिकारीति प्रवर्तकं पंचमं ज्ञानमुत्पद्यत इति
प्राभाकरमतमेव व्यणयंति ॥ ननु परमापूर्वबाह्यं कलिकापूर्वाणि तु कल्पाना
ति तेषां सिद्धांतः स च कथं संगच्छते तथाहि अमावास्यायां अमावास्यायजेत १५३

पौर्णमास्यां पौर्णमास्या यजेतेति दर्शपौर्णमासयागौ विहितौ तत्र उत्पत्तिविधयश्च
यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति ताभ्यां
मुपांशुयाजमंतरा यजेतेत्यग्नीषोमीयमेकादशकपालं पौर्णमास्यां प्राप
च्छत् आग्नेयमष्टाकपालं पांशुयागः अग्नीषोमीयमेकादशकपालः पौर्णमा
स्यां ऐंद्रं दधि अमावास्यायां ऐंद्रं पयोऽमावास्यायामिति तेन आग्नेयो
ष्टाकपाल ऐंद्रदधियागाः ऐंद्रपयोयागाश्च अमावास्यायां विहिता एतेषां त्रयाणां दर्श
पौर्णमासयागानां त्रयाणि कृतयागस्वांगभिन्नैकपरमापूर्वं प्रत्यपि साक्षाद्धेतुत्वासं
भवेक्तिका पूर्वस्यापि वाच्यत्वनुपेयमिति चेत् अत्रोच्यते पूर्वस्योत्तररागागि
तरतयाकल्पकरणत्वम फलशिरस्का पूर्वबोधकाख्यविधेरेवादौ प्रवृत्तिःते
न च यागस्याक्षात्स्वर्गसाधनत्वस्य बोधयितुं न शक्यत्वात् परंपराघटकापूर्वे
बोधिते तदुत्तरउत्पत्तिवाक्येभ्यो त्रयाणां आग्नेयादीनां नियोगसाधनता बोधःता
वत्कालस्थायिव्यापारकत्वरूपयोग्यतायातान संभवात् ततश्चाग्नेयादीनां त्र
याणां सुचिनाशितया परमापूर्वरूपव्यापारकत्वबाधे कृतिकापूर्वाणि कल्प्यंते तत्र
द्वारा च तेषां परमापूर्वसाधनत्वमिति कथ्यप्रधानविधिना परमापूर्वे बुधे आ
ग्नेयादीनां परमापूर्वसाधनताउत्पत्तिवाक्यैः प्रतीयते परमापूर्वसाधनतायाश्च

साक्षात्संबन्धितयाकलिकापूर्वाणिकल्प्यंतेइतितन्नसिद्धांतःतत्तुकथमुपपद्यते
तथाहियथाङ्गापूर्वविनाशितयाप्रागेनस्वर्गसाधनताबोधस्तथापरमापूर्वसा
धनतापिदुर्ग्रहैनहिपरमापूर्वमिष्ट्यादीनांप्रत्येकंव्यापारःनचावतत्द्वारास्व
र्गसाधनतानिर्वाहोपिकथंपरंपराघटकापूर्वानुपस्थितापरमापूर्वप्रतीपरं
परवासाधनत्वस्यदुर्ग्रहात्यागत्वावच्छिन्नेपरमापूर्वसाधनत्वग्रहेतत्संभवेपि
पदार्थसावच्छेदकान्तरेयत्वावच्छिन्नेनावत्ताज्ञातापिव्यापारकत्वसाग्रहात्सामा
न्मनोदृष्टत्वात्परमापूर्वस्यापिवाच्यत्वदुर्घटस्यादिति॥अत्रोपाध्यायाः॥येषांयद्
पुरुषक्रियमाणानांयौगपद्यसंभवाद्योग्यताधीनंसंभवतीतिनतूत्तरंचैक
कर्तृभिःक्रियतेप्रथमावगतेस्वर्गसाधनत्वनिर्वाहकतयाकलिकापूर्वाणिकल्प्य
न्तइतितच्चिन्त्यंप्रथमंतेवाक्रमेककर्तृकत्वस्यनियतकालीनत्वस्यचपाणिविहि
तत्वादितिनचीयात्तुकार्यविधिनाकार्यत्वेनपरमापूर्वेबोधितेआग्नेयादी
नांकार्यत्विनोपस्थितंप्रतिहेतुताबुध्यतेकार्यस्याव्यवहितोत्तरक्षणेपिसंबन्धा
न्तकालांतरयावित्वप्रतिसंधानेतत्रस्वर्गस्यचदेहान्तरोपभोग्यत्वप्रतिसंधाना
न्नयागसाक्षात्तज्जनकत्वबोधसंभवःएवमाग्नेयादिनसाक्षात्परमापूर्वजन
कमितिबाधग्रहेपिसाक्षात्कापजनकमितिग्रहेबाधकाभावश्चसमयप्रकारबा

धबुद्धेरेवप्रतिबंधकत्वात्ततश्चकार्यनिरननकत्वप्रतिसंधानेपरमापूर्वरूपे
कार्यजनकत्वमेवग्राह्यंतच्चसर्वैरिच्छतयाकालांतराणत्वेनसाक्षात्तज्जनकता
संभवात्परंपरयैवजनकत्वमितिकलिकापूर्वाणिकल्प्यान्तरइतिआहुः॥अत्रच
दर्शत्रिकेनकलिकापूर्वसहकृतेनएकंसमुदायापूर्वंजन्यतेतत्रपौर्णमासत्रिकेन
प्रत्येककलिकापूर्वत्रिकसहितेनएवंसमुदायापूर्वजननत्रिकेनेरद्दर्शितनपौर्णमा
सत्वेनहेतुत्वेलाघवात्त्रिभिरपेक्ष्यसाधनत्वस्यचन्तीयापत्त्वात्॥तास्मांतुसमु
दायापूर्वाभ्यांफलशिरस्कापूर्वंस्वर्गजनकंजन्यततइतिनवापूर्वविवादः॥तत्रकेचिद्द
ऊःप्रथमंतदीयांतगतिस्यचरमप्रधानस्यसाक्षादेवसमुदायापूर्वजनकत्वतत्स
त्त्वेतज्जनककलिकापूर्वमानाभावःएवंचकलिकापूर्वद्विकसहितेनदर्शत्रिके
णएकंकलिकापूर्वद्विकसहितेनपौर्णमासत्रिकेनसमुदायापूर्वंजन्यतेनएवांस
मुदायापूर्वाभ्यांफलशिरस्कापूर्वंजन्यतइतिनसप्तापूर्वीवादइतिअन्येतुपंचजन्या
पूर्वसहकृतमन्त्रतःसाक्षादेवपरमापूर्वजननयतु।किंतज्जन्यापूर्वस्वीकारेणेति
नपंचापूर्वसहकृतेणत्वाव्यवहितोत्तरक्षणएवपरमापूर्वजननसंभवात्यदि
चषडपूर्वस्वीकारस्तदातेषामेवसाक्षात्स्वर्गजनकत्वसंभवात्कथंपरमा
पूर्वसिद्धिःननुषण्णांप्रत्येकंहेतुतयामितितानांहेतुत्वमेतज्ज्ञानंचपंचानामिवःन

ष्टस्यापि व्यापारकारीद्वत्रस्याकेषांचिद्व्यापारनःकृस्य विज्ञात्वादितिनाबवि
धसयामेतनस्यप्रयोजकत्वेगौरवादननुगमाच्च॥एवंफलस्योत्कर्षांशगोचरत
याफलबोधकपदसमभिव्याहृतप्रधानविधेरेवप्रथमत्वात्॥प्रधानस्यचाशु
विनाशितयागापूर्वजनकत्वेष्टितेपश्चादुत्पत्तिवाक्यानांप्रवृत्तिरितिनत्वैःषड
पूर्वप्रथमक्षणेक्तविधिपरमापूर्वस्यअन्यथासिद्धिःउभयोर्विरोधादितिचेन्नःक्रम
गत्वेकुधर्मावच्छिन्नकारणताकात्समानाकाङ्क्षाप्तिःतत्रचसाक्षात्मेलकासम्भ
वेव्यापारवत्त्वमित्येकविधमेलनस्यापिविलम्बत्वात्॥नहियागस्यव्यापारद्वारामे
लनमितितज्जन्यापूर्वस्यापिव्यापारद्वारामेलनकश्चिद्दुपैतिरितितत्र॥दृष्टिणा
हानस्योत्तरांगत्वावरतत्रप्रधानस्यसाक्षात्परमापूर्वजनकत्वासंभवात्एवंच
उपूर्विस्वीकारेपिपरमापूर्वमावरूपकंदृष्टिणाचोत्तरांगसाक्षादेवंपरमापूर्वहेतुःन
तुतज्जन्यमध्यंगापूर्वंकल्प्यतइतिनतत्रद्वारापेक्षाषडपूर्वद्वारासांगप्रधानव
देनपरमापूर्वजन्यतेदृष्टिणायाअंगतयास्वगतजनिकायाषडपूर्वजन्यपरमा
पूर्वप्रत्येजनकत्वादित्याहुःविस्तरः॥ननुदुरितापूर्वकल्प्यंननुबाध्यमितितेयांसिद्धां
तःतथाचयथायोवाब्राह्मणंयावगोरपेत्तंशतेनयातयादितिविधीनाब्राह्मणावधो
घमस्यपातनारूपनरकविशेषहेतुत्वबोधानंतरंदुरितापूर्वकल्प्यतेतथाकाम्यस्य

लेपिस्यादितिचेन्नःहेतुमतोलिङ्लिनुशासनबलात्यौवपिपमात्रंबुध्यतेननुकारण
त्वंकिंत्वेतद्विधेनिवर्त्तकत्वानुपपत्त्यावगोरणस्यनरकहेतुत्वंकल्प्यतेतच्चदुरितापू
र्वंविनानुपपन्नमितितत्कल्पनंइहचकार्यत्वज्ञानोत्तिरकार्यतामाहकार्यत्वंविनेष्ट
साधनत्वंदुर्ग्रहंसाधनत्वंचान्यथासिद्धिपंचकराहित्येसतिनियतपूर्ववर्त्तित्वरू
पंकार्यसहभूतत्वघटितंकार्यसिद्धनत्वंचदृष्टिकस्यव्यापारघटितमितिकाम्यस्थले
पूर्ववाक्यानानुप्रकृतइतिकेचित्हेतुहेतुमतोलिङ्लिनुशासनबलात्यौवपिर्य
मात्रमुदासावसाधारणकध्यतेनत्वव्यवाहेतुपूर्ववर्त्तित्वरूपंकारणत्वंनतस्यसि
द्धसाध्यसमभिव्याहारेसिद्धंसाध्यायोपयुज्यतेइतिप्रत्यक्षित्वात्कारणत्वाग
मइतिचदुरितापूर्वस्यबाध्यतात्काप्यवाधोगप्राप्यप्याप्तांविरतयोवपियेबोधानं
तरंविधिनिवृत्तिपरत्वग्रहेनावगुरितत्वमितिविधिःहल्प्यतेतेनवावगोरणात्रा
वविषयककार्यमित्यन्वयबोधःतदन्यथानुपपत्त्यावगोरणस्यनरकहेतुत्वंक
ल्प्यतेनहिअवगोरणस्यानिष्टसाधनत्वंविनावगोरणाभावविषयकंकार्यत्वंस
वतीतिदुरितापूर्वकल्प्यमितिन्याऽऽःननुस्वर्गकामोयजेतेत्यादौलिङःकार्यत्वाक्ति
ःयागादृष्टाश्रुविनाशितयागतत्रेष्टसाधनत्वानासंभवात्स्वर्गकामनियोज्य
त्वान्वययोग्यमपूर्वमेवस्वर्गकामनियोज्यकंयागविषयकंकार्यमित्यन्वयबोधेविष

न.प्र
१५६

[illegible]

१५६

२

[illegible]

५८

र.प्र. १५७

पेणोपस्थितापूर्वज्ञानबोधसंभवइतिचेन्नतथापिजन्यत्वेनाजन्यत्वेनचविशेषणेका-
र्याविशेष्यकान्वयबोधजनकतानियमात्स्वर्गकामकार्याविषयोयागइत्येवा
नुभवोपनिपदेनजननायनवैयर्थ्यमाहाहितःतस्यकार्यांशेकृतिसाध्यत्वप्रकारकत्वे
पिस्वर्गकामबोधकयागविषयककार्यमितिकार्यगुणविशेष्यकतानस्यैवप्रवर्त्तक
त्वाभ्युपगमेनाकांक्षितत्वात्आद्यस्यत्वस्यतन्त्रप्रतितरूपतयातन्त्रघटितत्वावच्छिन्न
प्रतियोगिताकभेदकूटरूपस्यानाद्यत्वनिवेशेकार्यविशेषणकभेदानामनिवेशेना
लाघवसंभवेनगुरुत्वविशेष्यतापानिवेधात्मनकसहकृततात्स्वर्गकामकार्यमित्येव
तात्त्वनुपपत्तिपदेनननयितुमशक्यंयागविशेषितकार्यमात्रेस्वर्गकामान्वयासंभवा
त्पयंतुयागविषयककार्यविशेषविषयकंनयान्वयागविशेषितकार्यबोधापत्ति
ः शक्तिरितिअपचात्तौकिंकलिङ्क्रियाकार्यत्वेशक्तिःवेदेतुस्वर्गकामान्वयानुपप-
त्याक्रियातिरिक्तकार्येशक्तिःएवंचशक्यतावच्छेदकैक्याभावेनानार्थत्वापत्तिरितिदिक्आभा
करमतंदूषयतिअन्येत्वितिकार्यत्वएवकृतिसाध्यत्वएवलाघवादितिकार्यत्वविशि
ष्टेशक्तिस्वीकारेकार्यत्वांशेशक्तेरावश्यकत्वात्तनापहातविशेषणन्यायेनतत्रैवशक्तिरि
त्यर्थनित्वपूर्वेशक्तिविरहेःपूर्वानुपस्थितौइष्टसाधनत्वाप्रतीत्यास्वर्गकामकृतिसाध्य
त्वान्वयबोधासंभवइत्याशंक्यतेनचेतिसमाधत्तेबाधकाभावादितिनन्वेतिअन्वयप्रयो १५७

जकरूपवत्त्वरूपयोग्यताज्ञानविरहोबाधकइत्यर्थःअपूर्वानुपस्थितावाकांक्षा
न्वयप्रयोजकत्वरूपमिष्टसाधनत्वस्याज्ञानान्नतदन्वयबोधसंभवइतिभावःकिंत्विति
सिद्धेतिसिद्धान्वयप्रयोजकस्यइवइत्यत्वस्यकरवाहावपिसत्वेनकरकाभिप्रायप्रयुक्तं
पयसासिंचतीतिवाक्यमपियोग्यस्यादितिभावःकिंत्वितिप्रकृतसंसर्गवत्त्वयोग्यत्वम
नुपंगःननुपयसासिंचतीत्यादौसंसर्गस्यवाक्यार्थरूपतयातज्ज्ञानासंभवात्योग्य
ताज्ञानविरहात्कथंशाब्दबोधइत्यतआहतस्यचेतिप्रकृतसंसर्गवत्त्वस्यचेत्यर्थः
संशयेतिसंशयनिश्चयसाधारणंज्ञानंशाब्दबोधहेतुरित्यर्थःयेनेतिसंशयासंभवे
नएवंस्यात्अपूर्वेशक्तिःस्यादित्यर्थःलाघवात्कार्यत्वेशक्तिरवच्छेद्यस्यइष्टसाध
नत्वेशक्तिस्वीकारेपूर्वमुक्तबाधकंनिरस्यतिपश्चेतिनस्यइष्टसाधनत्वस्यबाधकाभा
वात्लिङ्गायोगेइष्टसाधनताबोधनेबाधकाभावादित्यर्थःउक्तमितिआशुविनाशि
नःसाक्षात्साधनतायांपरंपराघटकापूर्वानुपस्थित्यापरंपरासाधनत्वस्यापिग्रहासंभ
वात्तद्रूपबाधकमुक्तमित्यर्थःसाधनत्वेतिसाधनत्वेनरूपेणसाधनताबोधःसचसा
क्षात्साधनत्वासंभवात्परंपरासाधनताविषयकएवेतिभावःइदंचसाधनतात्वंसा
क्षात्परंपरासाधारणमेकमित्यभिप्रायेणयथेतिरूपवांश्चैत्रइत्यत्ररूपवत्त्वेनैवरूपे
णनीलादिविषयबोधइतिभावःअथेतिएकविशेष्यबाधेएकविशेषबाधस्तत्रेतिद्र

त.प्र. बाधे सच्छिद्रघटस्य जलाहरणान्वयबोधे छिद्रेतरत्वेन घटस्य शाब्दबोधः छिद्रेतरेण घटे
१५८ न जलमाहरेत्याकारकः अत इति एक विशेषबाधे शाब्दसामान्यतात्पर्यं तदितरविशेष
प्रकारकं तात्पर्यं लिङ्गाजननीयं तच्च परंपरात्वप्रकारकं ज्ञानं व्यवहरतीति परंपरा स्वर्गसा
धनत्वं स्वर्गजनकापूर्वजनकत्वरूपमपूर्वानुपस्थित्यादि असिद्धमित्यर्थः वस्तुतो वस्तुगत्या
तदन्वयः जलाहरणे तदन्वयः तदितरात्वेन छिद्रेतरत्वेन तदुपस्थापकाभावात् छिद्रेतरो
पस्थापकाभावात् घटपदस्य घटत्वविशिष्ट एव शक्तिरिति भावः ननु घटपदस्य छिद्रेतर
त्वविशिष्टे लक्षणास्तु अत आह नचेति तदुपस्थितिः छिद्रेतरत्वोपस्थितिः मानेति वस्तुगत्या छि
द्रेतरघटस्यान्वये नैवोपपत्तेरिति भावः किमिति साक्षात्त्वबाधे साक्षात्साधनत्वरूपे
ण बाधेपि घटे परासाधनत्वरूपेण बोधानापूर्वबाध्यतेति भावः बाधकः साक्षात्सा
धनता विनापि रूपेण परंपरासाधनताबोधे बाधकः तथा तानं फलपर्यन्तं स्थापि व्यापा
रजनकत्वेन तानं संभवतीति व्यापारानुपस्थितेरिति भावः नन्वेवमिति एवं अपूर्वे शक्ति
विरहे तत्कालेति तत्कालस्थायी फलपर्यन्तस्थायी भावरूपो व्यापारस्तु त्वल्लंघ्यात्तेत्यर्थ
यागध्वंसस्य व्यापारत्वनिरासाय भावेति तदुक्तमिति चिरध्वस्तं कर्म अतिशयं विना व्यापा
रं विना फलायकालान्तरभाविकल्पः यश्च जनन समर्थंपि पातुभवेन स्मृतौ जननीया
पां संस्कारो व्यापार इति ननु तथाप्यपूर्वे प्रमाणाभावः यागध्वंसस्यैव व्यापारत्वसंभवात् १५८

श्रीः न अजनं ममयंपि पातुभवं स्मृतौ जननीपा संस्कारो व्यापार इति ननु तथाप्यपूर्वे
मानाभाव यागध्वंसस्यैव व्यापारत्वसंभवात् व्याप्रेश्च भावव्यापारकत्वघटितत्वे
प्रयोजकत्वेन व्यापारमात्रसिद्धेरिति न च स्वर्गधारापत्तिः मन्नते वरप्रकलस्या
पूर्वनाशकत्वोपगमेन व्यापाराभावादेव नवन्दनुदयादि लिकावंतर्याल्पकलध्वंसस्य
फलप्रतिबंधकत्वोपगमात् उत्तरप्रकलस्यापूर्वकार्यनाशकत्वकल्पनापेक्षया लघु
त्वात् एवं फलजनकं तदितरकारणस्य तत्तत्संबंधेन संयोगस्य तत्तच्छन्नाद्यात्मता
देवन धारोपापत्तिः न च सामग्रीसंपादकस्यादृष्टस्य सत्वात्तस्या व्यापत्तिरिति वा
च्यम् तत्तददृष्टकारणप्रतितत्तददृष्टकार्योत्पत्तेनराभावेन दृष्टकारणसंवत्तेरभावादिति
तत्तत्कारणीभूताभावप्रतियोगित्वं प्रतिबंधकत्वमिति यागस्य प्रतिबंधकत्वापत्तिरिति
वाच्यम् ॥ आरादुपकारिनिवकारणत्वस्येव प्रतिबंधकत्वस्यारात्तिष्टत्वात् अत्र ध्वंसत्वेन ॥
कारणत्वात्तत्तयात्वात् नन्वकर्मनाशाजलस्पर्शादिरूपाविलंघनात् गंडकीबाहु
तरणात् कर्मः क्षरति कीर्त्तनादिति श्रुतेः कृतेयोगात्तीत कीर्त्तनेच सति स्वर्गादिफलाभा
वः सर्वसिद्धः सच्चश्चवन्मतेनुपपन्नः कीर्त्तनेन यागस्य न्यष्टत्वाद्विनाशात् ध्वंसस्य च ध्वं
साभावात् अपूर्वस्वीकारे च कीर्त्तनेनापूर्वनाशादुपपद्यत एवेति वाच्यम् तत्र कीर्त्तना
दीनां फलप्रतिबंधकत्वोपगमात् धर्मः पातादिः कीर्त्तनात् क्षरति फलजनायम्बतीम

त.प्र. र्थकारणादिति अत्राहुः कीर्त्तनादीनामाशुविनाशितया फलप्रतिबंधकत्वासंभ-
१५९ वात् अपूर्वस्वीकार आवश्यक एव न च कीर्त्तनादीनां न प्रतिबंधकत्वं किंतु कीर्त्तन
प्रागभावविशिष्टो यागः स्वर्गहेतुरिति वाच्यं कीर्त्तनसत्वेपि यागांतरीयकीर्त्तनप्राग
भावविशिष्टयागात् फलापत्तेः तत्क्रियोद्देश्यककीर्त्तनप्रागभावविशिष्टतत्क्रिया
त्वेन हेतुत्वे यत्क्रियायां कीर्त्तनं तत्र प्रतिहिंसत्र फलाभावप्रसंगः तस्मात् कारणतावच्छे
दकानाक्रांतत्वात् अथ कीर्त्तनं ध्वंससंबंधेन प्रतिबंधकमिति चेन्न अश्वमेधजन्यस्व
र्गप्रति अश्वमेधः कृत इति कीर्त्तनत्वेन प्रतिबंधकत्वं। अश्वमेधः कृत इति कीर्त्तना
नंतरं पुनरश्वमेधे कृते स्वर्गानुत्पत्तिप्रसंगात् तदश्वमेधजन्यस्वर्गं प्रति तदश्वमेधः
कृतः इति कीर्त्तनत्वेन प्रतिबंधकत्वं वाच्यं तच्च विनष्टदश्वमेधजन्यस्वर्गस्यैवाप्रसिद्धेः न
च यदश्वमेधमुद्दिश्य कीर्त्तनं कृतं तदश्वमेधव्यक्तिजनितफलकाश्वमेधव्यक्तिएतद
न्यतरजन्यस्वर्गं प्रति तदश्वमेधोद्देश्यककीर्त्तनत्वेन प्रतिबंधकत्वमिति नाप्रसिद्धिरि
ति वाच्यम्। जनितफलकव्यक्तेर्विशेषणं प्रत्येकं सर्वासामपि निवेशमादाय विनिगमना
विरहापत्तेः ननु यद्यागकर्तृतासंबंधेन स्वर्गजनितद्देश्यतासंबंधावच्छिन्नप्रतियोगिता
ककीर्त्तनाभाववत्कर्तृत्वेन कारणत्वं ननु कीर्त्तनादीनां प्रतिबंधकत्वमिति चेन्न कीर्त्त
नादेः शास्त्ररूपतया स्तुतिपाठित्वेन नष्टेपि कीर्त्तने फलापत्तेः नचोद्देश्यतासंबंधेन १५९

कीर्त्तनविशिष्टकर्तृत्वेन कारणत्वमिति वाच्यम् तथा सति फलोत्पत्त्यनंतरं यत्र की
र्त्तनमाचरितं तत्र पूर्वफलानुदयप्रसंगात् तस्मात् कीर्त्तनादिनाशतया पूर्वस्वीका
र आवश्यकः एवं प्रायश्चित्तस्य दुःखसाधनदुरितध्वंसकत्वेनापि तत्स्वीकार आवश्य
कः ननु दुःखप्रागभावपरिपालनमेव तत्फलं योगक्षेमसाधारणत्वात् स्वस्य प्रागभावे
पि सत्वात् सुखदुःखाभावान्यतरस्यैव पुरुषार्थत्वेन दुःखप्रागभावस्यैव फलत्वा
च्चिन्तादिति मा पूर्वसिद्धिरिति चेन्न। तन्नाशे दुःखानुत्पन्नप्रागभावे पि माना भावात् वल
वद्द्वेषविषयाभावत्वेन दुःखाभाववदुःखाभावदुःखजनकदुरितध्वंसेपि पुरुषार्थतायाः सं
भवात् दुरितध्वंसस्यैव तत्फलत्वमिति यत्तु परया पूर्वस्वीकारे ध्वंसनाशमपि स्वर्गादि
जनकत्वमेवोपेयमिति प्रधानांगभावानुपपत्तेरपूर्वस्वीकार इति यागरागदंगवैधा
तिनुपपत्तिः रागः फलेच्छाविधिरपूर्वमिति तत्र प्रधानांकपंनाम हृत्तविधिम
त्वं नांगपरिभावोपपत्तिः केचित्तु सकमहिमानादपि फलं अप्रपते तत्र सत्कर्मणीन दानंत
स्वन दत्वात् आकर्णिका पाश्च दानक्रिया याज्ञावादर्द्द द्दानमेव तत्स्य विस्मृतिनेना
दृप दानेनादृष्टांतरं फलसमानाधिकरणं जन्यइति तत्कर्मदानाभ्यानुपपत्यादृष्ट
सिद्धिरिति तन्न किं समूपागादिकं ममफलमात्रत्वयतु किं तत्स्पृहा विशेषस्य फलजन
कत्वोपगमादानपदस्यान्वयात्कृतो पगमस्य तत्ता याभ्यां च सत्यकला दितिनिकृतख्याद् ए

त.प्र. कर्त्तरि स्त्रीक्तिपत्नी पुत्रकृतगयाश्राद्धादित्वेनेतुन्योऽर्थ एवं वक्ष्यत एव श्राद्धे देशितफल
१६० मनुष्यान्तरीतुस्य गहितिगीयते अयाद्दृष्टत्वावच्छिन्नं प्रतिविहितक्रियालिनहेतुत्वपा
यागत्वेनेद्दृवत्तत्राविकर्त्तृर्धैर्वाद्दृष्टमुक्तितनवगद्दृतियाश्राद्धकृत्वापत्रहितुकः पुत्र
स्तत्रअशीघविशीघगणोक्तिने देवमुक्तितृपान्तदृष्टं नाशात्पुत्रस्य स्वर्गत्राकम
संगद्दृति वाच्यम् सहति प्रजजनकादृष्टस्येव मुक्तिविरोधीनपातदृदृष्टस्य स्वीयत्व
तेः नचपत्नी कं पितरमुद्दिश्य गयाधां पुत्रैर्गयाश्राद्धकृतं तत्रनानादृष्टस्वीकारापेक्षया
एकस्मिन् पितर्येव तद्विनमितिवाच्यं पत्रत्रिकोटिकुलोद्धरणे दृष्टपांगंगास्नानादि
कृतं तत्रनानादृष्टस्वीकारेणानुव्यत्वादिति मैत्रमूकाद्धिरस्य कालांतरजा विस्वर्गोप
पादनयादृष्टस्वीकार इति स्वर्गसमानाधिकरणमेवतलव्यते स्वर्गंप्रतिसमवाय
संबंधेनादृष्टस्य हेतुत्वे जाघवान्नवतुपिप्य स्वर्गं प्रतिष्ठनिष्टादृष्टस्य अधिकरण
तयापरं परासंबंधेनैव कारणत्वा पांगौरवात् नचादृष्टं प्रतिगयाश्राद्धस्य परंपर
येवतयाहेतुत्वस्य वाच्यतयानुव्यतेति वाच्यम् पितरमुद्दिश्य श्राद्धकरणात्तदुद्देश्य
तासंबंधेनैव श्राद्धस्य कारणत्वादिफलद्दृव पितर्यपितुद्देश्यतायाः स्वीकरणात् ततः
पितरमुद्दिश्यकारणो श्राधनंद्दृदृति तिरामापणेऽऋतेदिति ननुपत्रपुत्रेण गयाश्रा
द्धकृत्वा संकीर्त्तनं कृतं कमनीनाशाजत स्यश्रीगाकृतः तत्रपितुःस्वर्गापत्तिरितिकीर्त्तन १६०

स्य कमनीनाशाजतस्य इस्यिव परंपरासंबंधेन नाशकत्वं कल्प्यतन्नतेतु प्रतियोगितासं
बंधेनादृष्टनाशं प्रतिसामानाधिकरण्यसंबंधेन कीर्त्तनस्य श्रदृष्टरूपस्यजन्यसंयोग
रूपस्य जन्यस्य इस्यिव कारणत्वं सामानाधिकरण्यं चैकत्रावच्छेदकतयास्वाधिकरणश
रीरे वच्छेदकतया वृत्तित्वरूपं द्वितीयिव समवायेन स्वाधिकरणशरीरे वच्छेदकतासंबं
धेनापूर्वस्य वृत्तित्वरूपमिति चेत्तन्नैष्यतएव फलत्वन्नतेपि पुत्रस्य बजपुष्प्यादिकाम
नयापत्रपित्राक मकृत्वं पुत्रेणाञ्चक मनीनाशाजतस्य इः कृतस्तत्र फलोत्पत्ताविष्टाप
त्तेरेवांगीकरणीयत्वादिति रिक्तनतु देवताप्रीतिरेवव्यापारोस्तु कृतमपूर्वस्वीकारेणे
ति मैत्रम् प्रीतेः सुखरूपतया सुखानुभवरूपतयावाक्षिरत्वेन कालांतरजा विस्वर्ग
जनकत्वासंभवात् त्वसमानविषयकफलंप्रतिवसंस्कारस्य हेतुतया तज्जन्यसंस्कारहे
तुतायाः उपपत्वात् देवताप्रीतेर्व्यधिकरणतया स्वर्गहेतुत्वानुपपत्तेश्चेति॥ अत्रके
चित् देवताचेतन्यएव मानाभावः इंद्रः सहस्राक्षइत्यादिस्तुत्यावबलिनप्रवृत्तिपरत्वा
त् मंत्रप्रकाशितशशिशोवशराधुपेतमुद्दिश्य यागिकानां तत्रैवदेवताव्यवहारस्तुलक्ष
णयापुपपद्यत इत्याऽउत्तल। शिवायगांदद्यादित्यादौ फलजनागित्वेनोद्देश्यत्वरूपसंप्रदा
नत्वशिवस्याऽक्षपत इतिचेत नैवदेवतामदिवृक्षायोदकमासिंचतीत्यत्रैववास्तवसं
प्रदानत्वाभावेपि वैवक्षिकसंप्रदानत्वमारोपापि संगतिः स्वीकारविरहेण तथापिमुख्य

न.प्र. संप्रदानलविरहादितिविज्ञाष्वती॥नयाविद्यिवादिसवक्रांकौंपयोपलक्षवणाल्लक्षंत्रंक्षि
एवच्चपनपिलिनतदत्तपपत्निः॥एते॥सुसैवदेवताले:नैकदेवताकल्पनापत्निश्चाक्षाधा
ग्राधितदेवताना॥वुराइन्नेलक्षुतेक्षयावाएः॥कृत्तुलीवन्नानलदृग्पमोपपनि:॥याधक्षा
नावादितिदेवतावैतन्यनिसिंहः॥नतुनानाधागीकैद्वानेएकद्यासनिघानंकपक्षुपणुति घ
ईंप्रादेरैकलादितिविनानत्नादिवपकतनत्तवुधिविद्योषपवसन्निधानंप्रसिद्योविधिनाश्चि
तिमाद्यमदेकारवक्तन्वेंजादे:॥सावल्लानावानसगामाद्विस्रासाद्यापनानाराधक
कोटिलिसैकदानैकधंतानमितिवाक्यमङ्कदप्रविद्योषसद्दकतमनसावानघ्यातानमितिक्षुघ्यानुसत
नव्याटिफलनेनक्कतेटिप्रादिस्रोतनएवदेवतानितत्तसमानाजाकृ:॥केलिद्राधेतिप
दमिनृदेवतादेद्रानादेस्रितनत्तुष्पतिपदनिर्देशलमिवदिदेवतालंनिर्देशतिनाक्षप
धानीनिद्दृशः॥तपाज्रदेद्रानपातदिताविकृपपादेप्रितवोधितंवत्तुष्पतिपदनिर्देश
लंतत्तसंख्याराणेषनातताणाईक्रामेतूचायदीपादितिविरहेनवोधनात्क्रानीयाधाकृपा
लङलनतादितिनवत्तुष्पतिपदनिर्देशलंवोधतेदेद्रानादेप्रितंवत्तुष्पंतिपदनिर्देश
लंतनलंनवतीतिनवक्र:॥साद्या:॥ध:तिः॥साद्दुस्क्रवतुष्पादिक्रानावः॥तत्रावत्तुष्पंक्रदृलानाल
वनहितम्देवतालमप्यधाः॥साम्यदेवतेतिदेवताशेषिकारोपलाल्टा॥नवाधैक्तिदिते ६६१

नव्यत्तुष्पविामंत्रलिगिनवाधुनः॥देवतासंगतिलक्षुवेलंदपरंपरमितितथावदेवता
तानेतहितालक्कदेद्यानयावोधनंदेद्यानयावोधनेत्रमतिदेद्यानादेप्रितनवत्तुष्पतिप
रनिर्देशलक्षदपदेवतालतानमितल्लानाक्षपदतिवाक्यमदेवतालैकदेद्यास्यनवत्तुष्पंक्रि
पदनिर्देशलतानमितल्नाक्षपदतिवाक्यमदेवतालैकदेद्यास्यनवत्तुष्पंतिपदनिर्देश
ध लक्रुष्यलमहिताषलात्त्तवात्रंवत्त्तथैनपदनिर्देशलक्षदेवतालतानिसतितहितप्र
हवैदेद्यानादेस्रितनवत्तुष्पंतिपदनिर्देशलक्षटेदेवतालंघ्यतदइतिनवत्तक्रामिधीपाकृ
धानइल्लनानिर्देवतामितिदितिनाक्याददेप्रकल्यषस्यदेवतालंवोधतितलप्रपइति
पदसितिकधंतस्पदेवतालमितिविक्त्नतत्राद्याप्यालक्कसँवक्तकल्पोपपानात्क्षुष
तप्याधिईः॥डापितिवत्तुष्पतिपदनदत्तुष्पतिपदनिर्देशपेतेपनवत्तुष्पंतिपदं
निवदेवतानवेदितिविक्ता॥क्षपोपादितात्रुक्षापदेवतातिमतेदेद्यानयादेप्रितंवत्तु
ष्पतिपदनिर्देशलयल्तत्रुमावोपदितेनवत्तुष्पंतिपदनिर्देशलंदेवतेनव्याः॥नवाधै
लापिदेवतालनिसमितिकृष्णेदेवताधान्नेतन्यमितिवाक्यंनयाप्तिविद्यिफ्सप्राकेन
नलाप्तनत्वेवेदेश्यपेलादिपदमेवदेवतेन्वपुत्रमितिवाक्यमा॥नवाधिवृत्तुष्पंतिप
दसैवप्राधान्याद्भपरमिीपजनकदाणलामिप्राधिषणवाताद्योकेतिविभ्रमवेदतिपदेनो
कावियपक्वल्जानिलिनन्नुवक्रपेइतितत्लान्युत्पमपोदेषतेतिनवर्द्दापसादृतिना

रप्यचितुर्थ्यंनुपपत्तिरिति वाच्यं स्वाहादिप्रयोगेऽपपदत्तिन्त्क्तिरितुपगमात् तत्रुपपदं समी
पवर्त्तिपदं तद्योगा॥ विज्ञक्तिरित्यर्थात् मैवम् अर्थपि हितत्वात् एवं स्वैव देवतात्वे विशेषण
मूताया स्यैव देवतात्वमुचितं एवं च प्रयोगे वा हृ नायोसाद्दै देवताद्वयप्रसंगात्॥ इंद्रः
सहस्राक्ष इत्यर्थनादस्येंद्रमुपेसीतेति विधौ समभिव्याहारे णैक वाक्यतया तस्यैवोपस्य
त्वात् शिवसंनारादीते त्वादौ महादेवमुद्दिश्यपत्न्वेक्षि शिवस्वत्वेन शिष्टानां व्यवहाराच्च
अत एव इत्यं वस्यागो ननु चक्र पिइति मनन्त त्वक्ष्णेतिवोधितत्वेन तथात्यागस्य फलहेतु
त्वान्नकीहृान वहं तीन्त्यत्र तरविदजनिन्नतु घो पर्वापसंगत्वे पित्र्य वधातिनिय मत्॥ मं
त्रकरणकह विस्त्याग त्वागित्वेन नु दिश्पेश्यत्वं देवतात्वम पि वे तन देवता एवं स्वाहादि
योगे वतु ब्युतृत्रीस नेवम पंचार्थनिच वीजाहरा णां देवतात्वं गीकाराक्तदनुपपत्तिः॥
तन्म मते पि वीजाक्षराणां च तुर्थ्यंतत्वनियमेन देशनादेशितचतुर्थ्यंतपदनिर्दिष्टपत्न
रूपदेवतात्वस्यानुपपाद नात् मंत्रप्रकाशित शक्ति शिखरग्रुपेन मुद्दिश्यह विस्त्याग
भागित्वेन याज्ञिकानां तत्रैव देवतात्वव्यवहाराच्च शिवस्य मंत्रत्वेदेन वीजाक्षराणां ना
नात्वेनाननुगतेषु शिवपदस्त्रा क्रियहे गौरवाच्च तस्मान्मंत्रकरणकह विस्त्यागवागित्वे
नोद्देश्यत्वात्वमिति मतन्त्तितः मंत्रकरणको योह विस्त्यागस्तत्राग्नित्वेनोद्देश्यत्वं मंत्रप्रयोज्य
हविः संबंधेनोद्देश्यत्वस्य यागकर्त्तरिसत्त्वान्नात्व्याप्तिवारणाय हविरितिह विप्रयुक्त्वा १६२

गकमत्विकीदात् कस्मादिति मंत्रकरणक घृतादिरूपहविः स्वत्वत्यागितयोद्देश्यत्वस्य
प्रतिगृहीतरिसत्वान्नात्व्याप्तिवारणाय मंत्रपदं त्यागकर्म्मत्मंत्रपरं नयो बितः इष
करूपादिमानावीणदौ पत्न्या अपि स्वत्वत्यागित्वात्प्रतिव्याप्तिवारणायोद्देश्य
त्वमितिन्नचमन्द्र पितः मंत्रकरणकहविः संबंधात्वान्न देवतात्वस्यादिति वाच्यं तस्य दे
वतात्वान्नुपगमात् तज्जातीयहविः संबंधस्य विवक्षितत्वात्तु वायनेस्यापि देवतात्व
मिष्यत एव मंत्रपद वा स्वधा स्वाहान्यतर मितिकेचित् तदसत्तेन विशेषणान्तत्रा
निव्याप्तिरित्यपरे उद्देश्यत्वं च उद्देश्यता वच्छेदकधर्मवत्त्वरूपं योध्यम्॥ नेनन मौञ्शारा
रानवच्छिन्नतादृशापामात्सन्नातिव्याप्तिः शराशरावच्छिन्नस्यैवोद्देश्यत्वात् देवतात्वा
मित्यांतिनावधर्मीतिस्याद्या पूर्वकल्पे निस्ठापिता पूर्वयोरुन्तयोः कल्पनाद्वारंपारि
एवस्त्वापित्वं धर्मापिानं कृत्यातामिन्नर्थः नत्वेवनितिएव यागत्वस्थापिता स्वीकारे
दृष्टुत्वं यागनाशकाजि प्रत्यक्तेतिप्रत्यक्त्वविषयस्य कारणतया तसत्वात् मन्त्रतेन्याया
गस्याप्यविनाशित्वाद्विपत्स्त्वादेवनत्तलौकिकप्रत्यक्तमितिनावः आत्मेति प्रथमक्ष
णोत्पत्त्वान् द्वितीयक्षणेतत्सत्सहिपिन्नीयादिक्षणेप्रत्यक्तमित्यर्थः विषयस्य कार्य
कालवृत्तितयाहेतुत्वेनत्तीयादिक्षणेनतानादिप्रत्यक्तमित्यपिप्राचेणद्वितीयक्षणे
ग्यत्वाग्निधानं श्रव्यपानुनतीयक्षणे क्षेपत्वादि दिवोध्यं कूटानामितिज्ञन्यत्वे यागस्य

स्थापितेन यागस्यादिशातीतदृशार्थापत्तेर्यमिति तन्नस्यादित्यर्थः अपूर्वस्वीकारे तु तस्यातीन्द्रि
यतया न तन्मात्रापत्तिरिति भावः विधिं निरूप्यार्थवादं निरूपयति विधिभिन्न इति। विधि
भिन्नो वाक्यविशेषोऽर्थवाद इत्यर्थः विशेषेणु पादानान्न घटमानयेत्यादिवाक्ये तिव्याप्तिः वि
धौ तद्वारणाय विधिभिन्न इति अर्थवादं निरूपयति स्तुतिरिति अर्थवादस्त्विस्यर्थः यथाक्रमं तत्र
दृष्टान्तमाह तदुक्तमिति विरोधि विरोध्यतावच्छेदकविशेषणज्ञानार्थपी विरोधे यथा आदि
त्यो यूपवति यजमानः प्रस्तर इत्यादि अवधारित इति प्रमाणान्तरेण विज्ञातार्थज्ञापक
ः शब्द अनुवाद इत्यर्थः यथा पच्छः सिरमं भिन्नमित्यादिवाक्यं परिणति सरसमाम्रफलं
परिणति विरसं पनसफलमित्यादिरूपं वाक्यं तत्र प्रत्यक्षप्रमाणेन तत्तदर्थानिर्णया
दिति बोध्यं तद्दानादिति अयद्दानात् तयाचनरकादेतदुपादापकः शब्दोऽन्यथार्थवाद इत्य
र्थः यथा जरायाम र्थसर्ररः यथा वा राज्यं श्रीष्यमान्येरर्प राजेति प्रदुत्सनेति॥ इयतीप्रबन्धे
न सपरिकरस्य शब्दस्य प्रमाणत्वं व्यवस्थाप्य शब्दस्य नित्यत्वादिमतनिरासाय तस्यानि
त्यत्वं व्यवस्थापयति सोऽयं शब्द इति अनित्यः उत्पत्तिमान् ध्वंसप्रतियोगी वा दृष्टविर
सावृत्तस्यानित्यत्वं मारमारूढत्वम् इति गुरवः भाचाकराः ओमेति ओमभावगुणत्वादि
त्यर्थः मात्रपदेन घटाकाशसंयोगेन व्यभिचारः तत्परिमाणवत् गगनपरिमाणवत्॥
अत्रप्रयोजकत्वं हि हेतुरस्तु साध्यमास्तु इति प्रकृतानुमाने प्रतिकूलतर्कविरह इत्यर्थः अत्र

यश्शब्दस्य नित्यत्वं विना अन्यानुपपत्तेरिति सोऽयं गकार इत्यत्र हि एतत्कालीनगकारे पूर्वका
लीन गकाराभेद प्रत्यभिज्ञा न विषयो न स्यादित्यनुकूलतर्क इति भावः अयं सोऽयं गका
र इति प्रत्यक्षो बाधकाभावात् प्रमात्वे बाधकाभावात् बाधकाभावेऽपि भ्रमत्वे विषयाव्य
वच्छेदापत्तेरिति भावः उत्पादादि नितु अस्योगकार इति प्रतीतेरित्यर्थः आदिना विनाशप्र
तीतिपरिग्रहः बाधिकः नित्यत्वबाधिकाः तस्याः उत्पादादिप्रतीतेः व्यंजकेति अस्मिन्मत
ते विनाशीयवायुः शब्दोत्पादकः एतन्मते व्यंजकः न याच्वउत्पन्नो गकार इत्यत्र गकारव्यंज
कवायुरुत्पन्न इति वायुनिष्ठोत्पत्त्यादिप्रतीतेर्न शब्दनित्यत्वबाधकत्वमिति भावः ग
कारेति तथा च गकारउत्पन्न इत्यत्र वायोर्वायोरनानात् गकारनिष्ठोत्पत्तेरेव विषयत्वा
न्न वायुनिष्ठोत्पत्त्यादिविषयकत्वमिति शब्दनित्यत्वमिति भावः न चासाविति गकार
गतत्वेनोत्पत्त्यादिप्रतीतिः बाधकाभावादिति प्रमात्वे बाधकाभावात् प्रत्यभिज्ञानं सोऽयं
गकार इत्याद्याकारकं प्रत्यभिज्ञानं बाधकं उत्पादादिप्रत्ययस्य बाधकं अन्यथेवउत्प
न्नादिमत्त्वप्रतीत्यवसानो यं गकार इत्यभेदावगाहिप्रत्यभिज्ञाः बाधिता किं न स्यादित्यर्थ
। अत्र उत्पत्त्यादिप्रतीत्यभेदावगाहिप्रत्यभिज्ञानयोर्बाध्यबाधकभावे विनिगमकमस्ति
येनः प्रत्यभिज्ञानस्य बाधकत्वेनोत्पत्त्यादिप्रतीतेर्भ्रमत्वं कल्पनाच्छक्यनित्यत्वं न स्यादि
ति भावः नन्वेवमिति एवमित्यस्य विवरणं विनिगमकाभावेति बाध्यबाधकभावे विनि

न.प्र. गमकाभावेऽपीत्यर्थः । विनाश्यादिति एवकारेण प्रत्यभिज्ञानस्य व्यवच्छेदः । स्फुट इति येन तद्बला
च्छब्दनित्यत्वं सिद्ध्येदिति भावः । उपमानेति द्वयोः प्रमाणयोः कल्पनापेक्षया एकस्यैव प्रमाणत्व
१६४ कल्पनायां लाघवादित्यर्थः । उपमानस्यापि प्रमाणत्वेनोपपत्तिमाह अन्ये त्वित्यादिना । निगम
कमिति बाध्यबाधकभावे विनिगमकाभावादित्यर्थः । तुल्ययोः उपमानादिप्रत्यभिज्ञान
योः एतत् विरुद्धार्थयोरुपमानः प्रमाणत्वमित्यर्थः । अनयोरेकतरं बाध्यं विरुद्धार्थकत्वादि
ति भावः । प्रत्यभिज्ञानस्य सर्वांशं गकार इति प्रत्यभिज्ञानस्य गत्वेति इदन्त्वावच्छिन्ने गत्वा
वच्छिन्नाभेदो भासते । तेन नु तत्र घत्वभेद इति गकारव्यक्तीनामुत्पत्त्यादिप्रत्ययबले
न नानात्वेऽपि गत्वेन रूपेणाभेदोऽस्त्येवेति न कस्या अपि प्रतीतेः भ्रमत्वमिति भावः । शंकते
तथा सतीति गत्वावच्छिन्ने भेदानवगाहित्वेन तदर्थः । न त्विति सोऽयमित्यत्र हि इदं
त्वावच्छिन्ने तत्र घत्वभेदः एवं सति न तु गत्वावच्छिन्नाभेद इति भावः । तद्धर्मेति सोऽयं
मित्यत्र तद्व्यक्त्यभेदो न विषयः किंतु तद्व्यक्तिवृत्तिगत्वावच्छिन्नाभेदः । स च व्यक्तिभेदेऽविरुद्ध १६४
त्वाभेदानुभवत्वेवेति भावः । गकारोऽयमिति गकारोऽयमित्यत्र स्वरूपतः गत्वावच्छिन्ना
भेदो विषयः न तु सोऽयमित्यत्रैव तद्व्यक्तिवृत्तिगत्वावच्छिन्नाभेद इति भावः । तथेति । तद्व्य
क्तिवृत्तित्वानवगाहित्वादित्यर्थः । तथा च यत्र गत्वे तद्व्यक्तिवृत्तित्वं न भासते तत्र गकारोऽय
मित्याकारः यत्र तु तद्व्यक्तिवृत्तित्वं भासते तत्र सोऽयमित्याकारः । तथा च न सोऽयमित्यत्र गका

रोऽयमिति प्रतीत्यापत्तिरिति भावः । ननु व्यक्तीनां भेदे प्रत्यभिज्ञानेऽभेदावगाहि प्रत्यय इति त
दनुपपन्नं एवं च सोऽयमित्यस्य तद्व्यक्तिवृत्तिगत्वजात्यवच्छिन्नाभिन्नोऽयमित्यर्थे यदि सा
जात्यनन्तजातीयो वा मिथ्याकारापत्तिरित्याशंकते तथा सतीति । गत्वरूपजात्यवच्छिन्ना
भेदविषयकत्वे सतीत्यर्थः । तज्जातीयोऽयमिति । न च तज्जातावच्छिन्नाभेदत्वे स्यैव तज्जाती
योऽयमिति प्रतीतिविषयकत्वादिति भावः । जातित्वेति यत्र जातित्वेनोपस्थिततद्व्यक्तिवृत्ति
त्वोपस्थितगत्वावच्छिन्नाभेदो भासते तत्र तज्जातीयोऽयमिति यत्र तु तद्व्यक्तिवृत्तित्वेनैवोप
स्थितगत्वावच्छिन्नाभेदः तत्र सोऽयमित्याकार इति न तत्र तज्जातीयोऽयमित्याकार इति भावः । आ
ऽऽत्मस्वरसो ज्ञायते ननु सोऽयं घट इति प्रत्यभिज्ञानानुपपत्तेः घटादीनां स्थैर्यसिद्धिः । न तु घटादी
नां क्षणिकत्वेऽपि पातेनैक्यादिभासो भेदः प्रत्ययोपपत्तेर्न तत्राधिकेति स्थैर्यमात्रमुच्छिद्येतेति
न प्रत्यभिज्ञा एवं सोऽयमिति प्रतीतेर्विषयो वाच्यः । तथा चैतस्यात्र मतत्वं विनानोपपत्तिरिति
यत्तु विजातीयस्य संयोगस्य कार्यतावच्छेदककोटौ श्रावणत्वं ज्ञानिमत्त्वनतेऽवाच्यं त
त्र कविषयकत्वश्रावणत्वयोः विशेष्यविशेषणभावे विनिगमनाविरहः । मन्मते तु कत्वमे
वेति तच्चिन्त्यं मन्मते विषयतासंबंधेन कव्यक्तेरेवावच्छेदकत्वात् अगृहीतकत्वगत्वादि
पतातिकज्ञानस्य कोलाहलजनपातत्वसत्त्वात्संबंधे एव विषयताकत्ववलस्य अवच्छेदक
त्वासंभवात् इति वस्तुतस्तत्तारत्वमंदत्वरूपविरुद्धधर्माध्यासात् भेद इति दीनत्रिलखिमा

त.क. नाभावः अभेदावगाहिप्रत्यभिज्ञाया असंभवात् एवं तारः स एव मंद इति नित्तारत्वमंदत्व
योर्विरोधेपि तत्प्रतियोगिकं तारत्वं तत्प्रतियोगिकं मंदत्वं च विरुद्धमेव कत्वादिना संक
१६५ रात् तारत्वादीनां कत्वादिव्याप्यानामननुगमेपि सजातीयसाक्षात्कारप्रतिबंधकतावच्छे
दकवृत्तिजातित्वेन तेषामनुगमात् इदमनुगतमन्तानुपपत्तिः सजातीयत्वस्य स्वाश्र
यजातीयत्वरूपः लौकिकविषयतया मंदसाक्षात्कारं प्रति त्वावच्छेदककगणविछिघत्वरूप
यासमानावच्छेदकत्वप्रत्यासत्त्या तारस्य प्रतिबंधकत्वमिति तारत्वे प्रतिबंधकतावच्छेदक
त्वमिति। ननु तत्रावच्छेदकत्वं न तत्त्वपास्विधिकाएत्वं मंदनुत्ताविरहविशिष्टतारत्वेनैव
प्रतिबंधकतया तारत्वेपि तत्त्वपसिधिकरणत्वाभावात् अवच्छेदकोटिप्रविष्टत्वविरह
णेव तारसाक्षात्कारं प्रति तारवृत्तुका विरहविशिष्टमंदनुत्ताविशिष्टमंदत्वेन प्रतिबंध
कतया मंदत्वेतिप्रसंग इति चेन्न एवं मंदनुत्ताविशिष्टत्वेनैव प्रतिबंधकत्वात् मंदनुत्ता
त्वेनैव समानाधिकरण्यप्रत्यासत्त्या प्रतिबंधकत्वेतु मंदात्वेपि तारप्रत्यक्षानापत्तेबु
भुक्तितः त्वेनैव प्रतिबंधकत्वं न यावन् मुख्यविशेष्यविधयावच्छेदककोटिप्रविष्टत्वरूपा १६५
वच्छेदकत्वस्य विवक्षणात् मंदत्वेनातिप्रसंग इति दिक् शाब्दस्य द्रव्यत्व विभुत्वादिनदम
नंदस्यापि विनष्टात्विति विभूगीति। निःस्वनूलिंगधादीव्यभिचारात् इत्वत्वादिति। द्रव्यत्वमा
त्रं घटादौ व्यभिचारि इति निसंख्य द्रव्यत्वादिति विशिष्टहेत्वनुधाननं उक्तदोषादिति शब्दनि

त्यत्वे तन्मते विनाक्षा प्रत्यपयो अमित्वकल्पनमपेक्ष एकस्मात् दावगाहिप्रत्यपस्यैव भ्रम
त्वकल्पनायान्याय्यत्वादिति नित्यत्वे उक्त दोषादिमर्थः शब्द इति साक्षात्इति साक्षात्त्वं बं
धत्वं च स योगसमवायान्यतरत्वं प्रयोजकत्वादिति अनुकूलतर्काभावादित्यर्थः प्रतिकूलतर्क
मप्याह। शब्दस्येति निरूपिते तिशब्दो द्रव्यं च वत् रूपिद्रव्यं वाच्य वेत् निरूपद्रव्यं वा। तत्र च
रूपिद्रव्यत्वस्य प्रत्यक्षबाधितत्वान्नीरूपद्रव्यत्वमेवेति भावः। न याववशशेषादिनीरूपद्र
व्यस्यात् बहिरिंद्रियप्रत्यक्षविषयो न स्यात् रूपिद्रव्यत्वं तु प्रत्यक्षबाधितमिति शब्दस्य द्र
व्यत्वसाधने प्रतिकूलतर्क इति भावः। वर्णातिरिक्तो वर्णाभिव्यंग्यो नित्यः शब्दः स्फोटः तस्यैवा
नित्यादिप्रत्ययाभावात् नित्यत्वेन न तद्दृष्टांतीकृत्यान्येषामपि वर्णानां नित्यत्वमिति वैया
करणमतं दूषयति वर्णेति शब्दमात्रस्य पक्षत्वे ध्वन्यात्मकशब्दे बाधः अंशतो बाध
मगासिद्धिश्च शब्दसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यतायां तु स्फोटे तन्मते सिद्धसाधन
मतः शब्द इति विहाय वर्णेत्युक्तं अत एव पक्षातिरिक्तस्यैव दृष्टांतत्वमिति मते पिनक्ष
तिरिति ध्येयं ध्वन्यन्येति शब्दमात्रस्य ध्वनौ व्यभिचारितात् ध्वन्यन्येति ध्वन्यन्यत्वं घटादौ व्य
भिचारि इति शब्दत्वादित्युक्तम्। अत एवेति हेतोः स्यादिप्रत्ययेनानुमानस्य बाधितत्वाच्च
प्रयोजकत्वाच्चेत्यर्थः। शेषांतरमप्याह हर्षतेति दृष्टांतासिद्धिमेवोपपादयति नहीति प्रमाणे
तिप्रत्यक्षादेरभावादिति भावः स स्फोटः वर्णेकदंबेति वर्णसमूहेत्यर्थः आशुविनाशितया र

न.प्र. नीयाक्षणवृत्तिध्वंसप्रतियोगित्वाभावेनान्वेति एकक्षणवृत्त्युपस्थितानां वा इत्यर्थः अपमस्त्यल
मिति पदानामिति प्रोक्तेनान्वयि प्रत्यक्षे तिष्ठत्वेन हेतुत्वादिति भावः तथाचेति पदाना
१९६ मप्रत्यक्षत्वे च तदप्रत्यये पदाप्रत्यये आह्लाद्यस्मरणेनानुमित्यादेरप्यभावादिति भावः क्ष
यमिति वृत्त्या पदजन्यपदार्थोपस्थितेरेव शाब्दबोधांगत्वादिति भावः तस्मात् पदानाम
प्रत्यक्षत्वात् पदं स्फोट इति तथाच तेनैव पदार्थोपस्थिति भावः तावद्वर्णेति पदघटकीभू
ततावद्वर्णेष्वित्यर्थः तावतां पदघटकीभूतानां तावतामित्यर्थः तावदिति पदघट
कीभूततावद्वर्णप्रत्यक्षं प्रत्येवेत्यर्थः आशुविनाशिनां तृतीयक्षणवृत्तिध्वंसप्रतियोगि
नां क्रमिकरणं तदधिकरणक्षणध्वंसानां तत्र तुरुपापतानां नां मेलनमस्तीति क्रमि
काणामिति क्रमिकरणामपि घटपरादीनां मेलनमस्तीति आशुतरविनाशिनामिति आ
शुतरविनाशिनोः क्रमिकयोर्पिशानयोर्मेलनमस्तीति आशुतरविनाशिनामिति वृ १९६
वचनोपदानां घकारेति टकारमात्रोच्चारणे पीति प्रत्यक्षत्वमूर्वणातिरेति वर्णानां नामाप्य
प्रत्ययेऽपयोगित्वं किन्तु स्फोटकप्रत्यय एव तस्य च मलिंबिदेकवर्णानां यपत्तेः वर्णाति
रोपादानवैयर्थ्यादित्यर्थः तदसंभवादिति पदघटकीभूततावद्वर्णानिबध्यानामेकदा
संभवादित्यर्थः प्रथमं घघत्वनिर्विकल्पकं ततः घघत्वविशिष्टबुद्धिः ततः टटत्वनि
र्विकल्पकं ततः टटत्वविशिष्टबुद्धिरिति एकदा वर्णाशमितवतानानामप्याशुविनाशि

तया यौगपद्यासंभवादिति भावः तद्व्यंजक इति स्फोटव्यंजक इत्यर्थः स एव पूर्वपूर्ववर्णानि
वरसंस्कारसहितश्चरमवर्णापितं च एव कृतं व्यर्थं स्फोटेन तद्धेतोरेवास्तु किं तेनेति न्याये
न पूर्ववर्णानिवरसंस्कारसहकृतचरमवर्णप्रत्यक्षेणैवार्थप्रत्ययोपपत्तेर्नेतदर्थोनुप म
पत्त्या स्फोटकल्पनमित्यर्थः मास्तु अर्थप्रत्ययानुपपत्त्या स्फोटसिद्धिः पूर्वपूर्ववर्णसंस्का
रसहकृतचरमवर्णाभिव्यंगेन स्फोटेन पदप्रतीतिजन्मेत इति पदप्रतीत्यन्यथानुपप
त्तिरेव स्फोटसाधिकास्त्वित्याशंकते अथेति न सिद्धिः स्फोटसिद्धिः तस्य पदप्रत्ययस्य क्र
मेतिधाव्यवहितोत्तरवर्तित्वादिः नद्यव्यवहितोत्तरवर्तित्वाद्यनादिविषयत्वादित्यर्थः नसं
भवतीति वर्णानामाशुविनाशित्वात्पाश्चात्त्यवस्थावर्णानिवरः प्रत्ययो न संभवतीत्य
र्थः प्रत्यक्षात्मवतावद्वर्णप्रत्ययासंभवेऽपि स्मरणात्मकस्यैव तस्य संभवः स्यादिति
मनुतावद्वर्णानिवरस्मरणसंभवेऽपि न तस्य पदरूपत्वं पदस्य तावद्वर्णात्मकत्वादित्या
हन्यन्वितितावद्वर्णेति पदघटकतावद्वर्णमात्रमित्यर्थः अर्थेतिकेवलवर्णमात्रस्यार्थप्रत्या
यकत्वादित्यर्थः अन्यथा वर्णमात्रस्यार्थप्रत्यायकत्वे आविरोधापत्तेरिति दीनपदादर्पिन
दाविषयकशाब्दबोधापत्तेरित्यर्थः वर्णद्वयस्योभयत्राविशिष्टत्वादित्यर्थः दीनेत्यत्राप्या
नुपूर्व्याः सत्वादानुपूर्वीविशिष्टैवेतितत्रत्यः आनुपूर्वीप्रत्ययः आनुपूर्वीणीवरसंस्काराश्र
येन तत्स्मरणस्याप्यभावादिति भावः योत्तरत्वं दीनिघायव्यवहितोत्तरत्वं हीत्यर्थः अनादौ संस्का

न.प्र. रेसर्वस्यापि टकारस्य घोत्तरत्वात् अव्यवहितोत्तरत्वं च तद्व्यक्तिध्वंसाधिकरणक्षणध्वंसानधि
१८६ करणत्वे सति तद्व्यक्त्यधिकरणक्षणध्वंसाधिकरणीभूतो यः क्षणस्तदुत्पत्तिकत्वं यद्यप्येतस्य
तत्तद्व्यक्तिघटितत्वादननुगमस्तथापि स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वसंबंधेन घवत्त्वं
बोध्यम् संबंधाननुगमस्यादोषत्वाददोषः यत्तु टस्य घोत्तरत्वं घटवृत्तीच्छादिपत्वं दुस्सादि
मत्त्वाच्च कालिकसंबंधेन ननु घवत्त्वितान वत्वं ततः अपेक्षाबुद्ध्यात्मकतानस्य क्षणत्रया
वस्थायित्वसंभवेन न साव्यवहितोत्तरत्वघटकत्वासंभवादिति तन्न इच्छावत्त्वनिवेशेपि
न दोषा नयोर विशेषापत्तेर्वारणात् इच्छाविशेषनिवेशेन्व विशेषस्य दुर्निरूपत्वादिति नस्य
घोत्तरत्वरूपानुपूर्वीविशेषस्य प्रत्यक्षत्वं अलौकिकप्रत्यक्षत्वं अलौकिकप्रत्यक्षत्वं अलौ
किकप्रत्यक्षविषयत्वं घोत्तरं टमिति घोत्तरत्वांशे लौकिकं टांशे लौकिकं श्रावणप्रत्यक्षं प्र १८६
मितो यः पूर्वोक्तरीत्या परत्वं आनुपूर्वीविशेषविशिष्टवर्णत्वं तथा च शाब्दबोधे आनुपूर्वीवि
शेषविशिष्टवर्णज्ञानत्वेन कारणत्वे वर्णविशिष्टानुपूर्वीज्ञानत्वेन कारणत्वमादाय विनिग
मनाविरहात्त्व वर्णज्ञानत्वेन आनुपूर्वीज्ञानत्वेन च भिन्नभिन्नरूपेणैव कारणत्वमिति
सूचितं दृष्टगीति अर्थापत्तिरपि प्रमाणं अर्थापत्तिपदवाच्यमपि प्रमाणं दृष्टागमप्रस
तादिप्रमाणवत्तुष्टमभिन्नमित्यर्थः तेन न सिद्धसि विधानतः न न्यायनिष्ठत्वं कल्पयति
न्वात्रेतिगन्निनोजितत्वतानेप्रत्यक्षादिनानुमानादिच परिग्रहः किंत्वनुपपत्तिज्ञानं प्रमाण

मित्यनुपपद्यते सैवेति अनुपपत्तिज्ञानरूपैव अर्थापत्तिः अर्थापत्तिरूपं प्रमाणमि
त्यर्थः तज्जन्यप्रमापि अर्थापत्तिरित्युच्यते इति ध्येयम् आदिनेति पीनत्वमात्रादे
नैवभो मिनिव्य भिचरीतिदिवाभोजित्वसतीति अभोरित्यस्य स्वरूपसिध्यादिवाभोजिने
सती विविशिष्टमुपात्तं दिवाभोजित्व अपानेव्यभिचारातिपीनत्वादिति यन्नेव नि
तिपः रात्रौ भुंक्ते नासौ दिवाभोजित्वे सति पीनः यथादिकाभोजी अपीनो चेति व्यतिरे
केणैव व्यतिरेक्यमाने नैवतदुपपत्तेः रात्रिभोगित्वतानोपपत्ते नाथ पित्वारयं प्रमा
णद्धयेपमितिभावः ननु तथा सति अर्थापत्तिः प्रमाणमिति व्यवहारः कथमतआ
हः अर्थापत्तिपदं चेति केवलं चेति केवलव्यतिरेकि निशेषसैवेत्यर्थः नन्वनुतिनो
मीत्यनुव्यवसायात् अनुपपत्तिप्रभवतादृशज्ञानोत्तरमर्थापयामीत्यनुव्यवसाया
दपप्तिक्लिप्तजातितद्धीतदवच्छिन्नकरणतया प्रमाणांतरस्वीकारआवश्यक इत्यत
आह संक्षेपइति अर्थापत्तित्वस्यानुमितित्वव्याप्यत्वोपगमात् अत एवतादृशज्ञानो
त्तरं नानुमिनोमिति न धीरितिदिक् इति घप्रमाणांतरवादिमतं दूषयितुमाह अविदि
तेति विशिष्टव्य अविदितकर्त्तृकः शब्दविशेष इतिहासादिरूपः स एवैतिह्यमिति
व्यवह्रियते तस्य प्रमाणांतरत्वं दूषयति सयदीतिशब्दविशेषः परिप्रमाणं यदि प्र
मितिकरणं तदा शब्द एव प्रमाणं न त्वतिरिक्तं नो चेन्न प्रमाणं नो चेत्प्रमाणमेव न

 प्रमाणपदवाच्यमेवनतुजन्यप्रमितिजनकत्वाज्जनकत्वान्नानांतरं न प्रत्यक्षादि
प्रमाणेभ्यो भिन्नं तत् प्रमाणमित्यर्थः चूलादिति प्रत्यक्षानुमानोपमानशब्दा एव प्रमा
 णानि तत्वतिरिक्ता मोलकर्थः इयता प्रबंधेन प्रमाणं निरूप्य प्रमाणत्वस्य परतो ग्राह्यत्वं
साधयितुमाह नन्विति सर्वमिदं प्रमाकरणं निरूपणं प्रमाणत्वसिद्धौ प्रमाणत्वज्ञाने
विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुतया प्रमात्वज्ञानं प्रति प्रमीकरणत्वज्ञानस्य
न वादिति भावः तदेव तु प्रमात्वमेव तु कुतः सिद्धं किं तत्स्य ज्ञान विषयः तत् प्रमात्वं प्रत्य
क्षं प्रत्यक्षप्रमाणगम्यं तत्स्वत्वं प्रमात्वप्रत्यक्षमिति वा तदर्थः ज्ञानस्येति प्रमात्वाश्रय
ज्ञानं विना प्रमात्वज्ञानासंभवात् प्रमात्वस्य ज्ञानघटितत्वादिति भावः ननु ज्ञानानी
न्द्रियत्वमेव कुत इत्यत आह अनपेति ज्ञानस्य प्रत्यक्षत्वे विषयतत्सन्निकर्षयोः स
त्वात् ज्ञानधारैवस्यात् ननु घटपटादि विषयांतरविषयकं ज्ञानं कदाचिदपि स्या
दित्यर्थः अनुव्यवसायांतरकल्पनं प्रतीत्य न व्यवस्थापत्स्य व्यवसाय एवानुव्यवसायः न
त्वतिरिक्त इति ज्ञानस्य प्रत्यक्षत्वमेवेति गुरुमतं दूषयति अत्र तु रव इति स्वं प्रकाशते ज्ञा
नमिति यत्र तत् तादृशं ज्ञानं स्वात्मानं स्वस्वरूपं स्वाधिकरणं स्वस्य ज्ञानस्याधिकरणं आ
त्मानं च विषयीकरोतीत्यर्थः अत एवेति ज्ञानस्य घटादिविषयज्ञानग्राह्यविषयक
त्वादिवः इच्छं चेति सर्वस्य व्यवसायस्यानुव्यवसायत्मिकत्वमेव ज्ञानस्य सर्वस्य ज्ञानस्य मि

तीति मितिः ज्ञानं मानाश्रयात्मा मेयं घटादि तद्विषयत्वकत्वात् मितिमानमेयानां ज्ञानस्य ए
कसामग्रीकत्वादिति भावः त्रिपुटीति प्रमानां पुटानां समाहारः त्रिपुटी मितिमान् विषया
इति यावत् तत्प्रत्यक्षत्वेनेत्यर्थः चक्षुरिति चक्षुर्जन्यं यत् घटज्ञानादि तेन स्वात्मनः चक्षुर्जन्य
घटज्ञानस्वरूपस्य विषये इति विषयस्य विशेषेन्द्रियसन्निकर्षस्य च हेतुत्वादित्यर्थः वि
षयस्यासत्वमाह युक्तिरूपं न चेति न हीत्यर्थः उत्पद्यमानं घटज्ञानादि पूर्वमिति पूर्वक्षा
विनए वकरणत्वापितिभावः सन्निकर्षस्यासत्वमाह सन्निकृष्टं चेति यत्र विषयतया
प्रत्यक्षं तांत्तूर्वक्षणेतितत्र विषयस्य सन्निकर्षस्य चापेक्षणीयत्वेन उत्पद्यमाने तत्र न
त् इति भावः ननु तस्मात् ज्ञानेन्द्रियसन्निकर्षस्य ज्ञानप्रत्यक्षहेतुत्वानभ्युपगमेन विषय
तत्सन्निकर्षघटिताया एव सामग्र्या अपेक्षणमात् ज्ञानस्य प्रकाशत्वेबाधकाभाव
: न चेच्छादि प्रत्यक्षानुरोधेन आकाशसमवेतमानसत्वावच्छिन्नं प्रति मनः संयुक्तसम
वायस्य हेतुतया ज्ञानप्रत्यक्षे व्यभिचार इति वाच्यम् तत्रापि व्यवहितपूर्वक्षणावच्छेदकाया
धिकरणेकारणाभावस्यैव व्यभिचारतयाः वच्छेदाधिकरणे ज्ञाने पूर्वक्षणावच्छेदेन का
रणसत्वेऽपि व कारणाभावसत्वस्याप्यंगीकारेण व्यभिचारासंभवादित्यत आह कथं चेति
चाक्षुषादिनादिनास्या इति परिग्रहः मह इति स्याद्दीनि पिच्छूतरूपस्य प्रयोजकत्वात्
कापीर प्रत्यक्षत्वादिति भावः अन्यचेति संबंधमूल्यस्य चक्षुषा पद्दे चक्षुषोऽनुपजनत्वण

त.प्र. प्रत्यक्षापिग्राह्यपत्तेरित्यपिद्रष्टव्यं केचित्तु बाह्यत्वादिपदानुपादाने परिग्रहःउ
द्भूतरूपवत्त्वइत्युपलक्षणं उद्भूतत्वं स्पर्शविदित्यपिद्रष्टव्यं स्यान्नचिउद्भूतस्पर्शवत्वए
१८८ वद्रव्यस्ययोग्यत्वादितिभावः तेननात्मनो घटादिस्यान्नेपिचान्नसंभवइतिवाच्यम्ः
ज्ञानेप्रत्यक्षेअनवस्थापत्तेः किंत्वनुमितियाथामितिचरूपतमाहयद्यपीतिस्वविषय
ज्ञानविषये घटादावित्यर्थः ज्ञानतेतिज्ञातोघटइतिप्रतीतेरितिभावः तत्रचज्ञानंनि
मित्तकारणंघटादिकं समवायिकारणं असमवायिकारणंनुनापेक्षितं तत्राचकार्यस्या
समवायिकारणकत्वमितिनियमस्तैरनंगीकारादितिबोध्यमूतथैवज्ञानतयै
वज्ञाननायाइतिनघटेपिज्ञातोघटइतिप्रतीतेः तत्रचसमवायिकारणस्यघटस्या
सत्वेनज्ञाततायाज्ञानासंभवात् स्वरूपसंबंधरूपंज्ञानविषयत्वमेवज्ञातोघटइति
प्रतीतिविषयइतिज्ञाततायांप्रमाणत्वाभावेनतेनहेतुनाज्ञानानुमानासंभवादिति १८९
भावः साध्याप्रसिद्धिमप्याहज्ञानरूपस्येतिसाध्यप्रसिद्धिहिअनुमानांगंप्रकृतेतु
ज्ञानरूपस्यपक्षविरुद्धप्रसिद्धाज्ञाततायांतन्निरूपितव्याप्तेरग्रहात्तत्पातदनुमान
संभवइतिभावः तस्मात्ज्ञानस्याप्रत्यक्षत्वेपिनप्राचिकस्यप्रमाणस्योर्हेमत्वमितिपू
र्वपक्षेसमाधानमाहउच्यतइति योग्यत्वात् मनसः योग्यत्वात्तन्नवैवंज्ञानस्यमनायो
ग्यत्वेतज्ज्ञानमपिज्ञानं ज्ञानमपि एवं तज्ज्ञानं ज्ञानमपि ज्ञानज्ञानंज्ञानमपिअनव

स्थितिसर्वत्रविषयतयास्त्रिकपरूपापाःसामग्र्याः सत्त्वादितिभावः उत्तरपतिविषयं
नरेतिघटादिविषयकज्ञानसामग्र्याः प्रतिबंधकत्वेनेत्यर्थः मानससामग्र्याःउर्वत्तं
त्वादितिभावः फलेतिसर्वत्रमानससामग्र्याः तत्रवेन इतरसामग्रीविघटनस्याउ
वजलौघवमादितिभावः शंकतेतथापीतितथापिज्ञानस्यप्रत्यक्षत्वेपितस्यज्ञा
नस्यनक प्रमाणं अनुमानेनइदंज्ञानप्रमासमर्थप्रवृत्तिजनकत्वादित्यादिरूपेण
साध्येतिसाध्यस्यप्रामाण्यज्ञानस्यज्ञानत्वेतिघटो ज्ञानवान् ज्ञाततावत्वादित्यादिना
ज्ञानविधेयकानुमितिजन्यमानाघटत्ववतिघटत्वनकारकत्वरूपप्रामाण्यमपिवि
षयीकरोतीत्यर्थः ततः ज्ञानमात्रनिरूपितव्याप्तेः ननुतत्प्रमात्वमपितस्यज्ञानस्यप्र
मात्वमपिसिद्ध्येदित्यनंतान्वयिननुज्ञानत्ववत्प्रमात्वमहदेवाधकाभावरूपतथा
हसाध्येतिननुरूपांतरेणननुसाध्यतावच्छेदकरूपेणननुतद्विधेयकानुमितौतन्नि
रूपितव्याप्यवत्तापरामर्शोहेतुः ननुतद्धर्मविच्छिन्नविधेयकानुमितौइतिरूपांत
रेणविनज्ञानननतआहः अन्यथेतिअन्यथासाध्यतानवच्छेदकरूपेणापिअनुमितौ
जानेदहनेत्विष्टंतुजाघवत्तानेतरवाधातिरिक्तस्येत्येपीध्यमूतेनवह्निव्याप्यधूमवान्
पर्वतइतिपरामर्शादपिमहानसीयवह्नौज्ञाघवमानमनान्महानसीयवह्निनिश्च
यस्यात्तवारितारेतेवाधकत्वात्महानसीयवह्नित्वादिनानुमितायापिनदतिः तत्रच

क्लित्वादिना महानसीयवह्निप्रमीपरामर्शे पर्वतीयमहानसीयवह्निमानूनवेति संज्ञापापत्ते
रिति ध्येयम् अत्राविचारादित्यत्र माहितज्ञानतापायावारादित्यर्थः नन्वज्ञातत्वेव प्रपितता
८० पि त्वाकार्येति वाच्यम् एवं सत्यप्रतितामपि स्तीकृत्याद्यामापपस्यापि तत्तोग्रहापत्तेरिति
एवं प्रमात्वस्याद्यापि दुर्ग्रहत्वेन तद्धर्मविशिष्टनिरूपितत्वाग्रेरपि दुर्ग्रहत्वमाहसाध्येति
स्वति वेतिज्ञानमिवक्तत्र्या मा एपवादिति चाव्रमपिभास्तनएवेतिभावः स्वप्रकाशतापा
दिति विषयतस्यान्विकर्षयोः प्रत्यक्षहेतुपात्वन्विन्नस्य विषयकत्वासंभवादिति भावः किं
चैव मिति एवं प्रमाणस्य स्वतोग्राह्यत्वे ज्ञान इति इदं ज्ञानं प्रमा न वेति प्रामाण्यसंज्ञापीय
स्याहित्यर्थः ननु तत्र प्रामाण्यानिश्चयात् संज्ञायानुपपत्तिरत आह ज्ञानग्रह इति निश्च
यात् प्रामाण्यस्य निश्चयान् अयं घट इति ज्ञानोत्तरं हि इदं ज्ञानं प्रमा न वेति प्रामाण्यसंज्ञा
यः तत्र अयं घट इति ज्ञानस्य स्वप्रकाशतया स्वविषयकत्वेन स्वनिष्ठप्रामाण्यस्यापि निश्च
यादिति भावः निश्चिते प्रामाण्ये संज्ञाप्रयोगान्न तन्निश्चयस्य तत्संज्ञाय प्रतिबंधकत्वादिति ८०
भावः ननु यत्र प्रामाण्यसंज्ञायस्तत्र ज्ञानमपि घटज्ञानस्वविषयकमिति तत्र प्रामाण्यक
हेन दोष इत्यत आह अग्रह इति ज्ञानस्याग्रहे इत्यर्थः स्वप्रकाशज्ञानापादृतिपदि तत्र घट
ज्ञानं न स्वविषयकं तदा त्रिपुटीप्रत्यक्षतावादानइत्यर्थः तु अनुव्यवसायेनाहमपी
ति इदं ज्ञानं प्रमा न वेति संज्ञायां घटज्ञानरूपधर्मिज्ञानाभावात्तद्धर्मिकप्रामाण्यसंज्ञायासत्त्व

वादिति भावः ननु तद्वेतोरिति न्यायेन धर्मिन्द्रियसन्निकर्षस्यैव हेतुत्वं ननु धर्मिज्ञानस्ये
त्यत आह समानेति तत्कोटिसाधारणधर्मवत्तया धर्मिज्ञानस्य तत्कोटिकसंशयहेतुता
वधारणादित्यर्थः अन्यथेति तु रगाद्वेगेन गच्छत अनेकवृक्षे सन्निकर्षेपि पस्यैव धर्मि
एणि ज्ञानं तत्रैव पनसत्वादिसंशयो नान्यत्रेति धर्मिनियमाय धर्मिज्ञानहेतुत्वादिति भि
भावः न च तत्रापि विषयमाहात्म्यादेव धर्मिज्ञानहेतुत्वमुपेयं तदेव संशयहेतुरि
ति वाच्यम् तथापि यत्कोट्यासहचरितः सहचरोपहीतः यत्कोटिसहचरितानेकधर्मोप
लंभो वा यत्र तद्धर्मवत्तया धर्मिज्ञानस्य तत्कोटिकसंशयं प्रति धर्मिकायस्य हेतुत्वाव
रूपकत्वादेतित्यर्थात् धर्मिज्ञानस्य संशयहेतुतया संशयपूर्वं ज्ञानग्रह आवश्यकः तेन प्रा
माण्यस्य विषयीकरणे संशयायोगः अविषयीकरणे तु तदप्रामाण्यग्राहकयावज्ज्ञान
ग्राहकसामग्रीग्राह्यत्वरूपस्वतस्त्वं न प्रामाण्यस्येति भावः ननु तद्विशेष्यकत्वे सति तत्प्र
कारकत्वरूपं प्रामाण्यं च प्रत्यक्षमिति घटप्रामाण्याश्रयविषयविषयकेन घटमहं जानामी
त्याकारकप्रामाणिकज्ञानेनेत्यर्थः विशेष्यकत्वप्रकारकत्वाकाम्ययहे वियारात् प्रामाण्य
ग्रहस्तत्र तत्र ग्रहसूपपत्तिः स इति तत्र हमेवादानुपपादयति तथाहीति व्यवसायेति व्यवसा
यएव तत्र प्रत्यासत्तिरिति भावः अतः घटत्ववतः प्रागुपस्थितत्वेनेत्यर्थः तद्विशेष्यकता
घटत्ववद्विशेष्यकतासंसर्गेनारूप्यघटत्ववान् विशेष्यकतासंबंधेन ज्ञाने परिज्ञातेति

शेषणस्मात्तद्वतः घटत्ववतः इदं तु सामान्यतो विशिष्टबुद्धौ विशेषणधियो हेतुत्वादनुप-
स्थितयोर्विशेष्यत्वप्रकारत्वयोर्ज्ञानानुपगमान्निष्प्रामाण्यवस्तुतोऽप्रतियोगित्वानुयोगित्वयो-
रिवानुपस्थितयोरपि तयोः प्रकारतया ज्ञाने बाधकाभाव इति ध्येयं न चैतद्वहिः पदार्थ-
विशेषकत्वानङ्गीकर्तृणां सामर्थ्यञ्च न्यायाऽश्वस्यापि विशेषरूपघटोपन्यासापत्तेरिति भावः
अन्यथा तु पनयसहकारेण बहिर्विषयकत्वानां सामर्थ्यं कवीति वाक्यप्रयोगे वाक्यार्थ-
ज्ञानस्य हेतुतया मनसैव तत्र वाक्यार्थज्ञानादिति भावः अनुव्यवसायेपि घटमहं जाना-
मीत्याकारकानुव्यवसायेपि विषयेति घटादेर्ज्ञानमित्यर्थः घटत्ववद्विशेष्यकग्रहमुपपा-
द्य घटत्वप्रकारकग्रहमुपपादयति घटत्वमपीति विषयविषयतावच्छेदेन समुपग्रहे इति संस-
र्गरूपानुग्रहेत्यर्थः तन्नयस्य घटत्ववद्विशेष्यकत्वस्य घटत्वप्रकारकत्वस्य चैकत्रता-
नेग्रहसंभवे एवं हि तत्प्रकारेण हि एतावदेव तद्विशेष्यकत्वं तत्प्रकारकत्वमेव किं ति
अन्यत्र घटत्ववद्विशेष्यकत्वस्यान्यत्र घटत्वप्रकारकत्वस्य प्रामाण्यत्वापत्तेः सामानाधि-
करण्यसंबंधेन तद्विशेष्यत्वविशिष्टं तत्प्रकारकत्वमेव प्रामाण्यस्वरूपमिति भावः पू-
र्वमिति विशिष्टबुद्धौ विशेषणधियो हेतुत्वादिति भावः विशेष्यताप्रकारतयोः प्रका-
रतया ज्ञानस्यैव प्रामाण्यज्ञानतया संसर्गविधया तज्ज्ञानेपि न प्रामाण्यमिति भावः
ननु प्रकारताविशेष्यतयोः संसर्गतया ज्ञानमेव प्रामाण्यज्ञानं वाच्यं अत आह किं च

तिएन रूपितद्विशेष्यकत्वविशिष्टं तत्प्रकारकत्वमपि वक्ष्यतीति यत्र वह्नौ गुंजात्वभ्रमः गुं-
जायां च वह्नित्वभ्रमस्तत्रातिव्याप्तिरित्यर्थः अत्रातिव्याप्तिमुपपादयति अस्ति हीति वह्नि-
विशेष्यकत्वं गुंजात्वप्रकारकतावच्छेदेन गुंजावच्छेदेन च वह्नित्वप्रकारकत्वं किं तु तत्प्र-
कारकत्वं प्रामाण्यमित्यनुपपन्नमेव वह्निगुंजापुंजयोर्गुंजापुंजवह्नी इति ध्येयमे च गुंजाविशे-
ष्यकतावच्छेदेन गुंजात्वप्रकारकत्वस्य वह्निविशेष्यकतावच्छेदेन वह्नित्वप्रकारकत्व-
स्याभावान्नातिव्याप्तिरिति भावः तद्वदिति प्रकारतया संसर्गतया वा विशेष्यकत्वस्य प्र-
कारकत्वस्य चानुव्यवसायेन ज्ञानेपि विशिष्टवैशिष्ट्यमित्यन्यायेन विशिष्टवैशिष्ट्यबोधे
विशेष्यतावच्छेदकप्रकारकनिर्णयस्य हेतुतया तद्विशेष्यकत्वप्रकारकनिर्णयं विना
तद्विशेष्यकतावच्छेदेन तत्प्रकारकत्वरूपप्रामाण्यज्ञानं न संभवतीति भावः स्वमते
न प्रामाण्यग्रहमुपपादयति अत्रोच्यत इति द्वितीयेनेति अनुव्यवसायेनेत्यनुप-
ज्यते प्रथमं अयं घट इति ज्ञानं ततः तज्ज्ञानत्वनिर्विकल्पकं ततो घटमहं जानामीत्यनु-
व्यवसायस्ततोऽनुव्यवसायस्य ज्ञानत्वात् घटत्वमपीति व्यवसायः ततश्च घटमहं जानामीत्य-
नुव्यवसायस्तेन प्रामाण्यं परिगृहीतमित्यर्थः उपस्थितेरिति तथा च तद्विशेष्यकतावच्छे-
देन तत्प्रकारकत्वग्रहे बाधकाभाव इति भावः अवच्छिन्नत्वं च स्वरूपसंबंधरूपं बोध्यमनवच्छेद-
निनिधर्मितानस्य संज्ञापदहेतुतया ताज्ञानग्रहे प्रामाण्यग्रहासंज्ञायोनस्मादित्यर्थः दोषेतिक्र

न.प्र. नस्या सद्दशापन्नत्वरूपदोषेत्यर्थः संशयेति प्रामाण्यसंशयेत्यर्थः ननु सामग्र्याः सत्त्वे कुतो न
१८२ श्चय इत्यत आह अग्रमेति तद्योग्यत्वेनावश्यं पद्यहेदित्यर्थः तस्य पुरुषत्वस्य वास्तवसामग्री
सत्त्वे पुरुषत्वव्याप्तत्वोपपत्तौ पुरुषत्वसंशयो न स्यादिति नाप्रमाण्यसंशयजनकदोषनिश्चय
विघटकत्वं वाच्यमिति भावः न चैवमसति दोषेऽनुव्यवसायग्राह्यत्वे उत्तरवर्ति असतीति
पावदिति स्वाश्रयाः प्रामाण्याश्रयाः तदनुव्यवसायापायावतस्तदृष्टौ त्वं मिश्रयते स्वतत्त्व
मित्यर्थः द्वितीयानुव्यवसायेन प्रामाण्यग्रहान्नैयायिकमते लिंगसाधनमतो यावदिति
प्रामाण्याभाववत्त्वानिश्चयकाले प्रामाण्यग्रहाबाधकारणायासतिप्रतिबंधकइतिर
छं च प्रामाण्यग्रहप्रतिबंधकाभावकालीनयावत्त्वाश्रयानुव्यवसायग्राह्यत्वं मिश्रमते स्व
तस्त्वं बोध्यं तच्च इदं रीत्या तीयाग्रहत्वे च नास्मन्मते इति शेषः एवंच द्वितीयानुव्यवसायेनग्र
हित्वा प्रामाण्यग्रहे स्वसाध्यसिद्धौ प्रामाण्यरूपसाध्यप्रसिद्धौ तदाह कं प्रामाण्यग्राहकं इदमि १८२
ति द्वितीयानुव्यवसायेन गृहीतप्रामाण्यकं पुरुषत्वानमित्यर्थः प्रमा पुरुषत्ववति पुरु
षत्वप्रकारकं करादिमत्त्वेनिकरादिमद्विशेष्यकत्वे सति पुरुषत्वप्रकारकत्वानत्वादित्यर्थ
ः स्थाणौ पुरुषत्वभ्रमे व्यभिचारवारणाय करादिमद्विशेष्यकत्वे सतीति पुरुषत्वप्रका
विशेष्यकद्रव्यत्वप्रकारकताने व्यभिचारवारणाय पुरुषप्रकारकत्वानत्वादिति विशि
ष्टहेतुना धावने संप्रतिपन्नवत् द्वितीयानुव्यवसायेन गृहीतप्रामाण्यकपुरुषत्वान


वदित्यर्थः पुरुषत्वानस्य दृष्टांतत्वे चान्वयदृष्टांतासावाद्य द्वितीयानुव्यवसायेन गृहीत
प्रामाण्यकपुरुषत्वानवदित्यर्थः पुरुषत्वावस्य दृष्टांतत्वे चान्वयदृष्टांतासौ कीमाह यद्वेति
पक्षपुरुषत्ववति पुरुषत्वतानं न तत्र करादिमति पुरुषत्वत्वानंनयथा स्थाणौ पुरुष
त्वं भ्रम इति व्यतिरेकीत्यर्थः प्रथममिति द्वितीयानुव्यवसायेन प्रामाण्यग्रहात्पूर्वं
तदभाववति तत्प्रकारकत्वरूपभावरूपा प्रामाण्याभावव्यतिरेकिणा साध्यतदूप
पीतदप्रसिद्ध्या साध्याप्रसिद्ध्या तदभावाप्रसिद्धिः साध्याभावज्ञानं तस्य साध्याभावस्य
प्रतियोगिरूपत्वात् अप्रामाण्यरूपत्वात् नवेति नहीत्यर्थः तथाच तदभावत्वेनैव ज्ञा
ने प्रतियोगितानं कारणमिति भावः ननु केवलमप्रामाण्याभावानुमितिरत आह ए
वं चेति तद्व्यापकतया यस्याभावरूपाप्रामाण्यस्य व्यापकतया हेत्वभावेन गृहीतेन
हेतुनाम्याभावः अप्रामाण्याभावः सिध्यतीति अप्रामाण्याभावत्वेन विनाप्यप्रामा
ण्याभावानुमितिर्भावः ननु साध्येति विशिष्टबुद्धौ विशेषणधियो हेतुत्वादिति भावः अ
प्रामाण्येति तत्ताने प्रामाण्याभाव इत्याकारकापादत्यर्थः साध्यविशेष्यकानुमितौ साध्य
प्रसिद्धेरनंगत्वादिति भावः आत्मा मिति ग्रथमं च प्रामाण्याभावानुमितिरास्तामतद
तीतिकैव द्वितीयानुव्यवसायेन प्रामाण्यग्रहानंतरं अनु विना प्रामाण्यानुमितेरव
गीतरित्यर्थः अयं भावः निष्कंपप्रवृत्तिप्रतिगृहीतप्रामाण्यकनिश्चयत्वेन हेतुत्वेन

त.प्र. भावरूपप्रामाण्यनिश्चये गौरवात् भावरूपं तद्वति तत्प्रकारकत्वरूपं प्रामाण्यमेव निश्ची
नीयमिति स्वमतं प्रथमं साध्याप्रसिद्ध्यादिना दूषयित्वा अनुमानेन प्रथमं प्रवृत्तस्य पो
षिप्रामाण्यग्रह इति ननु तान्नं हि द्विविधं तदभाववति तत्प्रकारकत्वं तद्रहिततत्प्रकारकत्वं ना
तत्र तदभाववति तत्प्रकारकत्वाभावरूपाप्रामाण्याभावः सिद्ध्यतु तद्वति तत्प्रकारकत्वमा
दायैव पर्यवसन्निव्यापकतानवच्छेदकरूपेणाभावानुपगमेनु तत्प्रकारके तदभाववति
तत्प्रकारकत्वाभावस्य तदभाववद्विशेष्यकत्वाभावमात्रपर्यवसायितया तदभाववद्वि
शेष्यकत्वे सति तद्विशेष्यकत्वेन हेतुना तद्वति तत्प्रकारकत्वं तद्विशेष्यकत्वमात्रपर्यवस
न्नं सिध्यतीति चेत्तन्न यापि तद्विशेष्यकत्वरूपसाध्याप्रसिद्धेः प्रागभावीयसंस्काराद् दृष्टद
विशेषो बोधकसहकृतात्तत्स्मृत्युपगमेनु समर्थप्रवृत्तिजनकत्वरूपान्वये नैवोपपत्तौ किमन
याकुसृष्ट्या पूर्वन्त्वैत्रत्वादिघटितप्रामाण्यग्रहे प्रागभावीयसंस्काराभावादिति न किं चिदेत
त् किंवा प्रामाण्याभावरूपमपि प्रामाण्यप्रथमं दृष्टतानेयुग्रहमित्यादि किं चैतिकुरादिम
द्विशेष्यकत्वे सति पुरुषत्वप्रकारकत्वानवत्वं हेतुः अप्रामाण्याभावहेतुः केनग्रह्यकिन
न्नतानविषयः अनुव्यवसायेनेति उक्तन्यायेन द्वितीयानुव्यवसायेनेत्यर्थः तत्प्रकार
कत्वग्रहः पुरुषत्वप्रकारकत्वग्रहः यत् इति कुरादिमति पुरुषत्वतानत्वग्रहके णानु
व्यवसायेन पुरुषत्ववति पुरुषत्वप्रकारकत्वग्रहासंभवादित्यर्थः तत्र परामर्हेतुग्राहके

णपुरुषत्ववति पुरुषत्वप्रकारकत्वग्रहमपहाय एवकुसृष्ट्यादरइति अनुव्यवसायेन
करादिमद्विशेष्यकत्वे सति पुरुषत्वप्रकारकत्वग्रहे सतितेन प्रामाण्यानुमानमिति अ
नुमानकुसृष्ट्यादरइत्यर्थः सर्वतानांतं पर्याप्तत्वात् तत्प्रकारकत्वानत्वमेव प्रामाण्यमि
ति प्राचाकरमत दृष्यपिति अन्येत्विति तत्प्रकारकत्वानत्वमेवेत्येवकारेण तद्वतीत्यस्य
व्युदासः न वेति शुक्तौ विदं रजतं इति ज्ञानस्यापि रजतत्वप्रकारकत्वेन तत्पदं पि रजत
त्वांशे प्रमास्यादित्यर्थः तद् सिद्धेरिति रजतत्वप्रकारकशुक्तिज्ञानासिद्धेरित्यर्थः तदृसि
द्धिमेव विवृणोति नहीति शुक्तौ रजतत्वं नास्ति इति तत्रकथं रजतत्वप्रकारकं ज्ञानं वि
षयाभावेन लौकिकप्रत्यक्षासंभवादिति भावः मानमस्ति प्रमाणमस्ति व्यवहारानुप
पत्तिरेव मानमिति शंकते कथं तर्हि तिरजतत्वप्रकारकशुक्तिज्ञानासिद्धावित्यर्थः व्यव
हारः शब्दप्रयोगः तत्र व्यवहर्तव्यज्ञानस्य हेतुत्वादिति भावः तन्नेति व्यवहर्तव्यतावच्छे
दकासंसर्गाग्रहएव व्यवहारे कारणं न तु व्यवहर्तव्यज्ञानावच्छेदकप्रकारकं ज्ञानं कारण
मिति भावः ननु प्रवृत्तिं प्रति पुरोवर्त्तिनि इष्टतावच्छेदकप्रकारकज्ञानस्य हेतुत्वशु
क्तिगोचररजतत्वज्ञानाभावे कथं तत्र रजतार्थिप्रवृत्तिरत आह रजतत्वेति तत्रेष्ट
तापुरोवर्त्तिनि इष्टतावच्छेदकासंसर्गाग्रहएव प्रवृत्तिहेतुः न तु इष्टतावच्छेदकप्रकारक
ज्ञानं तद्धेतोरिति न्यायादिति भावः अपेति भ्रमप्रसीमासाधारणप्रवृत्तिसामान्ये रजतत्वप्र

न.प्र. कारकज्ञानत्वसमरजतत्वछेदप्रवृत्तिहेतुत्वेनावधारणात्कर्षतेन विनाशांशप्रवृत्तिरिति
२६४ भावः तेन विनाशुक्तौरजतत्वप्रकारकज्ञानेन विनाशुक्तौ प्रवृत्तिः नत्राप्यतिप्रमात्वछेपील
धीः रजतत्वेतिपुरोवर्तिनि इदंताबछेदकांसंसर्गाग्रहस्येव हेतुत्वादिभ्वः तन्नित्तत्वात
छेदकप्रकारकज्ञानत्वेतिभावः अविशेषादिति क एवं विशेषण एवंविधिकापुविशेषविनाय
कः तथाच तद्विशेषातकर्षप्रवृत्तेः संवादिविसंवादित्वनिवृत्तिः अन्यत्वेत्वप्रवृत्तिसामा
न्येइदंताबछेदकप्रकारकज्ञानसंवादितिसंवादिप्रवृत्तिप्रतिइदंताबछेदकप्रकारक
प्रमात्वेन विसंवादिप्रवृत्तिप्रतिइदंताबछेदकप्रकारकभ्रमत्वेनहेतुत्वमित्यस्यार
थ्यातिसिद्धिरितिभावः संवादिनी विषयसंवादिनी अबाधितविषयेतियावत् एवंवि
संवादिनी बाधितविषयेत्यर्थः नद्वतीतिसत्यरजतछेरजतत्वावतिरजतत्वांशसंसर्गाग्रि
हस्य विद्यमानत्वात् संवादिप्रवृत्तिः शुक्तिस्थलेतु रजतत्वाभाववति रजतत्वांशसंसर्गग्रह २६४
स्य विद्यमानत्वात् विसंवादिनी प्रवृत्तिः अतएव संवादिप्रवृत्तौ अविद्यमानांशसंसर्गाग्रहः
विसंवादिप्रवृत्तौतु विद्यमानासंसर्गाग्रहो हेतुरितिगायं ति अविद्यमानीयोसंसर्गस्तदग्र
हः विद्यमानीयो संसर्गस्तदग्रह इति वत्तदर्थोविषयः लाघवादिति इदंताबछेदकांसं
सर्गाग्रहत्वापेक्षयाकारणतावछेदकलाघवात् इदंताबछेदकप्रकारकज्ञानमेवरजत
तत्वप्रकारकप्रवृत्तौहेतुरित्यर्थः एतेन इदंतौरिति व्याप्यपि परास्तः अवछेदकलाघवे

न.प्र नतत्रआमस्याप्रयोजकत्वात् अनुमितौ परामर्शवदिति तद्संग्रहः रजतत्वसंसर्गाग्र
हासंग्रहः समाधत्ते विशेषणेति अत्रापि भ्रमस्थले पितयोः शुक्तिरजतत्वयोः असंस
२६५ र्गाग्रहश्चेति स्वदोषाधीन इतिभावः रजतेंद्रियेति पुरोवर्ति निजतत्वाभावेन संयुक्त
समवायरूपसन्निकर्षाभावादित्यर्थः कृप्यमितिः तत्प्रकारकं रजतत्वप्रकारकं तत्प्र
कारकमिति तु प्रकृतानिप्रायेणसन्निकर्षस्य सामान्यतः प्रत्यक्षएव हेतुत्वादित्यव
धेयं सन्निहितमिति प्रत्यक्षं हि द्विविधं लौकिकं च प्रकृते संयुक्तसमवायरूपलौकिक
सन्निकर्षाभावाल्लौकिकप्रत्यक्षविरहेपि ज्ञानलक्षणारूपालौकिकसन्निकर्षसत्वा
दलौकिकप्रत्यक्षे बाधकाभावः रजतत्वेति शुक्तौ रजतत्वप्रकारकं प्रत्यक्षमित्यर्थः त २६५
न्नैव शुक्तौ रजतत्वप्रकारकप्रत्यक्ष एव तत्कार्यकेति शुक्तौ रजतत्वप्रकारिका प्रवृत्तिरि
त्यर्थः प्रवृत्तौतु इदंतावछेदकप्रकारकज्ञानत्वेन हेतुतायामवश्यकल्पितत्वादितिभा
वः इदं रजतमित्याज्ञानामीत्यनुव्यवसायोपि शुक्तिगोचर रजतत्वेन प्रकारकप्रत्यक्षसाध
को वसेयइति॥ अतिकष्टेन तत्केपि तद्विहर्षमस्तु तेन मम। शिवेश्वरीपरं दुःकरसैनवि
जृंभितम्॥१॥ सोसौ कान्यां समुत्पादि विश्वनाथेन धीमता॥ तस्मै श्रीकंठवकृतिनः कृतिराव
नुनामुदम्॥ ॥इतिश्रीकाशिगद्गसंप्रदायदीक्षितविश्वनाथात्मजदीक्षितश्रीकंठशास्त्री
विरचितानर्क्कप्रकाशाख्या सिद्धांतमंजरी दीपिका समाप्तिमगमत्॥ शुभंभवतु॥
शके १७८८ प्रभव वर्षे वैशाख पौर्णिमायां ताद्यो पाभिधघनश्यामेन लिखितं शास्त्रिणा


242